
ॐ


इति शुक्लयजुर्वेदमाध्यंदिनीयसंहिता प्रारम्भः ॥



Digitized by Sarayu Trust and eGangotri. Equipment Heritage Foundation, Jalgaon

Yajurveda

अथ शुक्लयजुर्वेदमाध्यंदिनीयसंहिताप्रारंभः ॥


याज्ञवल्क्य ऋषिः
यजुर्वेदः

हेमाद्रिकृत चतुर्वर्गचिंतामणिस्थव्रतखंडोक्तविश्वकर्मशास्त्रवचनात् शिक्षासहित वेदस्वरूपाणि.



श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ श्रीवेदपुरुषायनमः ॥
गणनाथसरस्वतीरविशुक्रबृहस्पतीन् ॥ पंचैतान् संस्मरेन्नित्यं वेद
वाणीं प्रवर्तयेत् ॥ अथानुवाकसूत्रम् ॥ इषेत्वैका, वसोःपवित्रंतिस्रो,
ऽग्नेव्रतपतेसप्त, पवित्रेस्थोद्वे, शर्म्मासितिस्रो, धृष्टिरसिशर्म्मासि
द्विकौ, देवस्यत्वातिस्रो, देवस्यत्वापंच, प्रत्युष्ट॑रक्षास्तिस्रो, दशै
कत्रि॑शत् ॥ हरिः ॐ इषेत्त्वा ॥ इषेत्त्वोर्ज्जेत्त्वावायवस्त्थदेवोवः
सविताप्प्रार्प्पयतुश्रेष्ठतमायकर्म्मणऽआप्प्यायद्ध्वमग्घ्न्याऽइन्द्राय

भागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघशꣳसोद्ध्रुवा
ऽअस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून्पाहि ॥ १ ॥ [१]
वसोःपवित्रम् ॥ वसोःपवित्रमसिद्यौरसिपृथिव्यसिमातरिश्वनो
घर्म्मोऽसिविश्वधाऽअसि ॥ परमेणधाम्नादृꣳहस्वमाह्वार्म्मातेय
ज्ञपतिर्ह्वार्षीत् ॥ २ ॥ वसोःपवित्रम् ॥ वसोःपवित्रमसिशतधारं
वसोःपवित्रमसिसहस्रधारम् ॥ देवस्त्वासवितापुनातुवसोःपवित्रे
णशतधारेणसुप्वाकामधुक्षः ॥ ३ ॥ साविश्वायुः ॥ साविश्वा

॥ १ ॥

युꣳसाव्विश्श्वकर्म्म्मासाव्विश्श्वधायाः ॥ इन्द्रस्यत्त्वाभागꣳसोमेना
तनच्मिव्विष्णोहव्यꣳरक्ष ॥ ४ ॥ [३] अग्ग्नेव्व्रतपते । व्व्रतञ्चरि
ष्ष्यामितच्छकेयन्तन्मेराध्यताम् ॥ इदमहमनृतात्सत्यमुपैमि
॥ ५ ॥ कस्त्वा । युनक्किसत्त्वायुनक्किकस्म्मैत्वायुनक्कितस्म्मैत्वा
युनक्कि ॥ कर्म्मणेवांव्वेषायवाम् ॥ ६ ॥ प्रत्युष्टꣳरक्षः ॥ प्रत्युष्टꣳर
क्षःप्रत्युष्टाऽअरातयोनिष्टप्तꣳरक्षोनिष्टप्ताऽअरातयः ॥ उर्व्वन्तरि
क्षमन्न्वेमि ॥ ७ ॥ धूरसि । धूर्व्वधूर्व्वन्तन्धूर्व्वतंय्योस्म्मान्धूर्व्वतितंधू

व्वयंव्वयन्धूर्व्वामः ॥ देवानामसिव्वह्नितमꣳसस्नितमम्पप्रितमञ्जुष्टं
तमन्देवहूतमम् ॥ ८ ॥ अह्रुतमसि । हविर्द्धानन्दृꣳहस्वमाह्वाम्मा
तेयज्ञपतिर्ह्वार्षीत् ॥ विष्णुस्त्वाक्क्रमतामुरुव्वातायापहतꣳरक्षो
यच्छन्ताम्पञ्च ॥ ९ ॥ देवस्यत्वा । सवितुश्प्प्रसवेश्विनोर्ब्बाहुब्भ्या
म्पूष्णोहस्ताब्भ्याम् ॥ अग्नयेजुष्टङ्गृह्णाम्यग्नीषोमाब्भ्याञ्जुष्टङ्गृ
ह्णामि ॥ १० ॥ भूतायत्वा ॥ भूतायत्वानारातयेस्वरभिविक्ख्येष
न्दृꣳहन्तान्दुर्य्याःपृथिव्यामुर्व्वन्तरिक्षमन्वेमिपृथिव्यास्त्वानाभौ ॥ २ ॥

सादयाम्म्यदित्याऽउपस्त्थेग्ग्नेहव्व्यꣳरक्ष ॥ ११ ॥ [७] पवित्त्रे
स्थꣳ ॥ पवित्त्रेस्त्थोव्वैष्ष्णव्व्यौसवितुर्व्वः प्प्रसवऽउत्पुनाम्म्यच्छिद्द्रेण
पवित्त्रेणसूर्य्यस्यरश्म्मिभिः ॥ देवीरापोऽअग्ग्रेगुवोऽअग्ग्रेपुवोग्ग्र
ऽइममद्ध्ययज्ञन्नयताग्ग्रेयज्ञपतिꣳसुधातुंय्यज्ञपतिन्देवयुवम् ॥ १२ ॥
युष्म्माइन्द्रः ॥ युष्म्माऽइन्द्रोवृणीतव्वृत्त्रतूर्य्येयूयमिन्द्रमवृणीद्ध्वं
वृत्त्रतूर्य्येप्प्रोक्षितास्त्थ ॥ अग्ग्नयेत्त्वाजुष्ट्टम्प्प्रोक्षाम्म्यग्ग्नीषोमा
भ्यान्त्वाजुष्ट्टम्प्प्रोक्षामि ॥ दैव्व्यायकर्म्मणेशुन्धद्ध्वन्देवयज्ज्यायैय

द्धोशुंद्धाःᳬपराजुग्घ्नुरिदंव्वुस्तच्छुंन्धामि ॥ १३ ॥ [२] शर्म्मा
सि ॥ शर्म्मास्यवधूतᳬरक्षोवधूताऽअरातयोदित्यास्त्वगंसिप्प्रतित्वा
दितिर्व्वेत्तु ॥ अद्रिरसिव्वानस्प्पत्योग्रावासिपृथुबुध्नःᳬप्प्रतित्वादित्या
स्त्वग्ग्वेत्तु ॥ १४ ॥ अग्नेस्तनूः ॥ अग्नेस्तनूरसिव्वाचोव्विसर्ज्जन
न्देववीतयेत्वागृह्णामिबृहद्ग्रावासिव्वानस्प्पत्त्यःसऽइदन्देवेभ्योह
विःशमीष्ष्वसुशमिशमीष्ष्व ॥ हविष्कृदेहिहविष्कृदेहि ॥ १५ ॥
कुक्कुटोसि ॥ कुक्कुटोसिमधुजिह्वऽइषमूर्ज्जमावदत्वयाव्वयᳬसंङ्घातᳬ

सङ्घातञ्जेष्म्मव्वर्षवृद्धमसिप्प्रतित्वाव्वर्षवृद्धंव्वेत्तुपरापूतँरक्षःपरापू
ताऽअरातयोपहतँरक्षोव्वायुर्व्वोव्विविनक्तुदेवोवःसविताहिरण्यपा
णिःप्प्रतिगृब्भ्णात्वच्छिद्द्रेणपाणिना ॥ १६ ॥ [३] धृष्टिरसि ॥
धृष्टिरस्यपाग्ग्नेऽअग्निमामादञ्जहिनिष्क्रव्यादँसेधादेवयजंव्वह ॥
ध्रुवमसिपृथिवीन्दृँहब्रह्मवनित्वाक्षत्रवनिसजातवन्युपदधामि
भ्रातृव्व्यस्यव्वधाय ॥ १७॥ अग्ग्नेब्रह्म । गृब्भ्णीष्वधरुणमस्यन्त
रिक्षन्दृँहब्रह्मवनित्त्वाक्षत्रवनिसजातवन्युपदधामिभ्रातृव्व्यस्य

व्वधायं ॥ धुर्त्रमसिदिवंन्दृꣳहब्रह्मवनिंत्त्वाक्षत्रवनिंसजातवन्न्युपंद
धामिभ्भ्रातृंव्व्यस्यवधायं ॥ विश्वांब्भ्युस्त्वाशांब्भ्युऽउपंदधामिचि
तंस्त्थोर्द्ध्वचितोभृगूंणामङ्गिरसान्तपंसातप्प्यद्ध्वम् ॥१८॥ [२] शर्म्मा
सि ॥ शर्म्मास्यवंधूतꣳरक्षोवंधूताऽअरांतयोदित्यास्त्वगंसिप्प्रतित्वा
दितिर्व्वेत्तु ॥ धिषणांसिपर्व्वतीप्प्रतित्वादित्यास्त्वग्व्वेत्तुदिवस्कम्भ
नीरंसिधिषणांसिपार्व्वतेयीप्प्रतिंत्वापर्व्वतीव्वेत्तुधान्न्यमसि ॥ १९ ॥
धान्न्यमसि । धिनुहिदेवान्प्राणायंत्त्वोदानायंत्वाव्व्यानायंत्वा ॥ ॥ ४ ॥

दीर्ग्घामनुप्प्रसितिमायुंषेधान्देवोवंः सवितांहिरंण्यपाणिः प्प्रतिगृ
भ्णात्वच्छिद्द्रेणपाणिनाचक्षुषेत्वामहीनाम्पयोसि ॥ २० ॥ [३]
देवस्यंत्वा । सवितुश्प्प्रंसुवेश्विनोर्ब्बाहुभ्यांम्पूष्णोहस्ताभ्याम् ॥
संव्वपामिसमापऽओषंधीभिः समोषंधयोरसैंन ॥ सᳬरेवतीर्ज्जगंती
भिः पृच्यन्ताᳬ सम्मधुंमतीर्म्मधुंमतीभिः पृच्यन्ताम् ॥ २१ ॥
जनंयत्त्यैत्त्वा ॥ जनंयत्त्यैत्त्वासंय्यौमीदमग्ग्नेरिदमग्ग्नीषोमंयो
रिषेत्वांघर्म्मोसिव्विश्वायुरुरुप्प्रंथाऽउरुप्प्रंथस्वोरुतेंयज्ञपंतिः प्प्रथ

तामग्निष्टेत्त्वचम्माहिꣳसीद्देवस्त्वासविताश्श्रपयतुवर्षिष्ठेधिनाके
॥ २२ ॥ माभेः ॥ माभेर्म्मासंविक्क्थाऽअतमेरुर्य्यज्ञोतमेरुर्य्यज
मानस्यप्प्रजाभूयात्त्रितायत्वाद्द्वितायत्वैकतायत्वा ॥ २३ ॥ [३]
देवस्यत्वा । सवितुःप्प्रसवेश्विनोर्ब्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥
आददेद्ध्वरकृतन्देवेभ्यऽइन्द्रस्यबाहुरसिदक्षिणꣳसहस्रभृष्टिꣳशतते
जाव्वायुरसितिग्मतेजाद्द्विषतोव्वधः ॥ २४ ॥ पृथिविदेवयजनि ॥
पृथिविदेवयजन्योषध्यास्तेमूलम्माहिꣳसिषंव्व्रजङ्गच्छगोष्ठानंवर्ष

तुतेद्यौर्ब्बधानदेवसवितःपरमस्याम्पृथिव्याꣳशतेनपाशैर्य्योस्मा
न्द्वेष्टियञ्चव्वयन्द्विष्मस्तमतोमामौक् ॥ २५ ॥ अपाररुम् ॥
अपाररुम्पृथिव्यैदेवयजनाद्वध्यासंव्व्रजङ्गच्छगोष्ठानंव्वर्षतुतेद्यौर्ब्बधा
नदेवसवितःपरमस्याम्पृथिव्याꣳशतेनपाशैर्य्योस्मान्द्वेष्टियञ्चव्व
यन्द्विष्मस्तमतोमामौक् ॥ अररोदिव्वम्मापप्तोद्द्रप्सस्तेद्याम्मा
स्कन्व्व्रजङ्गच्छगोष्ठानंव्वर्षतुतेद्यौर्ब्बधानदेवसवितःपरमस्याम्पृथि
व्याꣳशतेनपाशैर्य्योस्मान्द्वेष्टियञ्चव्वयन्द्विष्मस्तमतोमामौक्

संहि. ॥ २६ ॥ गायत्रेणंत्वा ॥ गायत्रेणंत्वाच्छन्दसापरिगृह्णामित्रैष्टुं पू. अ.
॥ ६ ॥ भेनत्वाच्छन्दसापरिगृह्णामिजागतेनत्वाच्छन्दसापरिगृह्णामि ॥ ॥ १ ॥
सुक्ष्माचासिंशिवाचासिस्योनाचासिंसुषदाचास्यूर्जस्वतीचासिप
यस्वतीच ॥ २७ ॥ पुराक्रूरस्य विसृपोविरप्शिन्नुदादायपृथिवी
ञ्जीवदानुम् ॥ यामैरयँश्चन्द्रमंसिस्वधाभिस्तामुधीरासोऽअनुदि
श्यंयजन्ते ॥ प्रोक्षणीरासादयद्विषतोवधोसि ॥ २८ ॥ [५] ॥ ६ ॥
प्रत्युष्टुंरक्षः ॥ प्रत्युष्टुंरक्षःप्रत्युष्टाअरातयोनिष्टप्तुंरक्षोनिष्ट

प्ताअरातयः ॥ अनिशितोसिसपत्नक्षिद्वाजिनन्त्वाव्वाजेध्यायै
सम्मार्ज्मि ॥ प्रत्त्युष्टꣳरक्षःप्रत्त्युष्टाऽअरातयोनिष्टप्तꣳरक्षोनिष्ट
प्ताऽअरातयः ॥ अनिशितासिसपत्नक्षिद्वाजिनीन्त्वाव्वाजेध्या
यैसम्मार्ज्मि ॥ २९ ॥ अदित्यैरास्ना । सिव्विष्ण्णोर्व्वेष्प्पोस्यूर्ज्जे
त्वाऽदब्धेनत्वाचक्षुषावपश्यामि ॥ अग्नेर्ज्जिह्वासिसुहूर्द्देवेब्भ्योधा
म्म्नेधाम्म्नेमेभवयजुषेयजुषे ॥ ३० ॥ सवितुस्त्वा । प्प्रसवऽउत्पुना
म्म्यच्छिद्द्रेणपवित्त्रेणसूर्य्यस्यरश्मिभिः ॥ सवितुर्व्वःप्प्रसवऽउत्पु

नाम्म्यच्छिद्द्रेणपवित्त्रेणसूर्य्यस्यरश्मिभिः ॥ तेजोसिशुक्रमस्यमृतंमसिधामनामासिप्प्रियन्देवानामनाधृष्टन्देवयजनमसि ॥ ॥ ३१ ॥ [३] इतिश्रीवाजसनेयसंहितायांप्रथमोऽध्यायः ॥ १ ॥

श्रीवेदपुरुषाय नमः ॥ अनुवाकसूत्रम् ॥ कृष्णोसिपड, ग्नेवाजजिन्तिस्रो, मयीद, मग्नीषोमयोःपंचका, वग्नेदब्धायोचतस्रः, संवर्चसापंचा, ग्नयेकव्यवाहनायषट् सप्तचतुस्त्रिꣳशत् ॥ हरिः

ॐ कृष्णोसि ॥ कृष्णोस्याखरेष्ठोग्नयेत्वाजुष्टम्प्रोक्षामिवेदिर

सिबर्हिषेत्वाजुष्टाम्प्रोक्षामिबर्हिरसिस्रुग्ग्भ्यस्त्वाजुष्टम्प्रोक्षाम्म्य
दित्यैव्व्युन्दनम् ॥ १ ॥ अदित्यैव्व्युन्दनमसिव्विष्णोस्तुपोस्यूर्णम्म्र
दसन्त्वास्तृणामिस्वासस्थान्देवेब्भ्योभुवपतयेस्वाहाभुवनपतये
स्वाहाभूतानाम्पतयेस्वाहा ॥ २ ॥ गन्धर्व्वस्त्वा । विश्वावसुःपरि
दधातुव्विश्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्निरिडऽईडितः ॥ इ
न्द्रस्यबाहुरसिदक्षिणोव्विश्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्निरि
डऽईडितः ॥ मित्राव्वरुणौत्त्वोत्तरतःपरिधत्तान्ध्रुवेणधर्म्मणाव्वि

संहि. श्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्निरिडईडितः ॥ ३ ॥ वीति पू. अ.
॥८॥ होत्रन्त्वा । कवेद्युमन्तꣳसमिधीमहि ॥ अग्नेबृहन्तमध्वरे ॥ ४ ॥ ॥२॥
समिदसि ॥ समिदसिसूर्य्यस्त्वापुरस्तात्पातुकस्याश्चिदभिशस्त्यै ॥
सवितुर्बाहूस्थऽऊर्णम्म्रदसन्त्वास्तृणामिस्वासस्थन्देवेभ्यऽआ
त्वावसवोरुद्राऽआदित्याः सदन्तु ॥ ५ ॥ घृताच्यसि । जु
हूर्नाम्नासेदम्प्रियेणधाम्नाप्प्रियꣳसदऽआसीदघृताच्यस्युपभृन्ना ॥८॥
म्नासेदम्प्रियेणधाम्नाप्प्रियꣳसदऽआसीदघृताच्यसिध्रुवानाम्ना

सेदम्प्रियेणधाम्नाप्प्रियᳬसदऽआसीदप्प्रियेणधाम्नाप्प्रियᳬसद
ऽआसीद ॥ ध्रुवाऽअसदन्नृतस्ययोनौताविष्णोपाहिपाहियज्ञम्पा
हियज्ञपतिम्पाहिमांय्यज्ञन्यम् ॥ ६ ॥ [६] अग्नेवाजजित् ॥ अ
ग्नेवाजजिद्वाजन्त्वासरिष्यन्तंव्वाजजितᳬसम्मार्ज्मि ॥ नमोदे
वेब्भ्यः स्वधापितृब्भ्यः सुयमेमेभूयास्तमस्कन्नमद्य ॥ ७ ॥ अ
स्कन्नमद्य । देवेब्भ्यऽआज्यᳬसम्भ्रियासमङ्घ्रिणाविष्णोमात्वाव
क्क्रमिषंव्वसुमतीमग्नेतेच्छायामुपस्थेषंव्विष्णोस्थानमसीतऽइ

न्द्रोवीर्य्यमकृणोदूर्द्ध्वोद्ध्वरऽआस्त्थात् ॥ ८ ॥ अग्ग्नेवेः ॥ अग्ग्ने
वेर्होत्रंव्वेर्दूत्यमवतान्त्वान्द्यावापृथिवीऽअवत्वन्द्यावापृथिवीस्विष्ट
कृद्देवेब्भ्यऽइन्द्रऽआज्ज्येनहविषाभूत्स्वाहासञ्ज्योतिषाज्ज्योतिः
॥ ९ ॥ [३] मयीदम् ॥ मयीदमिन्द्रऽइन्द्रियन्दधात्वस्मा
न्रायोमघवानꣳसचन्ताम् ॥ अस्माकꣳसन्त्वाशिषःसत्यानः
सन्त्वाशिषऽउपहूतापृथिवीमातोपमाम्पृथिवीमाताह्वयतामग्ग्नि
राग्ग्नीद्ध्रात्स्वाहा ॥ १० ॥ उपहूतोद्यौः ॥ उपहूतोद्यौष्पितोप

मान्द्यौष्प्पुताह्वंयतामुग्ग्निराग्नीद्ध्रात्स्वाहा ॥ देवस्यंत्वासवि
तुःप्प्रसुवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् ॥ प्रतिगृह्णाम्म्य
ग्नेष्ट्वास्येनप्प्राश्श्नामि ॥ ११ ॥ एतन्ते । देवसवितर्य्यज्ञम्प्राहुर्ब्बृ
हुस्प्पतयेब्ब्रह्मणे ॥ तेनंयुज्ञमवुतेनंयुज्ञपतिन्तेनुमामव ॥ १२ ॥
मनोजूतिः ॥ मनोजूतिर्ज्जुषतामाज्ज्यंस्यबृहुस्प्पतिर्य्युज्ञमिम
न्तनोत्वरिष्ट्टंय्युज्ञꣳसमिमन्दधातु ॥ व्विश्श्वेदेवासऽइुहमादयन्ता
मोꣳम्प्रतिष्ठ ॥ १३ ॥ एषाते । ऽअग्नेसुमित्तयाव्वर्द्धस्वुचाचप्प्याय

स्व ॥ व्वर्द्धिषीमहिंचव्वयमाचंप्प्यासिषीमहि ॥ अग्नेव्वाजजिद्वाजं
न्त्वाससृवाꣳसंव्वाजजितꣳसम्मार्ज्मि ॥ १४ ॥ [५] अग्ग्नीषोमं
योरुज्जितिम् ॥ अग्ग्नीषोमंयोरुज्जितिमनूज्जेषंव्वाजस्यमाप्प्रसवेन
प्प्रोहामि ॥ अग्नीषोमौतमपंनुदतांय्योस्मान्द्वेष्टियञ्चव्वयन्द्विष्म्मो
व्वाजस्यैनम्प्रसवेनापोहामि ॥ इन्द्राग्न्योरुज्जितिमनूज्जेषंव्वाजस्य
माप्प्रसवेनप्प्रोहामि ॥ इन्द्राग्नीतमपंनुदतांय्योस्म्मान्द्वेष्टियञ्चव्व
यन्द्विष्म्मोव्वाजस्यैनम्प्रसवेनापोहामि ॥ १५ ॥ व्वसुभ्यस्त्वा ।

रुद्रेभ्यस्त्वादित्येभ्यस्त्वासञ्ज्ञानाथान्द्यावापृथिवीमित्रावरुणौ
त्वावृष्ट्यावताम् ॥ व्यन्तुवयोक्तꣳरिहाणामरुताम्पृषतीर्गच्छवशा
पृश्निर्भूत्वादिवङ्गच्छततोनोवृष्टिमावह ॥ चक्षुष्पाऽअग्नेसि
चक्षुर्म्मेपाहि ॥ १६ ॥ यम्परिधिम् ॥ यम्परिधिम्पर्य्यधत्थाऽअग्ने
देवपणिभिर्गुह्यमानः ॥ तन्तऽएतमनुजोषम्भराम्म्येषनेत्वदपचेत
याताऽअग्नेःप्प्रियम्पाथोपीतम् ॥ १७ ॥ सꣳस्रवभागास्त्थेषा
बृहन्तःप्प्रस्तरेष्ठाःपरिधेयाश्चदेवाः ॥ इमांवाचमभिविश्वेगृण

न्तऽआसद्यास्मिन्बर्हिषिमादयध्वꣳस्वाहावाट् ॥ १८ ॥ घृता
चीस्त्थः ॥ घृताचीस्त्थोधुर्य्यौपातꣳसुम्नेस्त्थꣳसुम्नेमाधत्तम् ॥
यज्ञनमंश्चतऽउपंचयज्ञस्यंशिवेसन्तिष्ठस्वस्विष्टेमेसन्तिष्ठस्व ॥
॥ १९ ॥ [५] अग्नेदब्धायो । शीतमपाहिमादिद्योःपाहिप्रसित्यै
पाहिदुरिष्ट्यैपाहिदुरद्मन्याऽअविषन्नःपितुङ्कृणुसुषदायोनौस्वा
हावाडग्नयेसंवेशपतयेस्वाहासरस्वत्यैयशोभगिन्यैस्वाहा ॥ २० ॥
वेदोसि ॥ वेदोसियेनत्वन्देववेददेवेभ्योवेदोभवस्तेनमह्यंवेदोभूः

याः ॥ देवागातुविदोगातुंवित्वागातुमित ॥ मनसस्पतऽइमन्दे
वयज्ञᳬस्वाहावातेधाः ॥ २१ ॥ सम्बर्हिः ॥ सम्बर्हिरङ्क्ताᳬह
विषांघृतेनसमादित्यैर्वसुभिःसम्मरुद्भिः ॥ समिन्द्रोविश्वदेवेभि
रङ्क्तान्दिव्यन्नभोगच्छतुयत्स्वाहा ॥ २२ ॥ कस्त्वा ॥ कस्त्वा
विमुञ्चतिसत्वाविमुञ्चतिकस्मैत्वाविमुञ्चतितस्मैत्वाविमुञ्चति ॥
पोषायरक्षसाम्भागोसि ॥ २३ ॥ [४] संवर्चसा ॥ संवर्चसापयं
सासन्तनूभिरगन्महिमनसासᳬशिवेन ॥ त्वष्टासुदत्रोविदधातुरा

संहि. योनुमार्ष्टुंतन्वोयद्विलिष्टम् ॥ २४ ॥ दिविविष्णुः ॥ दिविविष्णु पू. अ.
॥१२॥ र्व्यक्रꣳस्तजागतेनच्छन्दसाततोनिर्भक्तोयोस्मान्द्वेष्टियञ्चवय ॥ २ ॥
न्द्विष्मोन्तरिक्षेविष्णुर्व्यक्रꣳस्तत्रैष्टुभेनच्छन्दसाततोनिर्भ
क्तोयोस्मान्द्वेष्टियञ्चवयन्द्विष्मःपृथिव्यांविष्णुर्व्यक्रꣳस्त
गायत्रेणच्छन्दसाततोनिर्भक्तोयोस्मान्द्वेष्टियञ्चवयन्द्विष्मो
स्मादन्नादस्यैप्रतिष्ठायाऽअगन्मस्वःसञ्ज्योतिषाभूम ॥ २५ ॥ ॥१२॥
स्वयम्भूरसि ॥ स्वयम्भूरसिश्रेष्ठोरश्मिर्वर्चोदाऽअसिवर्चोमेदे

हि ॥ सूर्य्यस्यावृतमन्वावर्त्ते ॥ २६ ॥ अग्ग्नेगृहपते । सुगृहपति
स्त्वयाग्ग्नेहङ्गृहपतिनाभूयासꣳ सुगृहपतिस्त्वम्मयाग्ग्नेगृहपतिना
भूयाः ॥ अस्त्थूरिणौगार्हपत्त्यानिसन्तुशतꣳहिमाःसूर्य्यस्यावृत
मन्वावर्त्ते ॥ २७ ॥ अग्ग्नेव्व्रतपते । व्व्रतमचारिषन्तदशकन्तन्मेराधी
दमहंय्यऽएवास्म्मिसोस्म्मि ॥ २८ ॥ [५] अग्ग्नयेकव्यवाहनाय
स्वाहासोमायपितृमतेस्वाहा ॥ अपहताऽअसुरारक्षाꣳसिवेदिषदः
॥ २९ ॥ येरूपाणि । प्प्रतिमुञ्चमानाऽअसुराःसन्तःस्वधयाचरन्ति ॥

सं. ३

संहि. ॥१३॥

पु. अ. ॥२॥

पुरापुरोनिपुरोयेभरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् ॥ ३० ॥
अत्रपितरः ॥ अत्रपितरोमादयध्वंय्यथाभागमावृषायध्वम् ॥ अ
मीमदन्तपितरोयथाभागमावृषायिषत ॥ ३१ ॥ नमोवःपितरो
रसायनमोवःपितरःशोषायनमोवःपितरोजीवायनमोवःपितरः
स्वधायैनमोवःपितरोघोरायनमोवःपितरोमन्यवेनमोवःपितरः
पितरोनमोवोगृहान्नःपितरोदत्तसतोवःपितरोदेष्मैतद्वःपितरो
वासऽआधत्त ॥३२॥ आधत्त । पितरोगर्भङ्कुमारम्पुष्करस्रजम् ॥

॥१३॥

यथेहपुरुषोसत् ॥ ३३ ॥ ऊर्ज्जम्वहन्तीः ॥ ऊर्ज्जम्वहन्तीरमृतङ्घृ
तम्पयःकीलालंपरिस्रुतम् ॥ स्वधास्थतर्प्पयतमेपितॄन् ॥ ३४ ॥
[६] इतिश्रीवाजसनेयसंहितायांद्वितीयोऽध्यायः ॥ २ ॥ श्रीवेद
पुरुषायनमः ॥ अनुवाक्सूत्रम् । समिधाग्निम्, भूर्भुवःस्वश्चतुष्का,
वग्निर्ज्योतिर्द्वे, उपप्रयन्तषड्विꣳशतिः, भूर्भुवःस्वश्चतस्रो, गृहामा
तिस्रः, घस्रघासिनः पंच, पूर्णादर्विद्वे, ऽअक्षन्नमीमदन्तषडे, षते
सप्त, दश ॥ १० ॥ त्रिषष्टिः ॥ हरिःॐसमिधाग्निम् ॥ समिधा

ग्निन्दुंवस्यतघृतैर्बोधयुतातिंथिम् ॥ आस्मिन्हुव्याजुंहोतन ॥१॥
सुसंमिद्धायशोचिषे । घृतन्तीव्रञ्जुंहोतन ॥ अग्नयेंजातवेंदसे ॥ २ ॥
तन्त्वां । सुमिद्भिरङ्गिरोघृतेनंवर्द्धयामसि ॥ बृहच्छोंचायविष्ठ्य
॥ ३ ॥ उपंत्वा । ग्नेहुविष्मंतीर्घृताचींर्य्यन्तुहर्य्यत ॥ जुषस्वंस
मिधोममं ॥ ४ ॥ [४] भूर्भुवः ॥ भूर्भुवःस्वर्द्यौरिवभूम्नापृंथिवी
वंवरिम्णा ॥ तस्यास्तेपृथिविदेवयजनिपृष्ठेग्निमंन्नादमन्नाद्यायादंधे
॥ ५ ॥ आयम् ॥ आयङ्गौःपृश्निंरक्रमीदसंदन्मातरम्पुरः ॥ पितरं

त्वप्प्रयन्त्स्वः ॥ ६ ॥ अन्तश्चरति । रोचनास्यप्प्राणादपानती ॥ व्य
क्ख्यन्महिषोदिवम् ॥ ७ ॥ त्रिᳫंशद्धाम ॥ त्रिᳫंशद्धामव्विराजति
वाक्पतङ्गायधीयते ॥ प्रतिवस्तोरहद्युभिः ॥ ८ ॥ [४] अग्निर्ज्यो
तिः ॥ अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहासूर्य्योज्ज्योतिर्ज्योतिᳫंसू
र्य्यᳫंस्वाहा ॥ अग्निर्व्वर्च्चोज्ज्योतिर्व्वर्च्चᳫंस्वाहासूर्य्योव्वर्च्चोज्ज्योतिर्व्व
र्च्चᳫंस्वाहा ॥ ज्योतिᳫंसूर्य्यᳫं सूर्य्योज्ज्योतिᳫंस्वाहा ॥ ९ ॥ सजूर्द्दे
वेन । सवित्रासजूरात्र्येन्द्रवत्या ॥ जुषाणोऽअग्निर्व्वेतुस्वाहा ॥ सजू

हैंवेनेसवित्रासजूरुषसेन्द्रंवत्या ॥ जुषाणःसूर्य्यौवेतुस्वाहा ॥ १० ॥
[२]उपप्प्रयन्तोऽअद्ध्वरम् ॥ उपप्प्रयन्तोऽअद्ध्वरम्मन्त्रंवोचेमाग्नये ॥
आरेऽअस्म्मेचशृण्वते ॥ ११ ॥ अग्निर्म्मूर्द्धा । दिवःककुत्पतिः पृथि
व्याऽअयम् ॥ अपाꣳरेताꣳसिजिन्वति ॥ १२ ॥ उभावाम् ॥ उभा
वामिन्द्राग्नीऽआहुवद्ध्याऽउभाराधसःसहमादयद्ध्यै ॥ उभादातारा
विषाꣳरयीणामुभावाजस्यसातयेहुवेवाम् ॥ १३ ॥ अयन्ते ॥ अयन्ते
योनिर्ऋत्वियोयतोजातोऽअरोचथाः ॥ तञ्जानन्नग्नऽआरोहाथानो

व्वर्द्धयारयिम् ॥१४॥ अयमिह । प्प्रथमोधायिधातृभिर्होतायजिष्ठो
ऽअद्ध्वरेष्ष्वीड्ड्यः ॥ यमप्नवानोभृगवोव्विरुरुचुर्व्वनेषुचित्रंव्विभ्वंव्वि
शेविंशे ॥ १५ ॥ अस्यप्प्रत्नाम् ॥ अस्यप्प्रत्नामनुद्युतंꣳशुक्रन्दुदु
ह्रेऽअह्रयः ॥ पयः सहस्रसामृषिम् ॥ १६ ॥ तनूपाऽअग्नेसित
न्व्वम्मेपाह्यायुर्द्दाऽअग्नेस्यायुर्म्मेदेहिवर्च्चोदाऽअग्नेसिवर्च्चोमेदेहि ॥
अग्नेयन्मेतन्न्वाऽऊनन्तन्मऽआपृण ॥ १७ ॥ इन्धानास्त्वा ।
शतꣳहिमाद्युमन्तꣳसमिधीमहि ॥ व्वयस्वन्तोव्वयस्कृतꣳसहस्वन्तः

सहस्कृतम् ॥ अग्नेसपत्नदम्भनमदब्धासोऽअदाभ्यम् ॥ चित्रा
वसोस्वस्तितेपारमशीय ॥ १८ ॥ सन्त्वम् ॥ सन्त्वमग्नेसूर्यस्य
वर्च्चसागथाःसमृषीणाꣳस्तुतेन ॥ सम्प्रियेणधाम्नासमहमायु
षासंव्वर्च्चसासम्प्रजयासꣳरायस्पोषेणग्मिषीय ॥ १९ ॥ अन्ध
स्त्थ ॥ अन्धस्त्थान्धोवोभक्षीयमहस्त्थमहोवोभक्षीयोर्ज्जस्त्थो
र्ज्जंवोभक्षीयरायस्पोषस्त्थरायस्पोषंव्वोभक्षीय ॥ २० ॥ रेवती
रमद्ध्वम् ॥ रेवतीरमद्ध्वमस्म्मिन्न्योनावस्म्मिन्न्गोष्ठेस्म्मिँल्लोकेस्म्मिम

न्क्षये ॥ इहैवस्तमापंगात् ॥ २१ ॥ सहहितासिं । विश्वरूप्यूर्ज्जा
माविंशगौपत्त्येनं ॥ उपत्त्वाग्नेदिवेदिंवेदोषांवस्तर्द्धियाव्वयम् ॥ न
मोभरंन्तऽएमंसि ॥ २२ ॥ राजंन्तमद्ध्वराणांङ्गोपामृतस्यदीदि
विम् ॥ वर्द्धमानꣳस्वेदमें ॥ २३ ॥ सनंः ॥ सनंः पितेवंसूनवेग्ने
सूपायनोभंव ॥ सचंस्वानꣳस्वस्तयें ॥ २४ ॥ अग्नेत्त्वम् ॥ अग्ने
त्त्वन्नोअन्तमऽउतत्राताशिवोभंवाव्वरूत्थ्यः ॥ वसुंरग्निर्व्वसुंश्श्रवा
ऽअच्छांनक्षिद्युमत्तंमꣳरयिन्दाः ॥ २५ ॥ तन्त्वां ॥ तन्त्वांशोचिष्ठ

दीदिवꣳसुम्नायनूनमीमहेसखिभ्यꣳ ॥ सनोबोधिश्रुधीहवमु
रुष्ष्याणोऽअघायतःसमस्म्मात् ॥ २६ ॥ इडऽएहि ॥ इडऽएह्य
दितऽएहिकाम्म्याऽएत ॥ मयिवꣳकामधरणम्भूयात् ॥ २७ ॥
सोमानꣳस्वरणम् । कृणुहिब्रह्मणस्प्पते ॥ कक्षीवन्तंय्यऽऔशि
जः ॥२८॥ योरेवान् ॥ योरेवान्योऽअमीवहाव्वसुवित्पुष्टिवर्द्धनः ॥
सनःसिषक्तुयस्तुरः ॥२९॥ मानः ॥ मानꣳशꣳसोऽअररुषोधूर्तिः
प्प्रणङ्मर्त्यस्य ॥ रक्षाणोब्रह्मणस्प्पते ॥३०॥ महित्रीणाम् ॥ महि

त्रीणामवोस्तुद्युक्षम्मित्रस्यार्य्यम्म्णः ॥ दुराधर्षंव्वरुणस्य ॥ ३१ ॥
नहितेषाम् ॥ नहितेषाममाचुननार्ध्वंसुव्वारणेषु ॥ ईशेरिपुरघशᳫसः ॥ ३२ ॥ तेहिपुत्रासोऽअदितेःप्प्रजीवसेमर्त्त्याय ॥ ज्योति
र्य्यच्छन्त्यजस्रम् ॥ ३३ ॥ कदाचन । स्तरीरसिनेन्द्रसश्चसिदा
शुषे ॥ उपोपेन्नुमघवन्भूयऽइन्नुतेदानन्देवस्यपृच्यते ॥ ३४ ॥
तत्सवितुः ॥ तत्सवितुर्व्वरेण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोनःप्प्र
चोदयात् ॥ ३५ ॥ शतम् १०० ॥ परितेदूडभोरथोस्म्माँ२अश्नो

तुव्विश्वतः ॥ येनरक्षांसिदाशुषः ॥ ३६ ॥ [२६] भूर्भुवः ॥ भू
र्भुवःस्वःसुप्प्रजाःप्प्रजाभिःस्याᳪंसुवीरोव्वीरैःसुपोषःपोषैः ॥
नर्य्यंप्प्रजाम्मेपाहिशᳪंस्यपशून्मेपाह्यथर्य्यपितुम्मेपाहि ॥ ३७ ॥
आगन्न्म । व्विश्ववेदसमस्म्मभ्भ्यंव्वसुवित्तमम् ॥ अग्नेसम्म्राडभिद्यु
म्नमभिसहऽआयच्छस्व ॥ ३८ ॥ अयमग्निः ॥ अयमग्निर्गृहप
तिर्ग्गार्हपत्यःप्प्रजायाव्वसुवित्तमः ॥ अग्नेगृहपतेभिद्युम्नमभि
सहऽआयच्छस्व ॥ ३९ ॥ अयमग्निः ॥ अयमग्निःपुरीष्योरयि

मान्पुंष्टिवर्द्धंनः ॥ अग्नेपुरीष्याभिद्युम्नमभिसहऽआयंच्छस्व
॥४०॥[४] गृहामा । बिंभीतमावेपद्ध्वमूर्ज्जम्बिभ्रंतऽएमंसि ॥ ऊ
र्ज्जम्बिभ्रंद्वःसुमनाः सुमेधागृहानैमिमनंसामोदंमानः ॥ ४१ ॥
येषामुध्येति । प्रवसन्येषुंसौमनसोबहुः ॥ गृहानुपंह्वयामहेतेनो
जानन्तुजानतः ॥ ४२ ॥ उपंहूताऽइह । गावऽउपंहूताऽअजाव
यंः ॥ अथोऽअन्नंस्यकीलालऽउपंहूतोगृहेषुंनः ॥ क्षेमांयवःशा
न्त्यैप्रपंद्येशिवःशग्मःशंय्योःशंय्योः ॥ ४३ ॥ [३] प्रघासिनो

हवामहे । मरुतंश्चरिशादंसः ॥ करम्भेणंसजोषंसः ॥ ४४ ॥ य
द्ग्रामें ॥ यद्ग्रामेयदरंण्येयत्सभायांय्यदिन्द्रिये ॥ यदेनंश्चकृमाव
यमिदन्तदवंयजामहेस्वाहा ॥ ४५ ॥ मोषूणं÷ ॥ मोषूणंऽइन्द्रा
त्रंपृत्सुदेवैरस्तिहिष्म्मांतेशुष्मिन्नवयाः ॥ महश्चिद्यस्यंमीढुषोय
व्याहविष्म्मंतोमरुतोवन्दंतेगीः ॥ ४६ ॥ अक्रन्कर्म्मंकर्म्मकृत÷
सहवाचामंयोभुवा ॥ देवेभ्यःकर्म्मंकृत्वास्तम्प्रेतंसचाभुवः
॥४७॥ अवंभृथनिचुम्पुण । निचेरुरंसिनिचुम्पुणः ॥ अवंदेवैर्देवकं

तुमेनोयासिषुमवुमत्यैर्म्म॑त्त्यैकृतम्पुरुराव्णोदेवरिषस्प्पाहि ॥४८॥
[५] पूर्णादर्वि ॥ पूर्णादर्व्विपरापतसुपूर्ण्णापुनरापत । व्वस्नेवविक्रीणावहाऽइषमूर्ज्जंशतक्रतो ॥ ४९ ॥ देहिमे ॥ देहिमेददामिते
निमेधेहिनितेदधे ॥ निहारंञ्चहरासिमेनिहारन्निहराणितेस्वाहा
॥ ५० ॥ अक्षन्नमीमदन्त ॥ अक्षन्नमीमदन्तह्यवप्प्रियाऽअधूपत ॥
अस्तोषतस्वभानवोव्विप्प्रानविष्ठयामतीयोजान्विन्द्रतेहरी ॥५१॥
सुसन्दृशन्त्वा ॥ सुसन्दृशन्त्वाव्वयम्मघवन्वन्दिषीमहि ॥ प्रनूनम्पू

र्णवंन्धुरस्तुतोयांसिवशाँ २ ऽअनुयोजान्विन्द्रतेहरीं ॥ ५२ ॥ म
नोनु ॥ मनोन्वाह्वामहेनाराशꣳसेनस्तोमेन ॥ पितॄणाञ्चमन्मंभिः
॥ ५३ ॥ आनः ॥ आनंऽएतुमनꣳपुनꣳक्रत्वेदक्षांयजीवसे ॥ ज्यो
क्चसूर्य्यंन्दृशे ॥ ५४ ॥ पुनर्न्नꣳ ॥ पुनर्न्नꣳपितरोमनोददातुदैव्योज
नः ॥ जीवंव्व्रातꣳसचेमहि ॥५५॥ व्वयꣳसोमव्व्रतेतवमनंस्तनूषुबि
भ्भ्रंतः ॥ प्रजावंन्तꣳसचेमहि ॥५६॥ एषते । रुद्रभागःसहस्वस्रा
म्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभागऽआखुस्तेपशुः ॥ ५७ ॥ अव

रुद्रम् ॥ अवंरुद्रमंदीमह्यवंदेवन्त्र्यंम्बकम् ॥ यथांनोवस्यंसस्करद्य
थांनःश्रेयंसस्करद्यथांनोव्यवसाययांत् ॥ ५८॥ भेषजमंसि । भे
षजङ्गवेश्वांयपुरुंषायभेषजम् ॥ सुखम्मेषायंमेष्ष्यै ॥ ५९ ॥ त्र्यं
म्बकंय्यजामहे । सुगन्धिम्पुंष्टिवर्द्धनम् ॥ उर्व्वारुकमिंवबन्धंनान्मृ
त्योर्मुक्षीयमामृतांत् ॥ त्र्यंम्बकंय्यजामहेसुगन्धिम्पंतिवेदनम् ॥
उर्व्वारुकमिंवबन्धंनादितोमुंक्षीयमामुतः ॥ ६० ॥ एतत्ते । रुद्रावं
सन्तेनंपरोमूजंवतोतींहि ॥ अवंततधन्वापिनांकावसःकृत्तिवासा

ऽअहिँ꣡ꣳसन्नꣳशिवोतीहि ॥ ६१ ॥ त्र्यायुषंजमदग्नेःकश्यपस्यत्र्या
युषम् ॥ यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥ ६२ ॥ शिवोना
म ॥ शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहिꣳसीः ॥
निर्वर्त्तयाम्म्यायुषेन्नाद्यायप्प्रजननायरायस्प्पोषायसुप्प्रजास्त्वाय
सुवीर्य्याय ६३ ॥ १० ॥ [७] इतिश्रीवाजसनेयसंहितायांतृतीयो
ऽध्यायः ॥ ३ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् एदंद्ध्वे, मही
नाम्पयश्चतस्र, आकूत्या, ऋक्सामयो, द्विकौ, व्रतंकृणुतषडे, प

तेचतस्रो, वस्व्यासितिस्र, एषतेद्वे, शुक्रंत्वाचतस्रोदित्यास्त्वगष्टौ,
दशसप्तत्रिꣳशत् ॥ १० ॥ हरिःॐएदम् ॥ एदमंगन्मदेवयजंनम्पृ
थिव्यायत्रंदेवासोऽअजुंपन्तुविश्वें ॥ ऋक्सामाभ्यांꣳसन्तरंन्तो
यजुर्भीरायस्पोषेणसमिषामंदेम ॥ इमाऽआपꣳशमुंमेसन्तुदेवी
रोषधेत्रायंस्वस्वधितेमैनꣳहिꣳसीः ॥ १ ॥ आपोऽअस्मान् ॥ आ
पोऽअस्मान्मातरंꣳशुन्धयन्तुघृतेनंनोघृतेप्वꣳपुनन्तु ॥ विश्वꣳ
हिरिप्रम्प्रवहंन्तिदेवीरुदिदाभ्यꣳशुचिरापूतऽएंमि ॥ दीक्षातपसो

स्तनूरसितान्त्वाशिवाꣳशग्ग्माम्परिंदधेभद्रंव्वर्णम्पुष्यंन् ॥ २ ॥
[२] महीनाम्पयः ॥ महीनाम्पयोसिव्वर्चोदाऽअसिव्वर्चोमेदेहि ॥
वृत्रस्यासिकनीनंकश्चक्षुर्दाऽअसिचक्षुर्म्मेदेहि ॥३॥ चित्पतिर्म्मा ॥
चित्पतिर्म्मापुनातुव्वाक्पतिर्म्मापुनातुदेवोमासवितापुनात्वच्छिद्रे
णपवित्रेणसूर्यस्यरश्मिभिः ॥ तस्यतेपवित्रपतेपवित्रपूतस्ययत्
त्कामःपुनेतच्छकेयम् ॥ ४ ॥ आवः ॥ आवोदेवासऽईमहेव्वाम
म्प्रयत्यद्ध्वरे ॥ आवोदेवासऽआशिषोयज्ञियासोहवामहे ॥ ५ ॥

स्वाहा॑सु॒ज्ञम् ॥ स्वाहा॑सु॒ज्ञं मन॑सु॒ꣳस्वाहो॒रोर॒न्तरि॑क्षा॒त्स्वाहा॒द्यावा॑पृ
थि॒वीभ्या॒ꣳस्वाहा॒व्वाता॒दार॑भे॒स्वाहा॑ ॥ ६ ॥ [४] आकू॑त्यै॒प्प्रयु॒जे॑ ॥
आकू॑त्यै॒प्प्रयु॒जे॒ग्ग्नये॒स्वाहा॑मे॒धायै॒मन॑से॒ग्ग्नये॒स्वाहा॑दी॒क्षायै॒तप॑से॒ग्ग्न
ये॒स्वाहा॒सर॑स्वत्यै पू॒ष्णे॒ग्ग्नये॒स्वाहा॑ ॥ आपो॑दे॒वीर्बृ॑हती॒र्व्वि॑श्वश॑म्भु
वो॒द्यावा॑पृथि॒वी॒ऽउरो॑ऽअन्तरिक्ष ॥ बृह॒स्पत॑ये॒ह॒विषा॑विधेम॒स्वाहा॑
॥ ७ ॥ व्विश्वो॑दे॒वस्य॑ ॥ व्विश्वो॑दे॒वस्य॑ने॒तुर्म्मर्तो॑व्वुरीतस॒ख्यम् ॥ व्वि
श्वो॑रा॒यऽइ॑षुध्याति॒द्युम्नं॑व्वृ॑णीतपु॒ष्यसे॒स्वाहा॑ ॥ ८ ॥ [२] ऋक्क्सा॒

मयोऽशिल्प्पै ॥ ऋक्क्सामयोऽशिल्प्पैस्त्थस्तेव्वामारंभेतेमांपातमा
स्ययज्ञस्योद्दृचं÷ ॥ शर्म्मांसि शर्म्मंमेयच्छनमंस्तेऽअस्तुमामांहिꣳ
सीः ॥९॥ ऊर्ग्गंसि ॥ ऊर्ग्गंस्याङ्गिरस्यूर्णम्म्रदाऽऊर्ज्जंमयिंधेहि ॥ सो
मंस्यनीविरंसिव्विष्णोऽशर्म्मांसिशर्म्मंयजंमानस्येन्द्रंस्ययोनिंरसि
सुसस्याःकृषीस्कृंधि ॥ उच्छ्रंयस्ववनस्प्पतऽऊर्द्ध्वोमांपाह्यꣳहंस
ऽआस्ययज्ञस्योद्दृचं÷ ॥ १० ॥ [२] व्रतङ्कृंणुत । व्रतङ्कृंणुताग्निर्ब्रह्मा
ग्निर्य्यज्ञोव्वनस्प्पतिर्य्यज्ञियं÷ ॥ दैवीन्धियंम्मनामहेसुमृडीकाम्

भिष्टंयेव्वर्च्चोधांस्युज्ज्वाहसꣳसुतीर्थानोऽअसद्वशे ॥ येदेवामनोजा
तामनोयुजोदक्षंक्रतवस्तेनोवन्तुतेनःपान्तुतेभ्यꣳस्वाहा ॥ ११ ॥
श्वात्त्राःपीताः ॥ श्वात्त्राःपीताभवतयूयमापोऽअस्माकमन्तरुदरे
सुशेवाꣳ ॥ ताऽअस्मभ्यमयक्ष्माऽअनमीवाऽअनागसꣳस्वदन्तु
देवीरमृताऽऋतावृधः ॥ १२ ॥ इयन्ते । यज्ञियातनूरपोमुञ्चामि
नप्रजाम् ॥ अꣳहोमुचꣳस्वाहाकृताःपृथिवीमाविशतपृथिव्यास
म्भव ॥ १३ ॥ अग्नेत्वम् ॥ अग्नेत्वꣳसुजागृहिवयꣳसुमन्दिषीमहि ॥

संहि. रक्षाणोऽअप्प्रयुच्छन्प्रबुधेनः पुनस्कृधि ॥ १४ ॥ पुनर्म्मनः ॥ पु पू. अ.
॥२४॥ नर्म्मनः पुनरायुर्म्मऽआगन्पुनः प्प्राणः पुनरात्त्मामऽआगन्पुनश्च ॥४॥
क्षुः पुनः श्श्रोत्रम्मऽआगन् ॥ वैश्श्वानरोऽअदब्धस्तनूपाऽअग्ग्निर्न्नः
पातुदुरितादवद्यात् ॥ १५ ॥ त्वमग्ग्ने । व्रतपाऽअसिदेवऽआमर्त्त्ये
ष्ष्वा ॥ त्वँय्यज्ञेष्ष्वीड्यः ॥ रास्वेयत्सोमाभूयोभरदेवोनः सविता
वसोर्द्दातावस्वदात् ॥ १६ ॥ [६] एषातेशुक्क्रतनूरेतद्वर्च्चस्तयास ॥२४॥
म्भवभ्भ्राजङ्गच्छ ॥ जूरसिधृतामनसाजुष्टाविष्ष्णवे ॥ १७ ॥ तस्या

स्ते । सत्त्यसंवसहंप्प्रसवेतन्न्वोयन्त्रमंशीयस्वाहा ॥ शुक्रमंसिच
न्द्रमंस्यमृतंमसिवैश्श्वदेवमंसि ॥ १८ ॥ चिदंसि । मनासिधीरंसि
दक्षिणासिक्षत्रियांसियज्ञियास्यदितिरस्युभयतश्शीष्ण्णी ॥ सा
नहंसुप्प्राचीसुप्प्रतीच्च्येधिमित्रस्त्वांपदिबध्ध्नीताम्पूषाद्ध्वनस्प्पा
त्विन्द्रायाद्ध्यक्षाय ॥ १९ ॥ अनुंत्वामातामंन्न्यतामनुंपितानुब्भ्रा
तासगब्भ्यौंनुसखासयूंत्थ्यः ॥ सादेंविदेवमच्छेहीन्द्रायसोमंहरुद्र
स्त्वावर्त्तयतुस्वस्तिसोमंसखापुनरेहि ॥ २० ॥ [४] वस्व्यंसि ॥ वस्व्य

सं. ५

स्यदितिरस्यादित्त्यासिरुद्द्रासिचन्द्रासि ॥ बृहस्प्पतिष्ट्वासुम्म्नेरं
म्म्णातुरुद्द्रोव्वसुभिराचके ॥ २१ ॥ अदित्त्यास्त्वा । मूर्द्धन्नाजिघर्म्मि
देवयजनेपृथिव्व्याऽइडायास्प्पदमसिघृतवत्स्वाहा ॥ अस्म्मेरमस्वा
स्म्मेतेबन्धुस्त्वेरायोमेरायोमाव्वयꣳरायस्प्पोषेणव्वियौष्म्मतोतो
रायः ॥ २२ ॥ समक्ख्ये । देव्व्याधियासन्दक्षिणयोरुचक्षसा ॥ मा
मऽआयुꣳप्प्रमोषीर्म्मोऽअहन्तवव्वीरंविदेयतवदेविसन्दृशि ॥ २३ ॥
[३] एषते । गायत्रोभागऽइतिमेसोमायब्रूतादेषतेत्रैष्टुभोभागऽइ

तिमेसोमायब्रूतादुपतेजागंतोभागऽइतिमेसोमायब्रूताच्छन्दोना
मानाꣳसाम्म्राज्ज्यङ्गच्छेतिमेसोमायब्रूतादास्म्माकोसिशुक्रस्ते
ग्ग्रहयोर्व्विचितंस्त्वाविचिन्वन्तु ॥२४॥ अभित्त्यम् ॥ अभित्त्यन्दे
वꣳसवितारम्मोण्योःकविक्क्रतुमर्च्चामिसत्त्यसंवꣳरत्नधामभिप्प्रि
यम्मतिङ्कविम् ॥ ऊर्द्ध्वायस्यामतिर्भाऽअदिद्द्युतत्त्सवीमनिहिरण्णय
पाणिरमिमीतसुक्क्रतुःकृपास्वः॥प्रजाब्भ्यस्त्वाप्प्रजास्त्वानुप्प्राणं
न्तुप्प्रजास्त्वमनुप्प्राणिहि ॥ २५ ॥[२] शुक्रन्त्वा । शुक्रेणक्क्रीणा

मिचन्द्रञ्चन्द्रेणामृतममृतेन ॥ सग्ग्मेतेगोरस्म्मेतेचन्द्राणितपस
स्तनूरसिप्प्रजापतेर्वर्ण्णः परमेणपशुनाक्क्रीयसेसहस्रपोषम्पुषेयम्
॥ २६ ॥ मित्रोनः ॥ मित्रोनऽएहिसुमित्रधऽइन्द्रस्योरुमावि
शदक्षिणमुशन्नुशन्तꣳस्योनःस्योनम् ॥ स्वानभ्राजाङ्घारेबम्भा
रेहस्तसुहस्तकृशानवेतेवःसोमक्रयणास्तान्रक्षध्वम्मावोदभन् ॥
॥२७॥ परिमा । ग्नेदुश्चरिताद्बाधस्वामासुचरितेभज ॥ उदायुषा
स्वायुषोदस्थाममृताँ२ऽअनु ॥२८॥ प्रतिपन्थाम् ॥ प्रतिपन्थामप

ह्महिस्वस्तिगामनेहसम् ॥ येनाव्विश्वाःपरिद्विषोव्वृणक्तिव्विन्दतेवसु
॥ २९ ॥ [४] अदित्यास्त्वक् ॥ अदित्यास्त्वगस्यदित्यैसदऽआसी
द ॥ अस्तभ्नाद्यांव्वृषभोऽअन्तरिक्षममिमीतव्वरिमाणम्पृथिव्याः ॥
आसीदद्विश्वाभुवनानिसम्राड्विश्वेत्तानिवरुणस्यव्रतानि ॥ ३० ॥
व्वनेषुव्वि ॥ व्वनेषुव्यन्तरिक्षन्ततानव्वाजमर्वत्सुपयऽउस्रियासु ॥
हृत्सुक्रतुंवरुणोव्विक्ष्वग्निन्दिविसूर्य्यमदधात्सोममद्रौ ॥ ३१ ॥
सूर्य्यस्यचक्षुः ॥ सूर्य्यस्यचक्षुरारोहाग्नेरक्ष्णःकनीनकम् ॥ यत्रै

तशेभिरीयंसेब्भ्राजंमानोव्विपश्चिता ॥ ३२ ॥ उस्रावेतम् ॥ उस्रा
वेतन्धूर्षाहौयुज्ज्येथामनश्श्रूऽअवीरहणौब्रह्मचोदनौ ॥ स्वस्तिय
जंमानस्यगृहान्गंच्छतम् ॥ ३३ ॥ भद्रोमे । सिप्प्रच्च्यवस्वभुवस्प
तेव्विश्वान्न्यभिधामांनि ॥ मात्त्वांपरिपरिणोव्विदन्मात्वांपरिपन्थि
नोव्विदन्मात्वावृकाऽअघायवोव्विदन् ॥ श्येनोभूत्वापरापतयजंमा
नस्यगृहान्गंच्छतन्नौसँस्कृतम् ॥३४॥ नमोमित्रस्य ॥ नमोमित्रस्यव
रुणस्यचक्षसेमहोदेवायतदृतꣳसपर्य्यत ॥ दूरे दृशेदेवजातायकेतवे

दिवस्पुत्त्रायसूर्य्यायशꣳसत ॥ ३५ ॥ व्वरुणस्योत्तम्भनमसि ॥ व्वरुणस्यो
त्तम्भनमसिव्वरुणस्यस्कम्भसर्ज्जनीस्त्थोव्वरुणस्यऽऋतसदन्न्यसिव्व
रुणस्यऽऋतसदनमसिव्वरुणस्यऽऋतसदनमासीद ॥ ३६ ॥ याते ॥ या
तेधामानिहविषायजन्तितातेव्विश्वापरिभूरस्तुयज्ञम् ॥ गयस्फा
नः प्रतरणः सुवीरोवीरहाप्प्रचरासोमदुर्य्यान् ॥ ३७ ॥ [८] इति
श्रीवाजसनेयसंहितायांचतुर्थोऽध्यायः ॥ ४ ॥ श्रीवेदपुरुषायनमः ॥
अनुवाक्सूत्रम् अग्नेस्तनू, रापतयेचतुष्कौ, तप्तायनीद्वे, इन्द्रघो

षस्तिस्रो, युंजतेष्टौ, देवस्यत्वाचतस्रो, देवस्यत्वापंच, विभूरसिचत
स्रो, ज्योतिरसिषड्डुरुविष्णोतिस्रो, दशात्रिचत्वारिंꣳशत्॥ हरिः ॐ
अग्नेस्तनूः ॥ अग्नेस्तनूरसिविष्ष्णवेत्त्वासोमस्यतनूरसिविष्ष्णवे
त्त्वातिथेरातिथ्यमसिविष्ष्णवेत्त्वाश्येनायत्त्वासोमभृतेविष्ष्णवे
त्त्वाग्नयेत्त्वारायस्पोषदेविष्ष्णवेत्त्वा ॥१॥ अग्नेर्ज्जनित्रम्॥ अग्ने
र्ज्जनित्रमसिवृषणौस्त्थऽउर्वश्यस्यायुरसिपुरूरवाऽअसि ॥ गायत्रे
णत्त्वाच्छन्दसामन्थामित्रैष्टुभेनत्त्वाच्छन्दसामन्थामिजागतेन

त्त्वाच्छन्दसामन्थामि ॥२॥ भवंतन्नः ॥ भवंतन्नःसमंनसौसचेतसा
वरेपसौ ॥ मायज्ञꣳहिꣳसिष्टम्मायज्ञपंतिञ्जातवेदसौशिवौभंवतम
द्यनंः ॥३॥ अग्नावग्निः ॥ अग्नावग्निश्चंरतिप्प्रविष्टऽऋषीणाम्पु
त्रोऽअंभिशस्तिपावां ॥ सनंःस्योनःसुयजांयजेहदेवेभ्योहव्यꣳ
सदमप्प्रंयुच्छन्त्स्वाहां ॥ ४ ॥ [४] आपंतयेत्त्वा ॥ आपंतयेत्त्वाप
रिपतयेगृह्णामितनूनप्त्रेशाक्करायशक्कंनऽओजिष्ठाय ॥ अनांधृष्ट
मस्यनाधृष्ष्यन्देवानामोजोनंभिशस्त्यभिशस्तिपाऽअंनभिशस्ते

न्न्यमञ्जसासुत्त्यमुपंगेषꣳस्वितेमाधाः॥५॥ अग्ग्नेव्व्रतपाः ॥ अग्ग्नेव्व्र
तपास्त्वेव्व्रतपायातवंतनूरियꣳसामयियोममंतनूरेषासात्वयि ॥ सु
हनौव्व्रतपतेव्व्रतान्न्यनुमेदीक्षान्दीक्षापतिर्म्मन्न्यंतामनुतपस्तपस्प्प
तिꣳ ॥६॥ अꣳशुरꣳशुष्टे । देवसोमाप्प्यायतामिन्द्रायैकधनविदे ॥
आतुब्भ्यमिन्द्रꣳप्प्यायंतामात्त्वमिन्द्रायप्प्यायस्व ॥ आप्प्याययास्
म्मान्त्सखीन्त्सन्न्यामेधयास्वस्तितेदेवसोमसुत्त्यामशीय ॥ एष्ट्टा
रायꣳप्प्रेषेभगायऽऋतमृतवादिब्भ्योनमोद्यावापृथिवीब्भ्याम्॥७॥

याते ॥ यातेऽअग्नेयःशयातनूर्वर्षिष्ठागह्वरेष्ठा ॥ उग्रंवचोऽअपाव
धीत्त्वेषंवचोअपावधीत्स्वाहा ॥ यातेऽअग्नेरजःशयातनूर्वर्षिष्ठा
गह्वरेष्ठा ॥ उग्रंवचोऽअपावधीत्त्वेषंवचोऽअपावधीत्स्वाहा ॥ या
तेऽअग्नेहरिशयातनूर्वर्षिष्ठागह्वरेष्ठा ॥ उग्रंवचोऽअपावधीत्त्वेषं
वचोऽअपावधीत्स्वाहा ॥ ८ ॥ [४] तप्तायनीमे ॥ तप्तायनीमे
ऽसिवित्तायनीमेस्यवतान्मानाथितादवतान्माव्यथितात् ॥ वि
देदग्निर्नभोनामाग्नेऽअङ्गिरऽआयुनानाम्नेहियोस्याम्पृथिव्या

संहि. मासियत्तेनांधृष्टन्नामंयज्ञियन्तेनत्त्वादंधेद्विदेदुग्निर्न्नभोनामाग्ने पू. अ.
॥३०॥ ऽअङ्गिरऽआयुंनानाम्नेहियोद्वितीयंस्याम्पृथिव्यामसियत्तेनांधृष्ट ॥५॥
न्नामंयज्ञियन्तेनत्त्वादंधेद्विदेदुग्निर्न्नभोनामाग्नेऽअङ्गिरऽआयुंना
नाम्नेहियस्तृतीयंस्याम्पृथिव्यामसियत्तेनांधृष्टन्नामंयज्ञियन्तेन
त्त्वादंधे ॥ अनुत्वादेववीतये ॥ ९ ॥ सिꣳहयसि ॥ सपत्नसाही
देवेभ्यंःकल्पस्वसिꣳहयसिसपत्नसाहीदेवेभ्यंःशुन्धस्वसिꣳ ॥३०॥
ह्यसिसपत्नसाहीदेवेभ्यंःशुम्भस्व ॥ १० ॥ [२] इन्द्रघोषस्त्वा॥

इन्द्रघोषस्त्वावसुभिꣳपुरस्तात्पातुप्रचेतास्त्वारुद्रैःपश्चात्पातुमनो
जवास्त्वापितृभिर्दक्षिणतःपातुविश्वकर्म्मात्वादित्यैरुत्तरतःपा
त्विदमहन्तप्तंवार्बहिर्द्धायज्ञान्निःसृजामि ॥ ११ ॥ सिꣳह्यसि ॥
सिꣳह्यसिस्वाहासिꣳह्यस्यादित्यवनिःस्वाहासिꣳह्यसिब्रह्मवनिः
क्षत्रवनिःस्वाहासिꣳह्यसिसुप्रजावनीरायस्पोषवनिःस्वाहासिꣳ
ह्यस्यावहदेवान्यजमानायस्वाहाभूतेभ्यस्त्वा ॥ १२ ॥ ध्रुवोसि ।
पृथिवीन्दृꣳहध्रुवक्षिदस्यन्तरिक्षन्दृꣳहाच्युतक्षिदसिदिवन्दृꣳह

ग्ग्नेश्पुरीषमसि ॥ १३ ॥ [३] युञ्जतेमनं÷ ॥ युञ्जतेमनंऽउत
युञ्जतेधियोव्विप्राव्विप्प्रंस्यबृहतोव्विपश्चितं÷ ॥ व्विहोत्त्रांदधेव्वयुनाव्वि
देकऽइन्मुहीदेवस्यंसवितुश्परिंष्टुतिꣳस्वाहा ॥ १४॥ इदंव्विष्णुं÷ ॥
इदंविष्णुर्व्विचंक्क्रमेत्त्रेधानिदंधेपुदम् ॥ समूंढमस्यपाꣳसुरेस्वाहा
॥ १५ ॥ इरावतीधेनुमती ॥ इरावतीधेनुमतीहिभूतꣳसूंयवसिनी
मनंवेदशस्या ॥ व्यंस्क्कभ्नारोदंसीव्विष्णवेतेदाधर्त्थंपृथिवीमभि
तोमयूखैꣳस्वाहा ॥ १६ ॥ देवश्श्रुतौदेवेषु ॥ देवश्श्रुतौदेवेष्वाघो

षतम्प्राचीप्प्रेतमद्ध्वरङ्कल्पयन्तीऽऊर्द्धंव्यज्ञन्नयतम्माजिह्वरतम् ॥
स्वङ्गोष्ठमावदतन्देवीदुर्य्येऽआयुर्म्मानिर्वोदिष्टम्प्रजाम्मानिर्वोदि
ष्टमत्त्ररमेथांवर्ष्मन्पृथिव्याः ॥ १७ ॥ व्विष्णोर्न्नु । कंव्वी
र्य्याणिप्प्रवोचंय्यःपार्थिवानिव्विममेरजाᳬंसि ॥ योऽअस्कभा
यदुत्तरᳬंसधस्थंव्विचक्रमाणस्त्रेधोरुगायोव्विष्णवेत्वा ॥ १८ ॥
दिवोवा । व्विष्णऽउतवापृथिव्यामहोवाव्विष्णऽउरोरन्तरिक्षात् ॥
उभाहिहस्तावसुनापृणस्वाप्प्रयच्छदक्षिणादोतसव्याद्विष्णवेत्त्वा

॥ १९ ॥ प्रतत् ॥ प्रतद्विष्णुंस्तवतेवी॒र्ये॑णमृ॒गोनभी॒मःकु॑च॒रोगि
रि॒ष्ठाः ॥ यस्यो॒रुषु॑त्रि॒षुवि॒क्रम॑णेष्वधिक्षि॒यन्ति॒भुव॑नानि॒विश्वा॑
॥ २० ॥ विष्णो॒ररा॒टम् ॥ विष्णो॒ररा॒टम॑सि॒विष्णोः॒श्नप्त्रे॒स्थो॒
विष्णोः॒स्यूर॑सि॒विष्णो॑र्ध्रु॒वो॑सि ॥ वै॒ष्ण॒वम॑सि॒विष्ण॑वेत्त्वा ॥
२१ ॥ [८] दे॒वस्य॑त्त्वा । स॒वि॒तुःप्र॑स॒वे॒ऽश्विनो॑र्बा॒हुभ्या॑म्पू॒ष्णोह
स्ता॑भ्याम् ॥ आद॑दे॒नार्य॑सी॒दम॒हꣳरक्ष॑सा॒ग्री॒वाऽअपि॑कृन्तामि ॥ ॥३२॥
बृ॒हन्न॑सिबृ॒हद्र॑वाबृ॒ह॒तीमिन्द्रा॑यवा॒चं॑वद ॥ २२ ॥ र॒क्षो॒ह॒णं॑वलग॒ह

नम ॥ रक्षोहणंवलगहनंवैष्णवीमिदमहन्तंवंलगमुत्किरामियम्मे
निष्ट्योयममात्यौनिचखानेदमहन्तंवंलगमुत्किरामियम्मेसमा
नोयमसंमानोनिचखानेदमहन्तंवंलगमुत्किरामियम्मेसबंधुर्यम
संबन्धुर्निचखानेदमहन्तंवंलगमुत्किरामियम्मेसजातोयमसंजा
तोनिचखानोत्कृत्याङ्किरामि ॥२३॥ स्वराडंसि । सपत्नहासंत्रंरा
डंस्यभिमातिहाजंनराडंसिरक्षोहासंर्व्वराडंस्यमित्रहा ॥२४॥ रक्षोह
णोवः ॥ रक्षोहणोवोवलगहनंप्प्रोक्षामिवैष्णवान्रंक्षोहणोवोवल

संहि· पू. अ.
॥३३॥ ॥ ५ ॥

गहनोवंनयामिवैष्ष्णवान्रक्षोहणौवोवलगहनोवंस्तृणामिवैष्ष्णव
वान्रक्षोहणौवांवलगहनाऽउपदधामिवैष्ष्णवीरक्षोहणौवांवलगह
नौपर्य्यूहामिवैष्ष्णवीवैष्ष्णवमसिवैष्ष्णवास्त्थ ॥२५॥ [४] देवस्य
त्त्वा । सवितुःप्प्रसवेश्विनोर्बाहुब्भ्याम्पूष्ष्णोहस्ताब्भ्याम् ॥ आ
ददेनार्य्यसीदमहꣳरक्षसाङ्ग्रीवाऽअपिकृन्तामि ॥ यवोसियवया
स्म्मद्द्वेषोयवयारातीर्द्दिवेत्त्वान्तरिक्षायत्त्वापृथिव्यैत्त्वाशुन्धन्ताँ ॥३३॥
ल्लोकाःपितृषदनाःपितृषदनमसि ॥ २६ ॥ उद्दिवम् ॥ उद्दिवꣳस्त

भानान्तरिक्षम्पृणदृ॑ꣳहस्वपृथिव्यान्द्युंतानस्त्वांमारुतोमिंनोतुमि
त्रावरुंणौध्रुवेणधर्म्मणा ॥ ब्रह्मवनिंत्वाक्षत्रवनिंरायस्पोषवनिंप
र्य्यूंहामि ॥ ब्रह्मंदृꣳहक्षत्रन्दृꣳहायुर्दृꣳहप्रजान्दृꣳह ॥ २७ ॥ ध्रु
वासिं । ध्रुवोयंय्यजंमानोस्मिन्नायतनेप्रजयांपशुभिंर्भूयात् ॥
घृतेनंद्यावापृथिवीपूर्य्येंथामिन्द्रंस्यच्छदिरंसिविश्वजनस्यंच्छाया
॥ २८ ॥ परित्वा । गिर्व्वणोगिरंऽइमाभंवन्तुविश्वतंः ॥ वृद्धायुमनु
वृद्धंयोजुष्टाभवन्तुजुष्टंयः ॥ २९ ॥ इन्द्रंस्यस्यूः ॥ इन्द्रंस्यस्यूरसी

न्द्रस्यध्ध्रुवोसि॥ ऐन्द्रमसिवैश्वदेवमसि॥ ३०॥ [५] विभूरसि।
प्प्रवाहणोवह्निरसिहव्यवाहनः॥ श्वात्रोसिप्प्रचेतास्तुथोसिविश्व
वेदाऽउशिगसि॥ ३१॥ उशिगसि। कविरङ्घारिरसिबम्भारिरव
स्यूरसिदुवस्वाञ्छुन्ध्यूरसिमार्ज्जालीयः सम्म्राडसिकृशानुः परिष
द्द्योसिपवमानोनभोसिप्प्रतक्क्वामृष्टोसिहव्यसूदनऽऋतधामासिस्व
र्ज्ज्योतिः समुद्रोसि॥ ३२॥ समुद्रोसि। विश्वव्यचाऽअजोस्येकपा
दहिरसिबुध्न्योवागस्यैन्द्रमसिसदोस्यृतस्यद्वारौमामासन्ताप्तमध्ध्व

नामद्ध्वपतेप्प्रमातिरस्वस्तिमेस्मिन्पथिदेवयानेभूयान्मित्रस्यमा
॥ ३३ ॥ मित्रस्यमा । चक्षुषेक्षद्ध्वमग्ग्नयऽसगराऽसगरास्त्थसगरेण
नाम्म्नारौद्द्रेणानीकेनपातमाग्ग्नयःपिपृतमाग्ग्नयोगोपायतमानमो
वोस्तुमामाहिꣳसिष्ट ॥ ३४ ॥ [४] ज्योतिरसि ॥ विश्श्वरूपंविश्श्वेषा
न्देवानाꣳसमित् ॥ त्वꣳसोमतनूकृद्भ्योद्द्वेषोभ्योन्न्यकृतेभ्यऽउरुय
न्तासिवरूथꣳस्वाहाजुषाणोऽअप्तुराज्यस्यवेतुस्वाहा ॥ ३५ ॥ शत
म् २०० ॥ अग्ग्नेनय । सुपथारायेऽअस्म्मान्विश्श्वानिदेववयुनानिवि

द्धान् ॥ सुयोद्धुंयस्म्मज्जुंहुराणमेनोभूयिंष्ठान्तेनमंऽउक्तिंविधेम
॥ ३६ ॥ अयन्नं ॥ अयन्नोऽअग्निर्व्वरिवस्कृणोत्त्वयम्मृधं पुरएं
तुप्प्रभिन्दन् ॥ अयंव्वाजांञ्जयतुव्वाजंसातावयꣳशत्रूञ्जयतुजर्हृषा
णꣳस्वाहा ॥ ३७॥ उरुव्विंष्णोविक्क्रमस्वोरुक्षयायनस्कृधि ॥ घृतं
घृंतयोनेपिबप्प्रप्प्रंयुज्ञपंतिन्तिरस्वाहा ॥ ३८ ॥ देवंसवितꣳ ॥ दे
वंसवितरेषतेसोमस्तꣳरंक्षस्वमात्वादभन् ॥ एतत्वन्देवसोमदेवो
देवाँ२ऽउपागाऽइदमहम्मंनुष्ष्यान्त्सहरायप्पोषेणस्वाहानिर्व्वरुं

णस्यपाशान्मुक्ष्ये ॥३९॥ अग्नेव्व्रतपाः ॥ अग्नेव्व्रतपास्त्वेव्व्रतपाया
तवतनूर्म्मय्यभूदेषासात्वयियोममतनूस्त्वय्यभूदियꣳसामयि ॥
यथायथन्नौव्व्रतपतेव्व्रतान्न्यनुमेदीक्षान्दीक्षापतिरमꣳस्तानुतपस्त
पस्प्पातिः ॥ ४० ॥ [६] उरुव्विष्णो ॥ उरुव्विष्णोविक्क्रमस्वोरुक्षया
यनस्कृधि ॥ घृतङ्घृतयोनेपिबप्प्रप्प्रय्यज्ञपतिन्तरस्वाहा ॥ ४१ ॥ अ
त्यन्न्यान् ॥ अत्त्यन्न्याँ२ऽअगान्नान्न्याँ२ऽउपागामर्व्वाक्त्वापरेब्भ्यो
विदम्परोवरेब्भ्यः ॥ तन्त्वाजुषामहेदेवव्वनस्प्पतेदेवयज्ज्यायैदेवा

स्त्वान्देवयुज्ज्यायैजुषन्तांविष्ण्णंवेत्त्वा ॥ ओषधेत्रायस्वस्वधितेमै
नꣳहिꣳसीः ॥४२॥ द्याम्मा ॥ द्याम्मालेखीरन्तरिक्षम्माहिꣳसीःपृ
थिव्यासम्भव ॥ अयꣳहित्वास्वधितिस्तेतिजानःप्प्रणिनायंमह
तेसौभगाय ॥ अतस्त्वन्देववनस्प्पतेशतवल्शोविरोहसहस्रवल्
शाविवयꣳरुहेम ॥ ४३ ॥ [३] १० ॥ इतिश्रीवाजसनेयसंहिता
यांपंचमोऽध्यायः ॥ ५ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम्
देवस्यत्त्वाषडुपावीरसिपंचमाहिःषट्संतेतिस्रःसमुद्रंगच्छहविष्म

तीर्द्धिकौहृदेत्वापंचदेवस्यत्वाष्टौसप्तत्रिꣳशत् ॥ हरिः ॐ देवस्यत्वा ।
सवितुःप्प्रसवेश्विनोर्ब्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ आददेनार्य्य
सीदमहꣳरक्षसाङ्ग्रीवाऽअपिकृन्तामि ॥ यवोसियवयास्म्मद्द्वेषोयव
यारातीर्द्दिवेत्त्वान्तरिक्षायत्त्वापृथिव्यैत्त्वाशुन्धन्ताँल्लोकाःपितृष
दनाःपितृषदनमसि ॥ १ ॥ अग्ग्रेणीरसि । स्वावेशऽउन्नेतॄणामेत
स्यवित्तादधित्वास्थास्यतिदेवस्त्वासवितामद्ध्वानक्तुसुपिप्पलाभ्य
स्त्वौषधीभ्यः ॥ द्यामग्ग्रेणास्पृक्षऽआन्तरिक्षम्मद्ध्येनाप्प्राः पृथि

वीमुपरेणाद्दꣳहीः ॥ २ ॥ याते ॥ यातेधामान्युश्म्मसिगमद्ध्यैयत्र
गावोभूरिशृङ्गाअयासः ॥ अत्राहतदुरुगायस्यविष्णोःपरमम्प
दमवभारिभूरि ॥ ब्रह्मवनिंत्त्वाक्षत्रवनिंरायस्पोषवनिपर्य्यूहा
मि ॥ ब्रह्मदृꣳहक्षत्रन्दृꣳहायुर्द्दृꣳहप्प्रजान्दृꣳह ॥ ३ ॥ विष्णोः
कर्म्माणि । पश्यतयतोव्रतानिपस्पशे ॥ इन्द्रस्ययुज्ज्यःसखा ॥४॥
तद्विष्णोः । परमम्पदꣳसदापश्यन्तिसूरयः ॥ दिवीवचक्षुरातत
म् ॥ ५ ॥ परिवीरसि ॥ परिवीरसिपरित्त्वादैवीर्विशोव्ययन्ताम्परी

मंय्यजंमानन्द्ग्रायोमनुष्प्याणाम् ॥ दिवःसूनुरंस्येषतेपृथिव्यॉल्लो
कऽआरण्यस्तेपशुः ॥ ६ ॥ [६] उपावीरसि ॥ उपावीरस्युपदेवा
न्दैवीर्विशःप्प्रागुरुशिजोवह्निंहितमान् ॥ देवंत्वष्टर्वसुरमहव्यातेस्व
दन्ताम् ॥ ७ ॥ रेवंतीरमंद्धम् ॥ रेवंतीरमंद्धम्बृहंस्प्पतेधारयावसू
नि ॥ ऋतस्यंत्त्वादेवहविःपाशेनप्प्रतिमुञ्चामिधर्षामानुषः ॥ ८ ॥
देवस्यंत्त्वा । सवितुःप्प्रसवेश्विनोर्बाहुब्भ्यांम्पूष्णोहस्ताब्भ्याम् ॥
अग्नीषोमाब्भ्याञ्जुष्टन्नियुनज्मि ॥ अद्भ्यस्त्वौषधीब्भ्योनुत्त्वा

मातामन्न्यतामनुपितानुब्भ्रातासगर्ब्भ्योनुसखासयूत्थ्यः ॥ अ
ग्नीषोमाब्भ्यान्त्वाजुष्टम्प्रोक्षामि ॥ ९ ॥ अपाम्पेरुः ॥ अपाम्पेरु
रस्यापोदेवीःस्वदन्तुस्वात्तञ्चित्सद्देवहविः ॥ सन्तेप्प्राणोव्वातेनग
च्छताꣳसमङ्गानियजत्त्रैःसंय्यज्ञपतिराशिषा ॥ १० ॥ घृतेनाक्तौ ।
पशूँस्त्रायेथाꣳरेवतियजमानेप्प्रियन्धाऽआविश ॥ उरोरन्तरिक्षा
त्सजूर्द्देवेनव्वातेनास्यहविषस्त्मनायजसमस्यतन्न्वाभव ॥ वर्षोव्वर्षी
यसियज्ञेयज्ञपतिन्धाःस्वाहादेवेब्भ्योदेवेब्भ्यःस्वाहा ॥ ११ ॥ [५]

माहिं॑ ॥ माहिर्भूर्म्मापृदाकुर्न्नमस्तऽआतानानर्व्वाप्प्रेहि ॥ घृतस्य॑
कुल्याऽउपऽऋतस्य॒पत्थ्याऽअनु ॥ १२ ॥ देवीरापः । शुद्धावोढ्ढ॑
सुपरिविष्टादेवेषुसुपरिविष्टावयम्परिवेष्टारोभूयास्म्म ॥ १३ ॥ व्वा
चंन्ते ॥ व्वाचन्तेशुन्धामिप्प्राणन्तेशुन्धामिचक्षुस्तेशुन्धामिश्श्रोत्र
न्तेशुन्धामिनाभिन्तेशुन्धामिमेढ्रन्ते शुन्धामिपायुन्तेशुन्धामि
चरित्रांस्तेशुन्धामि ॥ १४ ॥ मनस्ते ॥ मनस्तऽआप्प्यायता
व्वाक्तऽआप्प्यायताम्प्राणस्तऽआप्प्यायताञ्चक्षुस्तऽआप्प्यायता॑ं

श्रोत्रन्तऽआप्प्यायताम् ॥ यत्तेक्रूरंयदास्त्थितन्तत्तऽआप्प्यायता
न्निष्ट्यायतान्तत्तेशुध्यतुशमहोभ्यः ॥ ओषधेत्रायस्वस्वधितेमैनꣳ
हिꣳसीः ॥ १५ ॥ रक्षसाम्भागः ॥ रक्षसाम्भागोसिनिरस्तꣳरक्षऽ
इदमहꣳरक्षोभितिष्ठामीदमहꣳरक्षोवबाधऽइदमहꣳरक्षोधमन्तमो
नयामि ॥ घृतेनद्यावापृथिवीप्प्रोर्णुवाथांवायोवेस्तोकानामग्नि
राज्यस्यवेतुस्वाहास्वाहाकृतेऽऊर्ध्वनभसम्मारुतङ्गच्छतम् ॥ १६ ॥
इदमापः ॥ इदमापःप्प्रवहतावद्यञ्चमलंचयत् ॥ यच्चाभिदुद्द्रोहान्

तुंच्यच्चशेपेऽअभीरुणम् ॥ आपोमातस्मादेनसःपवमानश्चमुञ्च
तु ॥ १७ ॥ [६] सन्ते ॥ सन्तेमनोमनसासम्प्राणःप्प्राणेनगच्छता
म् ॥ रेडस्यग्निष्ट्वाश्श्रीणात्वापस्त्वासमरिणन्वातस्यत्वाध्ध्राज्यैपू
ष्णोरंह्याऽऊष्ष्मणोव्यथिषत्प्रयुतन्द्वेषः ॥ १८ ॥ घृतङ्घृतपावा
नः ॥ घृतङ्घृतपावानःपिबतव्वसांव्वसापावानःपिबतान्तरिक्षस्यह
विरसिस्वाहा ॥ दिशःप्रदिशऽआदिशोव्विदिशऽउद्दिशोदिग्ग्भ्यः
स्वाहा ॥ १९ ॥ ऐन्द्रःप्प्राणः ॥ ऐन्द्रःप्प्राणोऽअङ्गेऽअङ्गेनिदी

ध्यदैन्द्रऽउदानोऽअङ्गेऽअङ्गेनिधीतः ॥ देवत्वष्टर्भूरितेसꣳसमे
तुसलक्ष्मायद्विषुरूपम्भवाति ॥ देवत्रायन्तमवसेसखायोनुत्वा
मातापितरोमदन्तु ॥ २० ॥ [३] समुद्रङ्गच्छ ॥ समुद्रङ्गच्छस्वा
हान्तरिक्षङ्गच्छस्वाहादेवꣳसवितारङ्गच्छस्वाहामित्रावरुणौगच्छ
स्वाहाहोरात्रेगच्छस्वाहाच्छन्दाꣳसिगच्छस्वाहाद्यावापृथिवीग
च्छस्वाहायज्ञङ्गच्छस्वाहासोमङ्गच्छस्वाहादिव्यन्नभोगच्छस्वा
हाग्निंवैश्वानरङ्गच्छस्वाहामनोमेहार्दियच्छदिवन्तेधूमोगच्छतु

स्वृज्ज्योतिः पृथिवीम्भस्म्मनापृणस्वाहा ॥ २१ ॥ मापं ६ ॥ मापोमौष
धीर्हिꣳसीर्द्धाम्न्नोधाम्न्नोराजँस्ततोव्वरुणनोमुञ्च ॥ यदाहुरग्घ्न्याऽ
इतिव्वरुणेतिशपामहेततोव्वरुणनोमुञ्च ॥ सुमित्रियानऽआपऽओ
षधयꣳसन्तुदुर्म्मित्रियास्तस्म्मैसन्तुयोस्म्मान्द्वेष्टियञ्चव्वयन्द्वि
ष्म्मः ॥ २२ ॥ [२] हविष्म्मतीरिमाः ॥ हविष्म्मतीरिमाऽआपो
हविष्म्माँ२ऽआविवासति ॥ हविष्म्मान्देवोऽअद्ध्वरोहविष्म्माँऽ
अस्तुसूर्य्यः ॥ २३ ॥ अग्नेर्व्वः ॥ अग्नेर्वोपन्नगृहस्यसदसिसाद

संहि. ॥४१॥

यामीन्द्राग्ग्न्योर्ब्भागधेयीस्त्थमित्रावरुणयोर्ब्भागधेयीस्त्थव्विश्श्वे
षान्देवानाम्भागधेयीस्त्थ ॥ अमूर्ज्जाऽउपसूर्य्येयाभिर्व्वासूर्य्यः
सह ॥ तानोहिन्न्वन्त्वद्धरम् ॥ २४ ॥ [२] हृदेत्त्वामनसेत्त्वादि
वेत्त्वासूर्य्यायत्त्वा ॥ ऊर्द्ध्वमिममद्धरन्दिविदेवेषुहोत्त्रायच्छ ॥
॥ २५ ॥ सोमराजन् ॥ सोमराजन्विश्श्वास्त्वम्प्रजाऽउपावरोहव्वि
श्श्वास्त्वाम्प्रजाऽउपावरोहन्तु ॥ शृणोत्वग्ग्निस्समिधाहवम्मेशृण्णव
न्त्वापोधिषणाश्चदेवीः ॥ श्रोताग्ग्रावाणोव्विदुषोनयज्ञꣳशृणोतुदे

पू. अ.
॥ ६ ॥
॥४१॥

वश्सविताहवम्मेस्वाहा॥२६॥ देवीरापः॥ देवीरापोऽअपान्नपाद्योवं
ऽऊर्म्मिर्हविष्यऽइन्द्रियावान्मदिन्तमः॥ तन्देवेब्भ्योदेवत्राद्त्त
शुक्रपेब्भ्योयेषाम्भागस्थस्वाहा॥२७॥ कार्षिरसि॥ कार्षिरसिस
मुद्रस्यत्त्वाक्षित्त्याऽउन्नयामि॥ समापोऽअद्भिरग्ग्मतसमोषधीभि
रोषधीः॥२८॥ यमग्ग्ने॥ यमग्ग्नेपृत्सुमर्त्त्यमवाव्वाजेषुयञ्जुनाः॥
सयन्ताशश्वतीरिषःस्वाहा॥२९॥[५]देवस्यत्त्वा॥ देवस्यत्त्वा
सवितुःप्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम्॥ आददेरावा

सिगभीरमिममध्वरङ्कृधीन्द्रायसुषूतमम् ॥ उत्तमेनपविनोर्ज्जस्व
न्तम्मधुमन्तम्पयस्वन्तंनिग्ग्राभ्यास्त्थदेवश्श्रुतस्तर्प्पयतमामनो
मे ॥ ३० ॥ मनोमे । तर्प्पयतवाचम्मेतर्प्पयतप्प्राणम्मेतर्प्पयतच
क्षुर्म्मेतर्प्पयतश्श्रोत्रम्मेतर्प्पयतात्मानम्मेतर्प्पयतप्प्रजाम्मेतर्प्पय
तपशून्मेतर्प्पयतगणान्मेतर्प्पयतगणामेमावितृषन् ॥ ३१ ॥ इन्द्रा
यत्त्वा ॥ इन्द्रायत्त्वावसुमतेरुद्रवतऽइन्द्रायत्त्वादित्यवतऽइन्द्राय
त्वाभिमातिग्घ्ने ॥ श्येनायत्त्वासोमभृतेग्ग्नयेत्त्वारायस्प्पोषदे ॥

॥३२॥ यत्ते । सोमदिविज्ज्योतिर्य्यत्पृथिव्यांय्यदुरावन्तरिक्षे ॥ ते
नास्मैयजमानायोरुरायेकृध्यधिदात्रेवोचः ॥ ३३ ॥ श्वात्रास्त्थ ॥
श्वात्रास्त्थवृत्रतुरोराधोगूर्त्ताऽअमृतस्यपत्नीः ॥ तादेवीर्द्देवत्रेमं
य्यज्ञन्नयतोपहूताःसोमस्यपिबत ॥ ३४ ॥ माभेः ॥ माभेर्म्मासंव्वि
क्थाऽऊर्ज्जन्धत्स्वधिषणेव्वीड्वीसतीव्वीडयेथामूर्ज्जन्दधाथाम् ॥ पा
प्माहतोनसोमः ॥३५॥ प्रागपाक् ॥ प्रागपागुदगधराक्सर्व्वतस्त्वा
दिशआधावन्तु ॥ अम्बनिष्प्परसमरीर्व्विदाम् ॥ ३६॥ त्वमङ्ग ॥त्वम्

ङ्ग्प्रशꣳसिषोदेवꣳशविष्ठमर्त्त्यम् ॥ नत्त्वदन्न्योमघवन्नास्तिमर्डितेन्द्रब्रवीमितेवचः॥३७॥ ॥८॥ इतिश्रीवाजसनेयसंहितायांषष्ठोऽध्यायः।६। श्रीवेदपुरुषायनमः॥अनुवाक्सूत्रम्। वाचस्पतयउपयामगृहीतोसित्रिकावावायोयंवाद्विकोयस्तएकाप्राणायतिस्रोमघवइंद्राग्नीआगतमाद्यौमासश्चर्षणीधृतोविश्वेदेवासऽआगतेंद्रमरुत्वोमरुत्वंतंवृषभंमरुत्वांतौजसेसजोषाइंद्रमरुत्वाँ२ इंद्रमहाँ२ इंद्रोमहाँ२इंद्रएकैकोदुत्यमष्टौपंचविꣳशतिरष्टाचत्वारिꣳशत् ॥ हरिःॐ

॥४३॥

वाचस्पतये ॥ वाचस्पतयेपवस्ववृष्णोऽअꣳशुभ्याङ्गभस्तिपू
तः ॥ देवोदेवेभ्यः पवस्वयेषाम्भागोसि ॥१॥ मधुमतीर्नः ॥ मधु
मतीर्नऽइषस्कृधियत्तेसोमादाभ्यन्नामजागृवितस्मैतेसोमसो
मायस्वाहास्वाहोर्वन्तरिक्षमन्वेमिस्वाङ्कृतोसि ॥ २ ॥ स्वाङ्कृतोसि ।
विश्वेभ्यऽइन्द्रियेभ्योदिव्येभ्यः पार्थिवेभ्योमनस्त्वाष्टुस्वाहा
त्वासुभवसूर्य्यायदेवेभ्यस्त्वामरीचिपेभ्योदेवाꣳशोयस्मैत्वे
डेतत्सत्यमुपरिप्लुताभङ्गेनहतोसौफट्प्राणायत्वाव्यानायत्वा ॥

॥ ३ ॥ [३] उपयामगृहीतोसि ॥ उपयामगृहीतोस्यन्तर्यच्छ
मघवन्पाहिसोमम् ॥ उरुष्यरायऽएषोयजस्व ॥ ४ ॥ अन्तस्ते ॥
अन्तस्तेद्यावापृथिवीदधाम्म्यन्तर्दधाम्म्युर्व्वन्तरिक्षम् ॥ सजूर्देवे
भिरवरैःपरैश्चान्तर्यामेमघवन्मादयस्व ॥ ५ ॥ स्वाङ्कृतोसि ॥
स्वाङ्कृतोसिविश्वेब्भ्यऽइन्द्रियेब्भ्योदिव्येब्भ्यः पार्थिवेब्भ्योम
नस्त्वाष्टुस्वाहात्वासुभवसूर्य्यायदेवेब्भ्यस्त्वामरीचिपेब्भ्यऽउदा
नायत्त्वा ॥ ६ ॥ [३] आवायो ॥ आवायोभूषशुचिपाऽउपनःसह

स्त्रन्तेनियुतोविश्ववार ॥ उपोते॑ऽअन्धोमद्यमयामियस्यदेववदाधि
षेपूर्व्वपेयंव्वायवेत्त्वा ॥ ७ ॥ इन्द्रवायूऽइमे । सुताऽउपप्रयोभिरागं
तम् ॥ इन्दवोवामुशन्तिहि ॥ उपयामगृहीतोसिव्वायवऽइन्द्रवायु
भ्यान्त्वैषतेयोनिः सजोषोभ्यान्त्वा ॥८॥ [२] अयंव्वाम् ॥ अयं
व्वाम्मित्रावरुणासुतश्सोमऽऋतावृधा ॥ ममेदिहश्रुतहवम् ॥ उप
यामगृहीतोसिमित्रावरुणाभ्यान्त्वा ॥ ९ ॥ रायाव्वयम् ॥ रायाव्व
यꣳ संसवाꣳसोमदेमहव्येनदेवायवसेनगावः ॥ तान्धेनुम्मित्राव

रुणायुवर्चोविश्वाहांधत्तुमनंपस्फुरन्तीमेषतेयोनिर्ऋतायुभ्यां
न्त्वा ॥ १० ॥ [२] यावांम् ॥ यावाङ्कशामधुमत्त्यश्विनासूनृतां
वती ॥ तयांयुज्ञम्मिमिक्षतम् ॥ उपयामगृहीतोस्यश्विभ्यान्त्वै
षतेयोनिर्म्माध्वीभ्यान्त्वा ॥ ११ ॥ [१] तम्प्रत्नथां । पूर्वथांवि
श्वथेमथांज्ज्येष्ठतांतिम्बर्हिषदंᳩस्वर्विदम् ॥ प्रतीचीनंवृजनन्दो
हसेधुनिमाशुञ्जयंन्तमनुयासुवर्द्धसे ॥ उपयामगृहीतोसिशण्डांय
त्वैषतेयोनिर्वीरतांम्पाह्यपंमृष्टुःशण्डोदेवास्त्वांशुक्रपाःप्प्रणंय

न्त्वनांधृष्टासि ॥ १२ ॥ सुवीरोंवीरान् ॥ सुवीरोंवीरान्प्रंजनयन्परी
ह्यभिरायस्पोषैणयजमानम् ॥ सञ्जग्मानोदिवापृथिव्याशुक्रः
शुक्रशौचिषानिरस्तःशण्डःशुक्रस्याधिष्ठानंमसि ॥ १३ ॥ अच्छि
न्नस्यते । देवसोमसुवीर्य्यस्यरायस्पोषस्यदादितारःस्याम ॥ सा
प्प्रथमासंस्कृतिर्विश्ववारासप्प्रथमोवरुणोमित्रोऽअग्निः ॥ १४ ॥
सप्प्रथमः ॥ सप्प्रथमोबृहस्पतिश्चिकित्वाँस्तस्माऽइन्द्रायसुत
माजुहोतस्वाहा ॥ तृम्पन्तुहोत्रामध्वोयाःस्विष्टायाःसुप्प्रीताःसु

हुंतायत्स्वाहायांऽग्नीत् ॥ १५ ॥ [४] अयंवेनऽ ॥ अयंवेनश्चोंद
यत्पृश्निगर्भांज्योतिर्ज्जरायुरजंसोविमानें ॥ इममपाᳬसङ्गमेसू
र्य्यंस्यशिशुन्नविप्प्रांमतिभींरिहन्ति ॥ उपयामगृंहीतोसिमर्क्कांय
त्वा ॥ १६ ॥ मनोन। येषुहवंनेषुतिग्ग्मंविपऽशच्च्यावनुथोद्द्रवंन्ता ॥
आयश्शर्य्यांभिस्तुविनृम्म्णोऽअस्याश्श्रींणीतादिशङ्गभंस्तावेषते
योनिःप्प्रजाश्पाह्यपमृष्टोमर्क्कोदेवास्त्वांमान्थिपाश्प्प्रणंयन्त्वनां
धृष्टासि ॥ १७॥ सुप्प्रजाश्प्प्रजाश्प्प्रंजनयन्न्परींह्याभिरायस्प्पोषेंण

यजमानम् ॥ सुञ्ज्ग्म्मानोदिवापृथिव्यामुन्थीमुन्थिशौचिषानिरं
स्तोमकौमुन्थिनोधिष्ठानमासि ॥१८॥ [३] येदेवासऽ ॥ येदेवासो
दिव्येकादशस्त्थपृथिव्यामुद्ध्येकादशस्त्थ ॥ अप्प्सुक्षितोमाहिनै
कादशस्त्थतेदेवासोयज्ञमिमञ्जुषद्ध्वम् ॥ १९ ॥ उपयामगृहीतो
सि ॥ उपयामगृहीतोस्याग्ग्रयणोसिस्वाग्ग्रयणऽपाहियज्ञम्पाहि
यज्ञपतिंव्विष्ष्णुस्त्वामिन्द्रियेर्णपातुव्विष्ष्णुन्त्वम्पाह्यभिसवनानि
पाहि ॥ २० ॥ सोमः पवते ॥ सोमः पवतेसोमः पवतेस्म्मैब्रह्मं

संहि. णेस्म्मैक्षत्त्रायास्म्मैसुन्न्वतेयजमानायपतऽइषऽऊर्ज्जंपवतेद्भ्यऽओष पू. अ.
॥४७॥ धीब्भ्यꣳपवतेद्यावापृथिवीब्भ्याम्पवतेसुभूतायपवतेविश्श्वेब्भ्यस्त्वा ॥ ७ ॥
देवेब्भ्यंऽएषतेयोनिर्विश्श्वेब्भ्यस्त्वादेवेब्भ्यः ॥ २१ ॥ [३] उप
यामगृहीतोसि । उपयामगृहीतोसीन्द्रायत्वाबृहद्वतेवयस्वतऽउ
क्थाव्ययङ्गृह्णामि ॥ यत्तऽइन्द्रबृहद्वयस्तस्म्मैत्वाविष्णवेत्त्वैषतेयो
निरुक्थेब्भ्यंस्त्वादेवेब्भ्यंस्त्वादेवाव्यंय्यज्ञस्यायुषेगृह्णामिमित्राव ॥४७॥
रुणाब्भ्यान्त्वा ॥ २२ ॥ मित्रावरुणाब्भ्यान्त्वा । देवाव्यंय्यज्ञ

स्यायुंषेगृह्णामीन्द्रायत्वादेवाव्यंस्ययज्ञस्यायुंषेगृह्णामीन्द्राग्निभ्या
न्त्वादेवाव्यंस्ययज्ञस्यायुंषेगृह्णामीन्द्रावरुणाभ्यान्त्वादेवाव्यंस्य
ज्ञस्यायुंषेगृह्णामीन्द्राबृहस्पतिभ्यान्त्वादेवाव्यंस्ययज्ञस्यायुंषेगृ
ह्णामीन्द्राविष्णुभ्यान्त्वादेवाव्यंस्ययज्ञस्यायुंषेगृह्णामि ॥ २३ ॥
[२] मूर्द्धानंन्दिवः ॥ मूर्द्धानंन्दिवोऽअरतिम्पृथिव्यावैश्वानरमृत
ऽआजातमग्निम् ॥ कविꣳसम्राजमतिथिञ्जनानामासन्नापात्रं
ञ्जनयन्तदेवाः ॥२४॥ उपयामगृहीतोसि ॥ ध्रुवोसिध्रुवक्षितिर्ध्रुवा

णान्ध्रुवतमोच्युतानामच्युतक्षित्तमऽएषतेयोनिर्वैश्वानुरायत्त्वा ॥
ध्रुवन्ध्रुवेणमनसाव्वाचासोममवनयामि ॥ अथानुऽइन्द्रइद्विशोस
पत्नाःसमनसुस्करत् ॥२५॥ [२] यस्ते । द्रप्सस्कन्दतियस्तेऽअ‌ु
शुर्ग्रावच्युतोधिषणयोरुपस्त्थात् ॥ अध्वर्योर्व्वापरिवायःपवित्रा
त्तन्तेजुहोमिमनसाव्वषट्कृतुꣳस्वाहादेवानामुत्क्रमणमसि ॥ २६ ॥
[१] प्राणायमे । वर्च्चोदावर्च्चसेपवस्वव्यानायमेवर्च्चोदावर्च्चसेपवस्वो
दानायमेवर्च्चोदावर्च्चसेपवस्वव्वाचेमेवर्च्चोदावर्च्चसेपवस्वक्रतुदक्षा

ᳵभ्याम्मेवर्च्चोदावर्च्चसेपवस्वᳲश्रोत्त्रायमेवर्च्चोदावर्च्चसेपवस्वचक्षु
ᳵर्भ्याम्मेवर्च्चोदसौवर्च्चसेपवेथामात्मनेमे ॥ २७ ॥ आत्मनेमे ।
वर्च्चोदावर्च्चसेपवस्वौजसेमेवर्च्चोदावर्च्चसेपवस्वायुषेमेवर्च्चोदावर्च्चसे
पवस्वविश्वाᳵभ्योमेप्प्रजाᳵभ्योवर्च्चोदसौवर्च्चसेपवेथाम् ॥२८॥ को
सि । कतमोसिकस्यासिकोनामासि ॥ यस्यतेनामामन्महियन्त्वा
सोमेनातीतृपाम ॥ भूᳵर्भुवꣳस्वःसुप्प्रजाऽप्प्रजाभिःस्याꣳसुवीरो
वीरैꣳसुपोषꣳपोषैꣳ ॥२९॥ [३] उपयामगृहीतोसि ॥ उपयामगृही

तोसिमधवेत्त्वोपयामगृहीतोसिमाधवायत्त्वोपयामगृहीतोसिशु
क्रायत्वोपयामगृहीतोसिशुचयेत्वोपयामगृहीतोसिनभसेत्वोपया
मगृहीतोसिनभस्यायत्वोपयामगृहीतोसीषेत्वोपयामगृहीतोस्यू
र्जेत्वोपयामगृहीतोसिसहसेत्वोपयामगृहीतोसिसहस्यायत्वोपया
मगृहीतोसितपसेत्वोपयामगृहीतोसितपस्यायत्वोपयामगृहीतो
स्यꣳहसस्प्पतयेत्त्वा ॥ ३० ॥ [१] इन्द्राग्ग्नीऽआगतम् ॥ इन्द्रा
ग्ग्नीऽआगतꣳसुतङ्गीर्भिर्न्नभोव्वरेण्यम् ॥ अस्यपातन्धियेषिता ॥

उपयामगृहीतोसीन्द्राग्निभ्यान्त्वैषतेयोनिरिन्द्राग्निभ्यान्त्वा
॥ ३१ ॥ [१ ॥ आघं ॥ आघायेऽअग्निमिन्धतेस्तृणन्तिबर्हिरानुष
क् ॥ येषामिन्द्रोयुवासखा ॥ उपयामगृहीतोस्यग्नीन्द्राभ्यान्त्वै
षतेयोनिरग्नीन्द्राभ्यान्त्वा ॥ ३२ ॥ [१] ओमासश्चर्षणीधृतः ॥
ओमासश्चर्षणीधृतोविश्वेदेवासऽआगत ॥ दाश्वाꣳसोदाशुषः
सुतम् ॥ उपयामगृहीतोसिविश्वेभ्यस्त्वादेवेभ्यऽएषतेयोनिर्वि
श्वेभ्यस्त्वादेवेभ्यः ॥ ३३ ॥ [१] विश्वेदेवासः ॥ विश्वे

देवासऽआगंतशृणुतामंऽइमꣳहवम् ॥ एदम्बर्हिर्न्निषीदत ॥ उपया
मगृंहीतोसिविश्वेब्भ्यस्त्वादेवेब्भ्यंऽएषतेयोनिर्विश्वेब्भ्यस्त्वादेवे
ब्भ्यं÷ ॥ ३४ ॥ [१] इन्द्रंमरुत्वꣳ ॥ इन्द्रंमरुत्त्वऽइहपाहिसोमं
य्यथांशार्य्यातेऽअपिबꣳसुतस्यं ॥ तवप्प्रणीतीतवंशूरशर्म्मन्नाविवा
सन्तिकवयं÷सुयज्ञाः ॥ उपयामगृंहीतोसीन्द्रांयत्त्वामरुत्त्वंतऽए
षतेयोनिरिन्द्रांयत्त्वामरुत्त्वंते ॥ ३५ ॥ [१] मरुत्त्वन्तंवृषभंवा
वृधानमकवारिन्दिव्यꣳशासमिन्द्रंम् ॥ विश्वासाहमवंसेनूतनायो

ग्र६ꣳसहोदामिहतꣳहुवेम ॥ उपयामगृहीतोसीन्द्रायत्त्वामरुत्त्व
तऽएषतेयोनिरिन्द्रायत्त्वामरुत्त्वते ॥ [१] उपयामगृहीतोसिमरु
तान्त्वौजसे ॥ ३६ ॥ [१] सजोषाऽइन्द्र ॥ सजोषाऽइन्द्रसगणोम
रुद्भिꣳसोमम्पिबवृत्रहाशूरविद्वान् ॥ जहिशत्रूँ १ रपमृधोनुदस्वा
थाभयङ्कृणुहिविश्वतोनः ॥ उपयामगृहीतोसीन्द्रायत्त्वामरुत्त्वत
ऽएषतेयोनिरिन्द्रायत्त्वामरुतत्त्वते ॥ ३७ ॥ [१] मरुत्त्वाँ २ ऽइन्द्र ।
वृषभोरणायपिबासोमंमनुष्ष्वधम्मदाय ॥ आसिञ्चस्वजठरेमद्ध्वं

ऽऊर्म्मिमन्त्वꣳराजासिप्प्रतिपत्सुतानाम् ॥ उपयामगृहीतोसीन्द्रा

यत्त्वामरुत्त्वतऽएषतेयोनिरिन्द्रायत्त्वामरुत्त्वते ॥ ३८ ॥ [१]

महाँ२इन्द्रः ॥ महाँ२ऽइन्द्रोनृवदाचर्षणिप्प्राऽउतद्विबर्हाऽअमि

नःसहोभिः ॥ अस्म्मद्र्यग्ग्वावृधेव्वीर्य्यायोरुःपृथुःसुकृतःकर्तृभि

र्ब्भूत् ॥ उपयामगृहीतोसिमहेन्द्रायत्त्वैषतेयोनिर्म्महेन्द्रायत्त्वा

॥ ३९ ॥ [१] महाँ२ऽइन्द्रः ॥ महाँ२ इन्द्रोयऽओजसापर्ज्जन्न्यो

वृष्टिमाँ२ऽइव ॥ स्तोमैर्व्वत्सस्यवावृधे ॥ उपयामगृहीतोसिमहेन्द्रा

यत्त्वैषतेयोनिर्म्महेन्द्रायत्त्वा ॥४०॥ [१] उदुत्यम् ॥ उदुत्यञ्जा
तवेदसन्देवंवहन्तिकेतवः ॥ दृशेविश्श्वायसूर्य्यᳬंस्वाहा ॥ ४१ ॥
चित्रन्देवानाम् ॥ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यवरुण
स्याग्नेः ॥ आप्प्राद्यावापृथिवीऽअन्तरिक्षᳬंसूर्य्यऽआत्माजग
तस्तस्थुषश्चस्वाहा ॥ ४२ ॥ अग्नेनय । सुपथारायेऽअस्मान्वि
श्श्वानिदेववयुनानिविद्वान् ॥ युयोद्ध्यस्म्मज्जुहुराणमेनोभूयिष्ठा
न्तेनमऽउक्तिंविधेमस्वाहा ॥ ४३ ॥ अयन्नः ॥ अयन्नोऽअग्निर्वरि

वस्कृणोत्वयम्मृधः पुरऽएंतुप्प्रभिन्दन् ॥ अयंवाजांञ्जयतुवाजंसा
तावयᳪंशत्रूञ्जयतुजर्हृषाणऽस्वाहा ॥ ४४ ॥ रूपेणवः ॥ रूपेण
वोरूपमभ्यागान्तुथोवोविश्ववेदाविभंजतु ॥ ऋतस्यंपथाप्प्रेतंच
न्द्रदंक्षिणाविस्वःपश्श्यव्व्युन्तरिक्षंय्यतंस्वसदुस्यैः ॥ ४५ ॥ ब्राह्म
णमुद्य । व्विदेयम्पितृमन्तंम्पैतृमत्यमृषिमार्षेयᳪंसुधातुदक्षिणम् ॥
अस्म्मद्राताइेवत्राग्गच्छतप्प्रदातारमाविशत ॥४६॥ अग्ग्नयेत्त्वा ॥
अग्ग्नयेत्त्वामह्यंव्वरुणोददातुसोमृतत्त्वमंशीयायुर्दात्रऽएंधिमयो

मह्यम्प्रतिग्ग्रहीत्रे रुद्रायंत्त्वामह्युंव्वरुणोददातुसोमृतत्त्वमशीयप्प्रा
णोदात्र ऽएधिव्वयोमह्यम्प्रतिग्ग्रहीत्रे बृहस्प्पतयेत्त्वामह्युंवरुणोद
दातुसोमृतत्वमशीयत्त्वग्ग्दात्र ऽएधिमयोमह्यम्प्रतिग्ग्रहीत्रेयमा
यंत्त्वामह्युंव्वरुणोददातुसोमृतत्त्वमशीयहयोदात्र ऽएधिव्वयोमह्य
म्प्रतिग्ग्रहीत्रे॥४७॥ कोदात् ॥ कोदात्कस्म्माऽअदात्कामोदात्का
मायादात् ॥ कामोदाताकामः प्प्रतिग्ग्रहीताकामैतत्ते ॥४८॥[८]
॥२५॥ इतिश्रीवाजसनेयसंहितायांसप्तमोऽध्यायः ॥७॥ श्रीवेदपुरु

षायनमः ॥ अनुवाक्सूत्रम् ॥ उपयामगृहीतोस्यादित्येभ्यः पंचवाम
मद्यद्वेसुशर्मास्येकाबृहस्पतिसुतस्यद्वेहरिरासिचतस्रःसमिन्द्रेणाष्टौ
माहिरेजतुदशमास्यःपंचकावातिष्ठसुक्ष्वाहींद्रामिदेकैकायस्मान्नद्वे
ग्नेपवस्वोत्तिष्ठन्नऽद्दश्रमुदुत्यमेकैकाजिघ्रद्वेविनइंद्रवाचस्पतिंविश्व
कर्मन्नेकैकाग्नयेत्वाचतस्रइहरतिस्तिस्रःपरमेष्ठीदशत्रयोविꣳशति
स्त्रिषष्टिः ॥ हरिःॐउपयामगृहीतोसि ॥ उपयामगृहीतोस्यादि
त्येभ्यस्त्वा ॥ विष्णंऽउरुगायैषतेसोमस्तꣳरक्षस्वमात्वादभन्

॥ १ ॥ कुदाचुन । स्तुरीरंसिुनेन्द्रंसश्चसिदुाशुषे ॥ उपोपेन्नुमंघव
न्भूयुऽइन्नुतेदानंन्देुवस्यंपृच्च्यतऽआदिुत्येभ्यंस्त्वा ॥ २ ॥ कुदाचु
न । प्प्रयुंच्छस्युभेनिपासिुजन्मनी ॥ तुरीयादित्त्युसनंवन्तऽइन्द्रिु
यमातंस्त्थावुमृतंन्दिुव्व्याुदिुत्त्येभ्यंस्त्वा ॥ ३ ॥ युज्ञोदेुवानाम् ॥
युज्ञोदेुवानाुम्प्रत्त्यैतिसुुम्न्नमादिंत्यासुोभवंतामृडुयन्तः ॥ आवो
र्व्वाचीसुमुतिर्व्ववृत्त्यादंुहोश्चिुद्यावंरिवोुवित्तुरासंदादिुत्येभ्यंस्त्वा
॥ ४ ॥ व्विवंस्वन्नादित्य ॥ व्विवंस्वन्नादित्त्यैुषतेसोमपीुथस्तास्मिन्न्म

तस्व ॥ अदस्म्मैनरोव्वचसेदधातनुयदाशीर्द्दादम्पतीव्वाममश्नुतꣳ ॥
पुमान्पुत्रोजायतेव्विन्दतेव्वसुधाव्विश्वाहारपऽएधतेगृहे ॥५॥ [५]
व्वाममद्य । सवितर्व्वाममुश्वोदिवेदिवेव्वाममस्म्मभ्यꣳसावीः ॥ व्वा
मस्यहिक्षयस्यदेवभूरेरयाधियाव्वामभाजः स्याम ॥ ६ ॥ उपयाम
गृहीतोसि । सावित्रोसिचनोधाश्चनोधाऽअसिचनोमयिधेहि ॥
जिन्वयज्ञञ्जिन्वयज्ञपतिम्भगायदेवायत्त्वासवित्रे ॥ ७ ॥ [२]
शतम् ॥ ३०० ॥ उपयामगृहीतोसि । सुशर्म्मासिसुप्प्रतिष्ठानोबृह

दुक्षायनमंः ॥ विश्वेभ्यस्त्वादेवेभ्यंऽएषतेयोनिर्विश्वेभ्यस्त्वा
देवेभ्यंः॥८॥[१] उपयामगृहीतोसि॥ उपयामगृहीतोसिबृहस्प
तिसुतस्यदेवसोमतऽइन्दोरिन्द्रियावंतंपत्नीवतोग्ग्रहाँ२ ऽऋध्या
सम् ॥ अहम्परस्तादहमवस्ताद्यदन्तरिक्षन्तदुमेपिताभूत् ॥ अ
हᳪसूर्यमुभयतोददर्शाहन्देवानाम्परमङ्गुहायत् ॥ ९ ॥ अग्नाँ
३ ऽइपत्नीवन् ॥ अग्नाँ ३ ऽइपत्नीवन्त्सजूर्देवेनत्त्वष्ट्रासोमम्पि
बस्वाहा ॥ प्रजापतिर्वृषासिरेतोधारेतोमयिधेहिप्रजापतेस्तेवृष्णो

रेतोधसौरेतोधामशीय ॥१०॥ [२] उपयामगृहीतोसि ॥ उपयाम
गृहीतोसिहरिरसिहारियोजनोहरिभ्यान्त्वा ॥ हर्य्योर्द्धानास्त्थ
सहसोमाऽइन्द्राय ॥ ११ ॥ यस्ते । ऽअश्वसनिर्भक्षोयोगोसनिस्त
स्यतऽइष्टयजुषस्तुतस्तोमस्यशस्तोक्थस्योपहूतस्योपहूतोभक्षया
मि ॥१२॥ देवकृतस्यैनसऽ ॥ देवकृतस्यैनसोवयजनमसिमनुष्य
कृतस्यैनसोवयजनमसिपितृकृतस्यैनसोवयजनमस्यात्मकृतस्यैन
सोवयजनमस्येनसऽएनसोवयजनमसि ॥ यच्चाहमेनोविद्वाँश्च

कार॒यच्चा॑विद्वाँ॒स्तस्य॒सर्व॑स्यैनं॒सो॑व॒यजं॑नमासि ॥ १३ ॥ सं॒वर्च्च॑सा ॥
सं॒वर्च्च॑सा॒पय॑सा॒सन्त॒नूभि॒रग॑न्महि॒मन॑सा॒सꣳशि॒वेन॑ ॥ त्वष्टा॑सु॒द
त्रो॒वि॑दं॒धा॑तु॒रायो॑नु॒मा॑र्ष्टु॒त॒न्वो॒यद्वि॑लि॑ष्टम् ॥ १४॥ [४] समि॑न्द्र ।
णो॒मन॑सानेषि॒गोभि॒ꣳस॒ꣳसू॒रिभि॒र्म्म॑घव॒न्त्सꣳस्व॒स्त्या ॥ सम्ब्र
ह्म॑णादे॒वकृ॑तं॒ऽयदस्ति॒सन्दे॒वाना॒ꣳसु॑म॒तौय॒ज्ञिया॑ना॒ꣳस्वाहा ॥
॥ १५॥ सं॒वर्च्च॑सा ॥ सं॒वर्च्च॑सा॒पय॑सा॒सन्त॒नूभि॒रग॑न्महि॒मन॑सा॒सꣳ
शि॒वेन॑ । त्वष्टा॑सु॒दत्रो॒वि॑दं॒धा॑तु॒रायो॑नु॒मा॑र्ष्टु॒त॒न्वो॒यद्वि॑लि॑ष्टम् ॥१६॥

धातारातिः । संवितेदञ्जुषन्ताम्प्रजापतिर्निधिपादेवोऽअग्निः ॥
त्वष्टाविष्णुः प्रजयांसꣳरराणायजमानायद्रविणन्दधातुस्वाहा ॥
॥ १७ ॥ सुगावः ॥ सुगावोदेवाःसदनाऽअकर्म्मयऽआजग्मेदꣳ
सवनञ्जुषाणाः ॥ भरमाणाव्वहमानाहवीꣳष्यस्मेधत्तव्वसवोव
सूनिस्वाहा ॥१८॥ याँ२ऽआवहः ॥ याँ२आवहऽउशतोदेवदेवाँस्ता
न्प्रेरयस्वेऽअग्नेसधस्त्थे ॥ जक्षिवाꣳसः पपिवाꣳसश्चविश्वेसुङ्ग
र्म्मꣳस्वरातिष्ठतानुस्वाहा ॥ १९ ॥ व्वयꣳहि । त्त्वाप्प्रयतियज्ञेऽअ

स्मिन्नग्ने होतारमवृणीमहीह ॥ ऋधगया ऽऋधगुताशमिष्ठाः प्र
जानन्यज्ञमुपयाहि विद्वान्त्स्वाहा ॥ २० ॥ देवा गातुविदः ॥ देवा गातु
विदो गातुं वित्त्वा गातुमित ॥ मनसस्पत ऽइमन्देव यज्ञᳪ स्वाहा वा
ते धाः ॥ २१ ॥ यज्ञं यज्ञम् ॥ यज्ञं यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा ॥ एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तं जुष
स्व स्वाहा ॥ २२ ॥ [८] माहिः ॥ माहिर्भूर्म्मा पृदाकुः उरुᳪ हि रा
जा वरुणश्चकार सूर्याय पन्थामन्वेतवा ऽउ ॥ अपदे पादा प्रति

धातवेकरुतापंवृक्षाहृदयाविधश्चित् ॥ नमोवरुणायाभिष्टितोवरुणस्यपाशः ॥ २३ ॥ अग्नेरनीकम् ॥ अग्नेरनीकमपऽआविवेशापान्नपात्प्रतिरक्षन्नसुर्र्यम् ॥ दमेंदमेसमिधंयक्ष्यग्नेप्रतितेजिह्वाघृतमुच्चरण्यत्स्वाहा ॥२४॥ समुद्रेते ॥ समुद्रेतेहृदयमप्स्वन्तः सन्त्वाविशन्त्वोषधीरुतापः ॥ यज्ञस्यत्वायज्ञपतेसूक्तोक्तौनमोवाकेविधेमयत्स्वाहा ॥२५॥ देवीरापः ॥ देवीरापऽएषवोगर्भस्तꣳसुप्रीतꣳसुभृतम्बिभृत ॥ देवसोमैषतेलोकस्तस्मिञ्छञ्चवक्ष्वपरि

चव॒क्ष्व ॥२६॥ अव॑भृथनिचम्पुण । निचे॒रुर॑सिनिचम्पुणः ॥ अव॑
दे॒वैर्दे॒वकृ॑त॒मेनो॑यासिष॒मव॒मर्त्यै॒र्म्मर्त्य॑कृतम्पुरु॒राव्णो॑देवरि॒षस्पा॑
हि दे॒वाना॑ᳬसमि॒द॑सि ॥२७॥ [५] एज॑तुद॒श॑मास्यः ॥ एज॑तुद॒श॑
मास्यो॒गर्भो॑जु॒राय्यु॑णास॒ह ॥ यथा॒यंव्वा॒युरेज॑ति॒यथा॑समु॒द्र॑ऽएज॑
ति ॥ एवायन्द॒श॑मास्यो॒ऽअस्र॒ज्ज॒राय्यु॑णास॒ह ॥२८॥ यस्यै॑ते । य॒ज्ञि
यो॒गर्भो॒यस्यै॒योनि॑र्हि॒र॒ण्ययी॑ ॥ अङ्गा॒न्यह्रु॑ता॒यस्य॒तम्मा॒त्रास
मजीगम॒ᳬस्वाहा॑ ॥ २९ ॥ पु॒रु॒द॒स्मो॑वि॒षु॑रू॒पः ॥ पु॒रु॒द॒स्मो॑वि॒षु॑

रूपऽइन्दुरन्तम्मीहिमानंमनाञ्जुधीरं÷ ॥ एकंपदीन्द्विपदीन्त्रिप
दीञ्चतुष्षपदीमष्टापदीम्भुवनानुप्प्रथन्ताꣳस्वाहा ॥३०॥ मरुतोय
स्यं ॥ मरुतोयस्यहिक्षयेपाथादिवोविमहसः ॥ ससुगोपातमोज
नं÷॥ ३१ ॥ महीद्यौः। पृथिवीचनऽइमंय्यज्ञम्मिमिक्षताम् ॥ पि
पृतान्नोभरीमभिः॥३२॥[५]आतिष्ठ। वृत्रहन्नथंय्युक्तातेब्रह्मणा
हरी ॥ अर्वाचीनꣳसुतेमनोग्ग्रावाकृणोतुवग्नुना ॥ उपयामगृहीतो
सीन्द्रायत्त्वाषोडशिनंऽएषतेयोनिरिन्द्रायत्त्वाषोडशिने ॥३३ ॥

[१]युक्ष्वाहि। केशिनाहरीवृषणाकक्ष्यप्प्रा ॥ अथान॑ऽइन्द्रसो
मपागिरामुप॑श्श्रुतिञ्चर ॥ उपयामगृहीतोसीन्द्राय॑त्वाषोडशिने
ऽएषतेयोनिरिन्द्राय॑त्वाषोडशिने ॥ ३४॥[१] इन्द्रमित् ॥ इन्द्र
मिद्धरीवहतोप्प्रतिधृष्टशवसम् ॥ ऋषीणाञ्चस्तुतीरुप॑यज्ञञ्चमानु
षाणाम् ॥ उपयामगृहीतोसीन्द्राय॑त्वाषोडशिनेऽएषतेयोनिरि
न्द्राय॑त्वाषोडशिने॥३५॥[१]यस्मान्न । जातश्परोऽअन्न्योऽअ
स्तियऽआविवेशभुवनानिविश्वा ॥ प्रजापतिःप्प्रजयासᳬरराण

त्रीणिज्ज्योतीᳬंषिसचतेसषोडशी ॥ ३६ ॥ इन्द्रश्च । सम्म्राड्वरुण
॥५९॥ श्चराजातौतेभक्षञ्चक्रतुरग्ग्रऽएतम् ॥ तयोरहमनुभक्षम्भक्षया ॥ ८ ॥
मिव्वाग्देवीजुषाणासोमस्यतृप्प्यतुसहप्प्राणेनस्वाहा ॥ ३७ ॥ [२]
अग्नेपवस्व ॥ अग्नेपवस्वस्वपाऽअस्म्मेवर्च्चः सुवीर्य्यम् ॥ दधद्र
यिम्मयिपोषम् ॥ उपयामगृहीतोस्यग्नयेत्त्वावर्च्चसऽएषतेयोनि
रग्नयेत्त्वावर्च्चसे ॥ अग्नेवर्च्चस्विन्वर्च्चस्वाँस्त्वन्देवेष्ष्वसिवर्च्चस्वान् ॥९५॥
हम्मनुष्ष्येषुभूयासम् ॥३८॥ [१] उत्तिष्ठन्नोजसा ॥ उत्तिष्ठन्नोज

सासहपीत्वीशिप्प्रेऽअवेपयः ॥ सोमंमिन्द्रचमूसुतम् ॥ उपयाम
गृहीतोसीन्द्रांयत्त्वौजंसऽएषतेयोनिरिन्द्रांयत्त्वौजंसे ॥ इन्द्रौजि
ष्ठौजिष्ठस्त्वन्देवेष्ष्वस्योजिंष्ठोहम्मंनुष्ष्येषुभूयासम् ॥ ३९ ॥[१]
अदृश्रमस्य ॥ केतवोव्विरश्म्मयोजनाँ२ ऽअनु ॥ भ्राजंन्तोऽअ
ग्ग्नयोयथा ॥ उपयामगृहीतोसिसूर्य्यायत्त्वाभ्भ्राजायैषतेयोनिः
सूर्य्यायत्त्वाभ्भ्राजाय ॥ सूर्य्यभ्भ्राजिष्ठभ्भ्राजिंष्ठस्त्वन्देवेष्ष्वसि
भ्भ्राजिष्ठोहम्मंनुष्ष्येषुभूयासम् ॥४०॥ [१] उदुत्त्यम् ॥ उदुत्त्य

ज्ञातवेदसन्देवंवंहन्तिकेतवं॑ ॥ दृशेविश्वायसूर्य्यम् ॥ उपयाम
गृहीतोसिसूर्य्यायत्वाभ्राजायैषतेयोनिःसूर्य्यायत्वाभ्राजायं
॥ ४१ ॥ [१] आजिंग्घ्र ॥ आजिंग्घ्रकलशम्मह्यात्वाविशन्त्विन्दं
वः ॥ पुनंरूर्ज्जानिवंर्तस्वसानः॑सहस्रंन्धुक्ष्वोरुधारापयंस्वतीपुन
र्म्माविंशताद्रयिः ॥ ४२ ॥ इडेरन्तें ॥ इडेरन्तेहव्येकाम्म्येचन्द्रे
ज्योतेदितिसरंस्वतिमहिविश्श्रुति ॥ एतातेऽअग्घ्न्येनामानिदेवे
भ्योमासुकृतम्ब्रूतात् ॥४३॥ [२] विनं । ऽइन्द्रमृधोजहिनीचायं

च्छपृतन्न्यतः ॥ योऽअस्म्माँ २ ऽअभिदासत्त्यधरङ्गमयातमः ॥
उपयामगृहीतोसीन्द्रायत्त्वाविमृधऽएषतेयोनिरिन्द्रायत्त्वाविमृ
धे ॥ ४४ ॥ [१] वाचस्प्पतिं । विश्वकर्म्माणमूतयेमनोजुवंवाजे
ऽअद्याहुवेम ॥ सनोविश्वानिहवनानिजोषद्विश्वशम्भूरवसेसाधु
कर्म्मा ॥ उपयामगृहीतोसीन्द्रायत्त्वाविश्वकर्म्मणऽएषतेयोनि
रिन्द्रायत्त्वाविश्वकर्म्मणे ॥ ४५ ॥ [१] विश्वकर्म्मन्हविषा ॥
विश्वकर्म्मन्हविषावर्द्धनेनत्रातारमिन्द्रमकृणोरवद्ध्यम् ॥ तस्मै

संहि. विशꣳसमंनमन्तपूर्वीरयमुग्ग्रोविहव्योयथासत् ॥ उपयामगृहीतोसीन्द्रायत्वाविश्वकर्म्मणऽएषतेयोनिरिन्द्रायत्वाविश्वकर्म्मणे ॥ ४६ ॥ [१] उपयामगृहीतोसि ॥ उपयामगृहीतोस्यग्नयेत्वा गायत्रच्छन्दसंगृह्णामीन्द्रायत्वात्रिष्टुप्च्छन्दसंगृह्णामिविश्वेभ्य स्त्वादेवेभ्योजगच्छन्दसंगृह्णाम्म्यनुष्टुप्तेभिगरः ॥ ४७ ॥ व्रेशीं नान्त्वा ॥ व्रेशीनान्त्वापत्मन्नाधूनोमिकुकूननानान्त्वापत्मन्ना धूनोमिभन्दनानान्त्वापत्मन्नाधूनोमिमदिन्तमानान्त्वापत्मन्

न्नाधूनोमिमुधुन्तंमानान्त्वापत्क्मसुन्नाधूनोमिशुक्रन्त्वांशुक्रआधूं
नोम्म्यन्न्हौरूपेसूर्य्यस्यरश्मिम्मषुं ॥ ४८ ॥ ककुभꣳरूपं ॥ वृषभस्यं
रोचतेबृहच्छुक्रःशुक्रस्यंपुरोगाःसोमꣳसोमंस्यपुरोगाः ॥ यत्तेसोमा
दाब्भ्यन्नामजागृंवितस्म्मैत्त्वागृह्णामितस्म्मैतेसोमसोमांयस्वाहां
॥ ४९ ॥ उशिक्त्वम् ॥ उशिक्त्वन्देवसोमाग्ग्नेःप्प्रियम्पाथोपीहि
वशीत्वन्देवसोमेन्द्रस्यप्प्रियम्पाथोपीह्यस्म्मत्संखात्वन्देवसोम
व्विश्वेषान्देवानांप्प्रियम्पाथोपीहि ॥५०॥ [४] इहरतिः ॥ इहरति

संहि. रिहरंमद्धमिहधृतींरिहस्वधृंतिःस्वाहा ॥ उपसृजन्धरुणम्मात्रेधरु पू. अ.
॥६२॥ णोमातरन्धयंन्॥ रायस्प्पोषंमस्म्मासुंदीधरत्स्वाहा ॥५१॥ सत्रस्य ॥८॥
ऽऋद्धिः ॥ सत्रस्यऽऋद्धिंरस्यगंन्मज्ज्योतिंरमृताऽअभूम ॥ दिवम्पृ
थिव्याऽअध्यारुंहामाविंदामदेवान्त्स्वज्ज्योतिः ॥५२॥ सुवन्तम् ॥
सुवन्तमिन्द्रापर्वतापुरोसुधायोनः पृतन्न्यादपतन्तमिद्धंतंव्वज्ज्रेण
तन्तमिद्धंतम् ॥ दूरेचत्तायच्छन्त्सद्गहंनंय्यदिनंक्षत् ॥ अस्म्मा ॥६२॥
कुङ्शत्रून्परिशूरव्विश्श्वतोदुम्मांदर्षीष्टव्विश्श्वतः ॥ भूर्भुवःस्वःसुप्र

जाःप्प्रजाभिं÷स्यामसुवीरांवीरैःसुपोषाꣳपोषैꣳ॥५३॥[३]परमेष्ठ्यु
भिधीतꣳप्प्रजापतिर्वाचिव्याहृतायामन्धोऽअच्छेतꣳ ॥ सवितास
न्यांविश्वकर्म्मादीक्षायांम्पूषासोमक्रयंण्यामिन्द्रश्च ॥ ५४ ॥ इन्द्र
श्च । मरुतश्चक्रयायोपोत्थितोसुरꣳपण्यमानोमित्रःक्रीतोविष्णुः
शिपिविष्टऽऊरावासन्नोविष्णुर्न्नरन्धिषꣳप्प्रोह्यमाणꣳ॥५५॥प्प्रोह्य
माणꣳसोमऽआगतोवरुणऽआसन्द्यामासन्नोग्निराग्नीध्रऽइन्द्रोह
विर्द्धानेथर्वोपावह्रियमाणो विश्वेदेवाः ॥ ५६ ॥ विश्वेदेवाः ॥ वि

श्वेदेवाऽअꣳशुषुन्न्युप्तोव्विष्ष्णुराप्प्रीतपाऽआप्प्याय्यमानोयमः
सूयमानोव्विष्ष्णुःसम्भ्रियमाणोव्वायुःपूयमानꣳशुक्रःपूतःशुक्रः
क्षीरश्रीर्म्मन्थीसक्तुश्रीर्व्विश्वेदेवाः ॥ ५७ ॥ विश्वेदेवाः ॥ व्विश्वे
देवाश्चमसेषून्नीतोऽसुर्होमायोद्यतोरुद्रोहूयमानोवातोऽभ्यावृत्तोनृ
चक्षाःप्प्रतिक्ख्यातोभक्षोभक्ष्यमाणꣳपितरोनाराशꣳसाःसन्नःसि
न्धुः ॥ ५८ ॥ सन्नःसिन्धुरवभृथायोद्यतꣳसमुद्रोऽभ्यवह्रियमा
णꣳसलिलःप्प्रप्लुतोययोरोजसास्कभितारजाꣳसिव्वीर्य्येभिर्व्वीर

तंमाशविष्ठा ॥ यापत्यैतेऽअप्प्रतीतासहौभिर्व्विष्णूऽअगन्वरुणापू
र्व्वहूतौ ॥ ५९ ॥ देवान्दिवम् ॥ देवान्दिवमगन्यज्ञस्ततोमाद्द्रविणम
ष्टुमनुष्यानन्तरिक्षमगन्यज्ञस्ततोमाद्द्रविणमष्टुपितॄन्पृथिवीमग
न्यज्ञस्ततोमाद्द्रविणमष्टुयङ्ञ्चलोकमगन्यज्ञस्ततोमेभद्रमभूत् ॥
॥ ६० ॥ चतुस्त्रिꣳशत्तन्तवोयेवितत्निरेयऽइमंय्यज्ञꣳस्वधया
ददन्ते ॥ तेषाञ्छिन्नꣳसम्वेतद्दधामिस्वाहाघर्म्मोऽअप्येतुदे
वान् ॥ ६१ ॥ यज्ञस्यदोहः ॥ यज्ञस्यदोहोविततःपुरुत्रासोऽअष्ट

धादिवंमन्वातंतान ॥ सयंज्ञधुक्क्ष्वमहिंमेप्प्रजायां॑ᳫरायस्पोषंव्वि
श्वमायुंरशीयस्वाहां ॥ ६२ ॥ आपंवस्व ॥ आपंवस्वहिरंण्यवदश्वांव
त्सोमव्वीरवंत् ॥ व्वाजञ्जोमंन्तुमाभंरस्वाहां ॥ ६३ ॥ [१०] ॥२३॥
इतिश्रीवाजसनेयसंहितायांअष्टमोऽध्यायः ॥ ८ ॥ श्रीवेदपुरुषाय
नमः ॥ अनुवाक्सूत्रम् ॥ देवसवितश्चतस्त्रइंद्रस्यवज्रःपंचदेवस्या
हंदशापयेतिस्त्रोवाजस्येममष्टावग्निरेकाक्षरेणैपतेचतुष्कौसविताद्वे
अष्टौचत्वारिᳬशत् ॥ हरिःॐदेवंसवितः ॥ देवंसवितःप्प्रसुंवयज्ञ

म्प्रसुवस्य ज्ञपतिम्भगाय ॥ दिव्योगन्धर्व्वश्केतपूः केतन्नः पुनातुव्वाच
स्प्पतिर्व्वाजन्नः स्वदतुस्वाहा ॥ १ ॥ ध्रुवसदन्त्वा । नृषदम्मनः सदं
मुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रायत्त्वाजु
ष्टतमम् ॥ अप्सुषदन्त्वाघृतसदंव्योमसदमुपयामगृहीतोसीन्द्रा
यत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रायत्वाजुष्टतमम् ॥ पृथिवीसदं
न्त्वान्तरिक्षसदन्दिविसदन्देवसदन्नाकसदमुपयामगृहीतोसीन्द्रा
यत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रायत्त्वाजुष्टतमम् ॥ २ ॥ अपां

रसम् ॥ अपाꣳरसमुद्वयसꣳसूर्य्येसन्तꣳसमाहितम् ॥ अपाꣳरसं
स्ययोरसस्तंवोगृह्णाम्म्युत्तममुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णा
म्म्येषतेयोनिरिन्द्रायत्त्वाजुष्टतमम् ॥ ३ ॥ ग्रहाऽऊर्ज्जाहुतयꣳ ॥
ग्रहाऽऊर्ज्जाहुतयोव्यन्तोविप्प्रायमतिम् ॥ तेषांविशिप्प्रियाणांवो
हमिषमूर्ज्जꣳसमग्ग्रभमुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येष
तेयोनिरिन्द्रायत्त्वाजुष्टतमम् ॥ सम्पृचौस्त्थꣳसम्मांभद्रेणपृङ्क्तंवि
पृचौस्त्थोविमापाप्मनापृङ्क्तम् ॥ ४ ॥ [४] इन्द्रस्यवज्ज्रं÷ ॥ इन्द्र

स्यवज्रोऽसिव्वाजसास्त्वयायंव्वाजꣳसेत् ॥ व्वाजस्यनुप्प्रसवेमातरं
म्महीमदितिन्नामवचसाकरामहे ॥ यस्यामिदंव्विश्वम्भुवनमाविवे
शतस्यान्नोदेवःसवितांधर्म्मसाविषत् ॥५॥ अप्प्स्वन्तम् ॥ अप्प्स्व
न्तरमृतमप्प्सुभेषजमपामुतप्प्रशस्तिष्ष्वश्वाभवतव्वाजिनः ॥ दे
वीरापोयोवऽऊर्म्मिꣳप्प्रतूर्त्तिꣳककुन्मान्वाजसास्तेनायंव्वाजꣳसेत्
॥ ६ ॥ व्वातोवा ॥ वातोवामनोवागन्धर्व्वाःसप्तविꣳशतिः ॥ तेऽअ
ग्ग्रेऽश्वमयुञ्जँस्तेऽअस्मिञ्जवमादधुः ॥७॥ व्वातरꣳहाभवव्वाजिन्यु

ज्यमांनुऽइन्द्रंस्येवदक्षिणःश्रियैधि ॥ सुञ्जन्तुत्त्वामुरुतोविश्ववे
दसुऽआतेत्त्वष्टापत्सुजुवन्दंधातु ॥ ८ ॥ जुवोयः ॥ जुवोयस्तेवा
जिन्निहितोगुहायःश्येनेपरीतोऽअचरच्चवाते ॥ तेनंनोवाजिन्ब
लंवान्बलेनवाजुजिच्चभवसमनेचपारयिष्णुः ॥ वाजिनोवाजजि
तोवाजंसरिष्ष्यन्तोबृहस्पतेर्भागमवजिग्घ्रत ॥ ९ ॥ [५]
देवस्याहम् ॥ देवस्याहसंवितुःसुवेसत्त्यसंवसोबृहस्पतेरुत्तमन्ना
कंरुहेयम् ॥ देवस्याहसंवितुःसुवेसत्यसंवसुऽइन्द्रंस्योत्तमन्ना

कं॑रुहेयम् ॥ दे॒वस्या॒हꣳस॑वि॒तुः स॒वे स॒त्त्यप्प्र॑सवसो॒बृह॒स्प्पतेरु॒त्त
मन्नाकं॑मरुहम् ॥ दे॒वस्या॒हꣳस॑वि॒तुः स॒वे स॒त्त्यप्प्र॑सवस॒ऽइन्द्र॑स्यो
त्तमन्नाकं॑मरुहम् ॥ १० ॥ बृह॑स्प्पते॒वाजम् ॥ बृह॑स्प्पते॒वाजं॑जय॒
बृह॒स्प्पत॑ये॒वाचं॑वदत॒बृह॒स्प्पतिं॒वाजं॑जापयत ॥ इन्द्र॒वाजं॑जयेन्द्रा॑
य॒वाचं॑वदतेन्द्रं॒वाजं॑जापयत ॥ ११ ॥ एषावः॑ ॥ एषाव॒ꣳसास॒त्त्या
सं॒वाग॑भूद्यया॒बृह॒स्प्पतिं॒वाज॒मजी॑जपताजी॑जपत॒बृह॒स्पतिं॒वाजं॒
वन॑स्प्पतयो॒विमु॑च्यद्ध्वम् ॥ एषाव॒ꣳसास॒त्त्यासं॒वाग॑भूद्ययेन्द्रं॒वाज॒

मजीजपताजीजपतेन्द्रंवाजंवनस्पतयोविमुच्यद्ध्वम् ॥ १२ ॥ देव
स्याहम् ॥ देवस्याहꣳसवितुःसवेसत्त्यप्प्रसवसोबृहस्पतेर्वाजजि
तोवाजंजेषम् ॥ वाजिनोवाजजितोद्ध्वनस्कभ्नुवन्तोयोजनामि
मानाꣳकाष्ठाङ्गच्छत ॥ १३ ॥ एषस्यं ॥ एषस्यवाजीक्षिपणिन्तु
रण्ण्यतिग्ग्रीवायांबद्धोऽअपिकक्षऽआसनि ॥ क्रतुन्दधिक्राऽअ
नुसꣳसनिष्प्यदत्पथामङ्काꣳस्यन्वापनीफणत्स्वाहा ॥ १४ ॥ उत
स्म्मं ॥ उतस्म्मास्यद्द्रवतस्तुरण्ण्यतःपर्ण्णन्नवेरनुवातिप्प्रगर्द्धिनः ॥

श्यनस्यैवद्ध्रजंतोऽअङ्कुसम्परींदधिक्काव्वर्णं÷सुहोर्ज्जातरींत्रतुंऽस्वा
हा ॥ १५ ॥ शन्नं÷ ॥ शन्नोभवन्तुवाजिनोहवेषुदेवतातामितद्रंवः
स्वर्क्काः ॥ जम्भयन्तोहिंवृकुहुरक्षांऽसिसनेम्म्यस्मद्युंयवन्नमीं
वाः ॥ १६ ॥ तेनं÷ ॥ तेनोऽअर्वन्तोहवनश्श्रुतोहवंविश्वेशृण्णवन्तु
वाजिनोमितद्रंवः ॥ सहस्रसामेधसातासनिष्प्यवोमहोयेधनंऽ
समिथेषुंजब्भ्रिरे ॥ १७ ॥ वाजेवाजेवत । वाजिनोनोधनेषुविप्प्रा
ऽअमृताऽऋतज्ञाः ॥ अस्यमद्ध्वं÷पिबतमादयंद्ध्वन्तृप्तायातपथि

संहि. भि॒र्द्दे॒व॒यानैः॑ ॥१८॥ आमा॒वाज॑स्यप्प्रस॒वोज॑गम्म्या॒देमे॒द्यावा॑पृथि॒ पू. अ.
॥६८॥ वीवि॒श्वरू॑पे ॥ आमा॑गन्ताम्पि॒तरा॑मा॒तरा॒चामा॒सोमो॑ऽअमृ॒त॒त्वे ॥ ९ ॥
नगम्म्यात् ॥ वाजि॑नोवाजजितो॒वाज॑ꣳससृ॒वाꣳसो॑बृह॒स्प्पते॑र्भा॒
गमवे॑जिग्घ्रतनिमृ॒जा॒नाः ॥१९॥ [१०] आ॒पये॒स्वाहा॑ । स्वा॒पये॒
स्वाहा॑पि॒जाय॒स्वाहा॒क्क्रत॑वे॒स्वाहा॒वस॑वे॒स्वाहा॑ह॒र्प्पत॑ये॒स्वाहान्हे॑मु
ग्ग्धाय॒स्वाहा॑मु॒ग्ग्धाय॑वैनꣳशि॒नाय॒स्वाहा॑विन॒ꣳशिन॑ऽआन्त्याय॒ ॥६८॥
नाय॒स्वाहान्त्या॑यभौव॒नाय॒स्वाहा॒भुव॑नस्य॒पत॑ये॒स्वाहाधि॑पतये॒स्वा

हा ॥२०॥ आयुर्य्यज्ञेन । कल्पताम्प्राणोयज्ञेनकल्पताञ्चक्षुर्य्यज्ञे
नकल्पताᳬश्रोत्रय्यज्ञेनकल्पताम्पृष्ठय्यज्ञेनकल्पतांय्यज्ञोय
ज्ञेनकल्पताम् ॥ प्रजापतेःप्प्रजाऽअभूमस्वर्द्देवाऽअगन्मामृता
ऽअभूम ॥२१॥ अस्म्मेवः ॥ अस्म्मेवोऽअस्त्विन्द्रियमस्म्मेनृम्म्ण
मुतक्रतुरस्म्मेव्वर्च्चाᳬसिसन्तुवः ॥ नमोमात्रेपृथिव्यैनमोमात्रेपृथि
व्याऽइयन्तेराड्यन्तासियमनोध्रुवोसिधरुणः ॥ कृष्यैत्त्वाक्षेमाय
त्त्वारय्यैत्त्वापोषायत्त्वा॥२२॥[३]व्वाजस्येमम् ॥ व्वाजस्येमम्प्रसवः

संहि. सुषुवेग्ग्रेसोमꣳराजानमोषधीष्ष्वप्प्सु ॥ ताऽअस्म्मभ्यम्मधुमती पू. अ.
॥६९॥ र्भवन्तुव्वयꣳराष्ट्रेजागृयामपुरोहिताःस्वाहा ॥२३॥ व्वाजस्येमाम् । ॥ ९ ॥
व्वाजस्येमाम्प्प्रसवःशिश्श्रियेदिवमिमाचव्विश्श्वाभुवनानिसम्म्राट् ॥
अदित्त्सन्तन्दापयतिप्प्रजानन्त्सनोरयिꣳसर्व्ववीरन्नियच्छतुस्वाहा
॥ २४ ॥ व्वाजस्यनु । प्प्रसवऽआबभूवेमाचव्विश्श्वाभुवनानिसर्व्व
तः ॥ सनेमिराजापरियातिव्विद्वान्प्प्रजाम्पुष्टिंव्वर्द्धयमानोऽअस्म्मे ॥६९॥
स्वाहा॥२५॥ सोमꣳराजानम् । सोमꣳराजानमवसेग्निमन्न्वारभाम

हे ॥ आदित्त्यान्विष्णुꣳसूर्र्यम्ब्रह्माणञ्चबृहस्प्पतिꣳस्वाहा ॥२६॥
अर्र्यमणम्बृहस्प्पतिम् ॥ अर्र्यमणम्बृहस्प्पतिमिन्द्रन्दानायचो
दय ॥ व्वाचंव्विष्णुꣳसरस्वतीꣳसव्वितारञ्चव्वाजिनꣳस्वाहा ॥२७॥
अग्ग्नेऽअच्छं ॥ अग्नेअच्छांव्वदेहनꣳप्प्रतिनꣳसुमनाभव ॥ प्रनोय
च्छसहस्रजित्वꣳहिधनदाऽअसिस्वाहा ॥ २८ ॥ प्रनं÷ ॥ प्रनोय
च्छत्त्वर्र्यमाप्प्रपूषाप्प्रबृहस्प्पतिं÷ ॥ प्रवाग्ग्देवीदंदातुनꣳस्वाहा ॥
॥ २९ ॥ देवस्यंत्त्वासवितुश्प्प्रसवेश्विनोर्ब्बाहुब्भ्यांम्पूष्णोहस्तां

ऽभ्याम् ॥ सर॑स्वत्यैव्वा॒चोय॒न्तुर्य्य॒न्त्रियै॑दधामि॒बृह॒स्स्पतेष्ट्वा॒सा
म्म्रा॑ज्ज्येना॒भिषि॑ञ्चाम्म्यसौ ॥३०॥ [८] अ॒ग्निरेका॑क्षरेण । प्प्रा॒णमु
द॑जय॒त्तमु॒ज्जेषम॒श्श्विनौ॒द्व्य॑क्षरेणद्द्वि॒पदो॒मनु॒ष्ष्या॒नुद॑जयत्ता॒न्तानु
ज्जेषं॒व्विष्ष्णु॒स्त्र्य॑क्षरेण॒त्त्रीँल्लो॒कानु॒द॑जय॒त्तानु॒ज्जेष॒ꣳसोम॒श्च्चतु॑रक्षरेण॒
चतु॑ष्ष्पदꣳ॒पशू॒नुद॑जय॒त्तानु॒ज्जेषम्पू॒षापञ्चा॑क्षरेण ॥ ३१ ॥ पू॒षाप
ञ्चा॑क्षरेण॒ । पञ्च॒दिश॒ऽउद॑जय॒त्ताऽउज्जेष॒ꣳसवि॒तापड॑क्षरेण॒षड्डृ॒तू
नुद॑जय॒त्तानु॒ज्जेषम्म॒रुत॑ꣳ सप्ताक्ष॑रेणस॒प्तग्ग्रा॒म्म्या॒न्पशू॒नुद॑जयँ

स्तानुज्जैषम्बृहस्पतिरष्टाक्षरेणगायत्रीमुदजयत्तामुज्जैषम्मित्रोन
वाक्षरेण ॥ ३२ ॥ मित्रोनवाक्षरेण । त्रिवृतꣳस्तोममुदजयत्तमुज्जै
षंवरुणोदशाक्षरेणविराजमुदजयत्तामुज्जैषमिन्द्रऽएकादशाक्षरेण
त्रिष्टुभमुदजयत्तामुज्जैषंविश्वेदेवाद्वादशाक्षरेणजगतीमुदजयँस्ता
मुज्जैषंवसवस्त्रयोदशाक्षरेण ॥ ३३ ॥ वसवस्त्रयोदशाक्षरेण । त्रयो
दशꣳस्तोममुदजयँस्तमुज्जैषꣳरुद्राश्चतुर्दशाक्षरेणचतुर्दशꣳस्तो
ममुदजयँस्तमुज्जैषमादित्याःपञ्चदशाक्षरेणपञ्चदशꣳस्तोममुद

जयुँस्तमुज्जेषमादितिꣳषोडशाक्षरेणषोडशꣳस्तोममुदजयत्तमुज्जे
षम्प्रजापतिꣳसप्तदशाक्षरेणसप्तदशꣳस्तोममुदजयत्तमुज्जेषम् ॥
॥ ३४ ॥ [४]। एषते। निर्ऋतेभागस्तञ्जुषस्वस्वाहाग्निनेत्रेभ्योदेवे
भ्यः÷पुरꣳसद्भ्यꣳस्वाहायमनेत्रेभ्योदेवेभ्योदक्षिणासद्भ्यꣳस्वाहा
विश्वदेवनेत्रेभ्योदेवेभ्यः÷पश्चात्सद्भ्यꣳस्वाहामित्रावरुणनेत्रे
भ्योवामरुन्नेत्रेभ्योवादेवेभ्यऽउत्तरासद्भ्यꣳस्वाहासोमनेत्रेभ्यो
देवेभ्यऽउपरिसद्भ्योदुवस्वद्भ्यꣳस्वाहा ॥ ३५ ॥ येदेवाऽअग्निने

त्राᳪपुरᳪसदुस्तेभ्युᳪस्वाहायेदेवायमनैत्रादक्षिणासदुस्तेभ्युᳪ
स्वाहायेदेवाविश्वदेवनेत्राᳪपश्चात्सदुस्तेभ्युᳪस्वाहायेदेवामित्रा
वरुणनेत्रावामरुन्नेत्रावोत्तरासदुस्तेभ्युᳪस्वाहायेदेवाःसोमनेत्रा
ऽउपरिसदोदुवस्वन्तस्तेभ्युᳪस्वाहा ॥ ३६ ॥ अग्नेसहस्व ॥ अग्ने
सहस्वपृतनाऽअभिमातीरपास्य ॥ दुष्टरस्तरन्नरातीर्वर्च्चोधायज्ञवा
हसि ॥३७॥ देवस्यत्वा ॥ सवितुःप्रसवेश्विनोर्बाहुभ्याम्पूष्णो
हस्ताभ्याम् ॥ उपाᳪशोर्वीर्य्येणजुहोमिहतᳪरक्षᳪस्वाहारक्षसा

संहि. ॥७२॥

न्त्वाबृधायायावोधिष्म्मुरक्षोवोधिष्म्मामुमसौहुतः ॥ ३८॥ [४] सवि
ताच्त्वासुवानांᳬसुवतामुग्निर्गृहपंतीनाᳬसोमोव्वनुस्प्पतीनाम् ॥
बृहुस्प्पतिर्व्वाचऽइन्द्रोज्ज्यैष्ठ्यांयरुद्रःपुशुभ्भ्यौमित्रःसुत्त्योव्वरुणो
धर्म्मपतीनाम् ॥ ३९ ॥ इमन्देवाः ॥ इमन्देवाऽअसपत्नᳬसुवद्ध
म्महुतेक्षुत्रायमहुतेज्ज्यैष्ठ्यायमहुतेजानंराज्ज्यायेन्द्रस्येन्द्रियाय ॥
इममुमुष्ष्यपुत्रमुमुष्ष्यैपुत्रमुस्यैव्विशऽएषवोमीराजासोमोस्म्मा
कम्ब्राह्मणानाᳬराजा ॥ ४० ॥ [२] ॥ ८ ॥ इतिश्रीवाजसनेयसं

पू.अ. ॥९॥ ॥७२॥

हितायानवमोऽध्यायः ॥ ९ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सू
त्रम् ॥ अपोदेवाश्चतस्रःसोमस्यत्विषिःपंचावेष्टाःसप्तसोमस्यत्वाच
तस्रइंद्रस्यवज्रःपंचस्योनासिचतस्रःसवित्रेकाश्विभ्यांचतस्रोष्टौच
तुस्त्रिꣳशत् ॥ हरिःॐअपोदेवाः ॥ अपोदेवामधुमतीरगृभ्णन्नूर्ज
स्वतीराजस्वश्चितानाः ॥ याभिर्म्मित्रावरुणावभ्यषिंचन्याभि
रिन्द्रमनयन्नत्यरातीः ॥ १ ॥ वृष्ष्णऽऊर्मिः ॥ वृष्ष्णऽऊर्म्मि
रसिराष्ट्रदाराष्ट्रम्मेदेहिस्वाहावृष्ष्णऽऊर्म्मिरसिराष्ट्रदाराष्ट्रममुष्मै

देहिवृषसेनोसिराष्ट्रदाराष्ट्रम्मैदेहिस्वाहावृषसेनोसिराष्ट्रदाराष्ट्रममु
ष्मैदेह्युत्थैंतस्त्थ ॥ २ ॥ अत्थैंतस्त्थराष्ट्रदाराष्ट्रम्मैदत्तस्वाहात्थैं
तस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तौजस्वतीस्त्थराष्ट्रदाराष्ट्रम्मैदत्तस्वाहौ
जस्वतीस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तापःपरिवाहिणीस्त्थराष्ट्रदारा
ष्ट्रम्मैदत्तस्वाहापःपरिवाहिणीस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तापाम्प
तिरसिराष्ट्रदाराष्ट्रम्मैदेहिस्वाहापाम्पतिरसिराष्ट्रदाराष्ट्रममुष्मैदे

ह्यपाङ्भौंसिराष्ट्रदाराष्ट्रम्मैंदेहिस्वाहापाङ्भौंसिराष्ट्रदाराष्ट्रममु
ष्म्मैंदेहिसूर्य्यत्त्वचसस्त्थ ॥३॥ सूर्य्यत्त्वचसस्त्थ । राष्ट्रदाराष्ट्रम्मै
दत्तस्वाहासूर्य्यत्त्वचसस्त्थराष्ट्रदाराष्ट्रममुष्म्मैदत्तसूर्य्यवर्चसस्त्थ
राष्ट्रदाराष्ट्रम्मैदत्तस्वाहासूर्य्यवर्चसस्त्थराष्ट्रदाराष्ट्रममुष्म्मैदत्तमा
न्दास्त्थराष्ट्रदाराष्ट्रम्मैदत्तस्वाहामान्दास्त्थराष्ट्रदाराष्ट्रममुष्म्मैद
त्तव्रजक्षितस्त्थराष्ट्रदाराष्ट्रम्मैदत्तस्वाहाव्रजक्षितस्त्थराष्ट्रदाराष्ट्रम

मुष्मैदत्तवाशास्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहावाशास्त्थराष्ट्रदाराष्ट्र
ममुष्मैदत्तशविष्ठास्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहाशविष्ठास्त्थराष्ट्र
दाराष्ट्रममुष्मैदत्तशक्करीस्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहाशक्करीस्त्थ
राष्ट्रदाराष्ट्रममुष्मैदत्तजनभृतस्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहाजनभृ
तस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तविश्वभृतस्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वा
हाविश्वभृतस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तापःस्वराजस्त्थराष्ट्रदाराष्ट्र

मुमुष्म्मैदत्त ॥ मधुमतीर्म्मधुमतीभिः पृच्यन्ताम्महिक्षत्रङ्क्षत्रियां
यव्वन्वानाऽअनाधृष्टाः सीदतसहौजसोमहिक्षत्रङ्क्षत्रियायदधतीः
॥ ४ ॥ [४] शतम् ॥ ४०० ॥ सोमस्यत्त्विषिः ॥ सोमस्यत्त्विषिर
सितवेवमेत्त्विषिर्भूयात् ॥ अग्नयेस्वाहासोमायस्वाहासवित्रेस्वा
हासरस्वत्यैस्वाहापूष्णेस्वाहाबृहस्पतयेस्वाहेन्द्रायस्वाहाघोषा
यस्वाहाश्लोकायस्वाहाऽंशायस्वाहाभगायस्वाहार्य्यम्णेस्वाहा
॥ ५ ॥ पवित्रेस्त्थः ॥ पवित्रेस्त्थोवैष्णव्यौसवितुर्वःप्रसव

संहि· ऽउत्पुनाम्म्यच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः ॥ अनिभृष्टमासि पू. अ.

॥७५॥ वाचोबन्धुस्तपोजाःसोमस्यदात्रमसिस्वाहाराजस्वः ॥ ६ ॥ सध ॥१०॥

मादोद्युम्म्निनीः ॥ सधमादोद्युम्म्निनीरापऽएताऽअनाधृष्टाऽअप

स्योवसानाः ॥ पस्त्यासुचक्रेवरुणःसधस्थमपाᳪंशिशुर्म्मातृत

मास्वन्तः ॥ ७ ॥ क्षत्रस्योल्बम् ॥ क्षत्रस्योल्बमसिक्षत्रस्यज

राय्वसिक्षत्रस्ययोनिरसिक्षत्रस्यनाभिरसीन्द्रस्यवार्त्रघ्नमसिमि ॥७५॥

त्रस्यासिवरुणस्यासित्वयायंवृत्रंवधेत् ॥ दृवासिरुजासिक्षुमासि ॥

पातैनम्प्राञ्चम्पातैनंम्प्रत्यञ्चम्पातैनंन्तिर्य्यञ्चन्दिग्भ्यश्पांत ॥ ८ ॥
आविर्म्मर्य्याऽ ॥ आविर्म्मर्य्याऽआवित्तोऽअग्निर्गृहपतिरावित्त
ऽइन्द्रोवृद्धश्रवाऽआवित्तौमित्रावरुणौधृतव्रतावावित्तंपूषाविश्व
वेदाऽआवित्तेद्यावापृथिवीविश्वशंम्भुवावावित्तादितिरुरुशंर्म्मा ॥
॥ ९ ॥ [५] अवेष्टादन्दशूकाः ॥ अवेष्टादन्दशूकाःप्राचीमारोह
गायत्रीत्त्वावतुरथन्तरꣳसामंत्रिवृत्स्तोमोवसन्तऽऋतुर्ब्रह्मद्रविण
न्दक्षिणामारोह ॥ १० ॥ दक्षिणामारोह । त्रिष्टुप्त्वावतुबृहत्साम

पञ्चदुशस्तोमोग्ग्रीष्म्मऽऋतुश्क्षत्रन्द्रविंणम्प्रतीचीमारोंह ॥ ११ ॥
प्रतीचीमारोंह । जगंतीत्त्वावतुवैरूपꣳसामंसप्तदुशस्तोमोव्वर्षाऽ
ऋतुर्व्विड्द्रविंणमुदीचीमारोंह ॥१२॥ उदींचीमारोंहानुष्टुप्त्वावतुवैरा
जꣳसामैकविꣳशस्तोमं÷शुरदृतुश्फलन्द्रविंणमूर्द्धामारोंह ॥१३॥
ऊर्द्ध्वामारोंह । पुङ्क्तिस्त्वांवतुशाक्करैवृतेसामंनीत्रिणवत्त्रयस्त्रिꣳशौ
स्तोमौहेमन्तशिशिरावृतूवर्च्चोद्द्रविंणम्प्रत्यंस्तन्नमुंचेꣳशिरं÷॥१४॥
सोमंस्यत्त्विषिं÷ ॥ सोमंस्यत्त्विषिंरसितवैवमेत्विषिंर्भूयात् ॥ मृ

त्योश्पाह्योजौसिसहौस्यमृतंमसि ॥ १५ ॥ हिरंण्ण्यरूपाऽउषसौ
विरोकऽउभाविंन्द्राऽउदिथःसूर्य्यंश्च ॥ आरौहतंवरुणमित्रगर्तन्त
तंश्चक्षाथामदितिन्दितिंञ्चमित्रोसिवरुंणोसि ॥१६॥ [७] सोमंस्य
त्वाद्युम्नेनाभिषिंञ्चाम्म्यग्नेर्भ्राजसासूर्य्यंस्यवर्च्चसेन्द्रंस्येन्द्रिये
णं ॥ क्षत्राणांङ्क्षत्रपंतिरेध्यतिंदिद्यून्पांहि ॥ १७॥ इमन्देंवाः ॥ इमन्दे
वाऽअसपत्नꣳसुवंध्वम्महतेक्षत्रायंमहतेज्ज्यैष्ठ्यांयमहतेजानंरा
ज्यायेन्द्रंस्येन्द्रियायं ॥ इमममुष्यंपुत्रममुष्यैपुत्रमस्यैविशऽएष

वौमीराजासोमोस्म्माकम्ब्राह्मणानाᳬंराजा ॥१८॥ प्रपर्वतस्य ॥ वृ
षभस्यपृष्ठान्नावंश्चरन्तिस्वसिचंऽइयानाः ॥ ताऽआवंवृत्रन्नधरागु
दंक्ताऽअहिम्बुध्न्युमनुरीयमाणाः ॥ विष्णोर्विक्रमणमसिविष्णो
र्विक्रान्तमसिविष्णोःक्रान्तमसि ॥ १९ ॥ प्रजापतेन । त्वदे
तान्यन्न्योविश्वारूपाणिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽ
अस्त्वयममुष्य्यपितासावस्यपितावयᳬंस्यामपतयोरयीणाᳬंस्वा
हा ॥ रुद्रयत्तेक्रिविपरन्नामतस्मिन्हुतमस्यमेष्टमसिस्वाहा ॥२०॥

 इन्द्र॑स्य॒वज्ज्र॑÷ ॥ इन्द्र॑स्य॒वज्ज्रो॑ऽसिमि॒त्रावरु॑णयोस्त्वाप्प्रशा॒
स्त्रोः॒प्प्र॒शिषा॑यु॒नज्म्मि ॥ अव्व्य॑थायै॒त्त्वास्व॒धायै॒त्त्वारि॑ष्टो॒ऽअर्ज्जु॑नो
म॒रुताम्प्रसवेन॑ज॒यापा॑म॒मन॑सा॒समि॑न्द्रि॒येण॑ ॥ २१ ॥ मातै॑ ॥ मात॑
ऽइन्द्र ते॒व॒यन्तु॑राषा॒डयु॑क्तासो॒ऽअब्र॒ह्मता॒विद॑साम ॥ तिष्ठा॒रथ॒म
धि॒यंव॒ज्ज्रह॒स्तार॒श्म्मीन्दे॑वयमसे॒स्वश्वान् ॥ २२ ॥ अ॒ग्नये॑गृ॒हप॑त
ये ॥ अ॒ग्नये॑गृ॒हप॑तये॒स्वाहा॒सोमा॑य॒वन॒स्प्पत॑ये॒स्वाहा॑म॒रुता॒मोज॑से॒
स्वाहेन्द्र॑स्येन्द्रि॒याय॒स्वाहा॑ ॥ पृथि॑विमात॒र्म्मामा॑हिꣳसी॒र्म्मोऽअ॒ह

न्त्वाम् ॥ २३ ॥ हꣳसःशुंचिषत् ॥ हꣳसःशुंचिषद्वसुंरन्तरिक्षस
द्धोतांवेदिषदतिंथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागो
जाऽऋतजाऽअद्रिजाऽऋतम्बृहत् ॥ २४ ॥ इयंदसि ॥ इयंदस्यायुंर
स्यायुर्म्मयिधेहियुङ्ङसिवर्च्चोसिवर्च्चोमयिधेह्यूर्ग्गस्यूर्ज्जम्मयिधेहि ॥
इन्द्रस्यवांवीर्य्यकृतौबाहूऽअभ्युपावहरामि ॥ २५ ॥ [५] स्योना
सि । सुषदासिक्षत्रस्ययोनिरसि ॥ स्योनामासीदसुषदामासीदक्ष
त्रस्ययोनिमासीद ॥ २६ ॥ निषसाद ॥ धृतव्रतोवरुणःपस्त्यास्वा ॥

साम्म्राज्ज्यायसुक्क्रतुः ॥ २७ ॥ अभिभूरसि ॥ अभिभूरस्येतास्ते
पञ्चदिशः कल्पन्ताम्ब्रह्मँस्त्वम्ब्रह्मासिसवितासिसत्यप्प्रसवोव्व
रुणोसिसत्यौजाऽइन्द्रोसिविशौजारुद्रोसिसुशेवः ॥ बहुकारश्रे
यस्करभूयस्करेन्द्रस्यवज्ज्रोसितेनमेरध्य ॥ २८ ॥ अग्निः पृथुः ॥
अग्निः पृथुर्द्धर्म्मणस्पतिर्ज्जुषाणोऽअग्निः पृथुर्द्धर्म्मणस्प्पतिराज्ज्य
स्यवेतुस्वाहास्वाहाकृताऽ सूर्य्यस्यरश्मिभिर्य्यतद्ध सजातानां
म्मद्ध्यमेष्ठ्याय ॥ २९ ॥ [४ सवित्राप्प्रसवित्रा । सरस्वत्यावा

चात्वष्ट्रांरूपैश्पूष्णापशुभिरिन्द्रेणास्म्मेबृहस्प्पतिनाब्ब्रह्मणाव
रुणेनौजंसाग्ग्निनातेजंसासोमेनराज्ञाव्विष्णुनादशम्म्यादेवतंया
प्प्रसूंतुङ्प्प्रसर्प्पामि ॥३०॥ [१]अश्श्विब्भ्यांम्पच्चयस्व ॥ अश्श्विब्भ्या
म्पच्चयस्वसरंस्वत्यैपच्च्यस्वेन्द्रायसुत्राम्म्णेपच्चयस्व ॥ व्वायुश्पूतश्प
वित्रेणप्प्रत्यङ्क्सोमोऽअतिस्स्रुतङ् ॥ इन्द्रंस्ययुज्ज्यङ्सखा ॥ ३१ ॥
कुविदुङ्ग । यवंमन्तोयवंञ्चिद्यथादान्त्यंनुपूर्व्वंव्वियूय ॥ इहेहैषाङ्कृ
णुहिभोजंनानियेबर्हिषोनमंऽउक्तिंय्यजंन्ति ॥ उपयामगृहीतो

स्याश्विभ्यान्त्वासरस्वत्यैत्त्वेन्द्रायत्त्वासुत्राम्मणे ॥ ३२ ॥ युवꣳसु
रामम् ॥ युवꣳसुराममश्विनानमुंचावासुरेसचा ॥ विपिपानाशुभ
स्पतीऽइन्द्रङ्कर्म्मस्वावतम् ॥ ३३ ॥ पुत्रमिवपितरौ ॥ पुत्रमिवपि
तरावश्विनोभेन्द्रावथुङ्काव्यैर्द्दꣳसनाभिः ॥ यत्सुराम्म्व्यपिबःशच
चीभिःसरस्वतीत्त्वामघवन्नभिष्णक् ॥ ३४ ॥ [४] ॥ ८ ॥ इतिश्री
वाजसनेयसंहितायादशमोऽध्यायः ॥१०॥ श्रीवेदपुरुषायनमः ॥
अनुवाक्सूत्रम् ॥ युंजानएकादशप्रतूर्त्तꣳषोडशदेवस्यत्वादशापो

देवीर्द्वादशापो ह्येकादशादितिर्द्वापंचाकूतिमष्टादशसप्तत्र्यशीतिः ।
हरिः ॐ युञ्जानः प्प्रथमम् ॥ युञ्जानः प्प्रथमम्मनस्तत्त्वायसविता
धियः ॥ अग्ग्नेर्ज्योतिर्न्निचाय्यपृथिव्या ऽअध्याभरत् ॥ १ ॥ युक्के
नमनसा । व्वयन्देवस्यसवितुःसवे ॥ स्वर्ग्ग्यायशक्क्या ॥२॥ युक्का
यसविता । देवान्त्स्वर्य्यतोधियादिवम् ॥ बृहज्ज्योतिःकरिष्ष्यतः
सवितापप्रसुवातितान् ॥ ३ ॥ युञ्जतेमनः ॥ युञ्जतेमन ऽउतयुञ्ज
तेधियोव्विप्प्राव्विप्प्रस्यबृहतोव्विपश्चितः ॥ व्विहोत्त्रादधेव्वयुनावि

देकऽइन्मुहीदेवस्यंसवितुःपरिष्टुतिः ॥ ४ ॥ युजेवाम् ॥ युजेवाम्ब्र
ह्मंपूर्व्यन्नमोभिर्विश्लोकंऽएतुपथ्येवसूरेः ॥ शृण्वन्तुविश्वेऽअमृ
तस्यपुत्राऽआयेधामानिदिव्यानितस्थुः ॥ ५ ॥ यस्यप्प्रयाणम् ।
यस्यप्प्रयाणमन्वन्न्यऽइद्ययुर्देवादेवस्यमहिमानमोजसा ॥ यः
पार्थिवानिविममेसऽएतशोरजांसिदेवःसवितामहित्वना ॥ ६ ॥
देवंसवितः ॥ देवंसवितःप्प्रसुवयज्ञम्प्रसुवयज्ञपतिम्भगाय ॥ दि
व्योगंधर्वःकेतपूःकेतन्नःपुनातुवाचस्पतिर्वाचंनःस्वदतु ॥ ७ ॥

इमन्नं÷ ॥ इमन्नोदेवसवितर्य्यज्ञम्प्रणयदेवाव्व्यꣳसखिविदꣳसत्रा
जितन्धनजितꣳस्वर्जितम् ॥ ऋचास्तोमꣳसमर्द्धयगायत्रेणरथ
न्तरम्बृहद्गायत्रवर्त्तनिस्वाहा ॥ ८ ॥ देवस्यत्त्वा । सवितुःप्प्रसवेश्श्वि
नोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् ॥ आददेगायत्रेणच्छन्दसाङ्गि
रस्वत्त्पृथिव्व्याःसधस्थादग्निम्पुरीष्ष्यमङ्गिरस्वदाभरत्रैष्टुभेनच्छ
न्दसाङ्गिरस्वत् ॥ ९ ॥ अब्भ्रिरसि । नार्य्यसित्त्वयाव्वयमग्निꣳश
केमखनितुꣳसधस्थऽआ ॥ जागतेनच्छन्दसाङ्गिरस्वत् ॥ १० ॥

हस्तंऽआधाय । सविताबिभ्रदभ्रिꣳहिरण्ययीम् ॥ अग्नेर्ज्योति
र्न्निचाय्यंपृथिव्याऽअध्याभरदानुष्टुभेनच्छन्दसाङ्गिरस्वत् ॥ ११ ॥
[११] प्रतूर्त्तंवाजिन् ॥ प्रतूर्त्तंवाजिन्नाद्द्रववरिष्ठामनुसंवतम् ॥ दि
वितेजन्मंपरममन्तरिक्षेतवनाभिः पृथिव्यामधियोनिरित् ॥ १२ ॥
युञ्जाथाꣳरासभम् ॥ युञ्जाथाꣳरासभंयुवमस्मिन्यामेवृषण्व
सू ॥ अग्निम्भरन्तमस्मयुम् ॥ १३ ॥ योगेयोगेतवस्तरम् ॥ योगेयो
गेतवस्तरंवाजेवाजेहवामहे ॥ सखायऽइन्द्रमूतये ॥ १४ ॥ प्रतूर्वन्ने

हिं ॥ प्रतूर्व्वन्नेह्यवक्रामन्नशंस्तीरुद्रस्यगाणंपत्त्यम्मयोभूरेहिं ॥ उर्व्वं
न्तरिंक्षंव्वीहिस्वस्तिगंव्यूतिरभंयानिकृण्वन्पूष्णासयुजांसह ॥१५॥
पृथिव्याःसधस्त्थात् ॥ पृथिव्याःसधस्त्थांदग्निम्पुंरीष्यमाङ्गि
रस्वदाभंराग्निम्पुंरीष्यमाङ्गिरस्वदच्छेमोग्निम्पुरीष्यमाङ्गिरस्वद्भं
रिष्यामः ॥ १६ ॥ अन्वग्निः ॥ अन्वग्निरुषसामग्ग्रंमक्ख्यद
न्वहांनिप्प्रथमोजातवेदाः ॥ अनुसूर्य्यंस्यपुरुत्राचंरश्म्मीननुद्यां
वांपृथिवीऽआततंथ ॥१७॥ आगत्त्यंव्वाजी ॥ आगत्त्यंव्वाज्ज्यद्धांनः

सर्व्वाम्मृधोव्विधूनुते ॥ अग्निꣳसधस्त्थेमहतिचक्षुषानिचिकीषते
॥१८॥ आक्रम्म्यंव्वाजिन् ॥ आक्रम्म्यंव्वाजिन्पृथिवीमग्निमिच्छरु
चात्त्वम् ॥ भूम्म्यांव्वृत्त्वायंनोब्रूहियतङ्खनेमतंव्वयम् ॥ १९ ॥ द्यौ
स्ते । पृष्टम्पृथिवीसधस्त्थमात्मान्तरीक्षꣳसमुद्रोयोनिः ॥ व्वि
ख्यायचक्षुषात्त्वमभितिष्ठपृतन्न्यतः ॥२०॥ उत्त्क्राम । महतेसौ
भगायास्म्मादास्त्थानाद्द्रविणोदाव्वाजिन् ॥ व्वयꣳस्यामसुमतौ
पृथिव्याऽअग्निङ्खनन्तऽउपस्थेअस्याः ॥२१॥ उदक्क्रमीत् ॥ उदक्क

संहि. ॥८३॥ मीढ्द्रविणोदाव्वाज्यर्व्वाकुऽंसुलोकꣳसुकृतम्पृथिव्याम् ॥ ततःखने पू. अ. ॥११॥

मसुप्प्रतीकमग्निꣳस्वोरुहाणाऽअधिनाकमुत्तमम् ॥ २२ ॥ आत्त्वा

जिघर्म्मिमनसाघृतेनप्प्रतिक्षियन्तम्भुवनानिव्विश्श्वा ॥ पृथुन्तिर

श्श्चावयसाबृहन्तंव्यचिष्ठमन्नैरभसन्दृशानम् ॥ २३ ॥ आविश्श्वतः।

प्प्रत्त्यञ्चञ्जिघर्म्म्यरक्षसामनसातज्जुषेत ॥ मर्य्यश्श्रीस्पृहयद्वर्णोऽ

अग्निर्न्नाभिमृशैतन्व्वाजर्भुराणऽं ॥ २४ ॥ परिव्वाजपतिऽं ॥ परि ॥८३॥

वाजपतिऽंकविरग्निर्हव्यान्यक्रमीत् ॥ दधद्रत्नानिदाशुषे ॥२५॥

परि॑त्वा । ग्ग्ने॒पुरं॑व॒यंव्विप्प्र॑ꣳसहस्यधीमहि ॥ धृ॒षद्व॑र्ण्णन्दि॒वेदि॑वेह॒
न्तारम्भङ्गु॒राव॑ताम् ॥ २६ ॥ त्वम॑ग्ने॒ । द्युभि॒स्त्वमा॑शुशु॒क्षणि॒स्त्वम॒
द्भ्यस्त्वमश्म्म॑नु॒स्प्परि॑ ॥ त्वंव्वने॑ब्भ्यु॒स्त्वमोष॑धीब्भ्यु॒स्त्वन्नृ॒णान्नृ॑पते
जाय॒से॒शुचि॑ः ॥ २७ ॥ [१६] दे॒वस्य॑त्त्वा । सवि॒तुः प्प्र॑स॒वे॒श्श्विनो॑र्ब्बा॒
हुब्भ्या॑म्पू॒ष्ण्णोहस्ता॑ब्भ्याम् ॥ पृ॒थि॒व्व्याःस॒धस्त्था॑दु॒ग्ग्निम्पु॑री॒ष्व्य॒
मङ्गि॑र॒स्वत्त्ख॑नामि ॥ ज्योति॑ष्म्मन्तन्त्वाग्ग्नेसु॒प्प्रती॑क॒मजस्स्रेणभा॒
नुना॒दीद्य॑तम् ॥ शि॒वम्प्र॒जाब्भ्योहि॑ꣳसन्तम्पृथि॒व्व्याः स॒धस्त्था॑द॒

ग्निम्पुरीष्यमङ्गिरस्वच्छ्वंनामऽ ॥ २८॥ अपाम्पृष्ठम् ॥ अपाम्पृष्ठ
मंसियोनिरग्नेःसंमुद्रमभितऽपिन्वंमानम् ॥ वर्द्धमानोमहाँ२ऽ
आचपुष्करैदिवोमात्रंयावरिम्णाप्प्रंथस्व ॥२९॥ शर्म्मंच ॥ शर्म्मं
चस्त्थोवर्म्मंचस्त्थोछिंद्रेबहुलेऽउभे ॥ व्यचंस्वतीसंवंसाथाम्भृत
मग्निम्पुरीष्यम् ॥ ३० ॥ संवंसाथाम् ॥ संवंसाथाᳬंस्वर्विदासमी
चीऽउरंसात्त्मनां ॥ अग्निमन्तर्ब्भंरिष्यन्तीज्योतिष्मन्तमजं
स्रमित् ॥ ३१ ॥ पुरीष्योसि । विश्वभंराऽअथंर्वात्त्वाप्प्रथमोनिरं

मन्थदग्ने ॥ त्वामग्ने पुष्कराद्ध्यथर्वा निरमन्थत ॥ मूर्ध्नो विश्वस्य
वाघतः ॥ ३२ ॥ तमुत्वा । दुध्यङ्ङृषिः पुत्र ऽईधे ऽअथर्वणः ॥ वृत्रह
णम्पुरन्दरम् ॥ ३३ ॥ तमुत्वा । पाथ्यो वृषा समीधे दस्युहन्तमम् ॥
धनञ्जयꣳ रणेरणे ॥ ३४ ॥ सीदहोतः ॥ सीदहोतः स्व ऽउलोके चि
कित्वान्त्सादया यज्ञꣳ सुकृतस्य योनौ ॥ देवावीर्देवान्हविषा यजा
स्यग्ने बृहद्यजमाने वयोधाः ॥ ३५ ॥ निहोता । होतृषदने विदान
स्त्वेषो दीदिवाँ२ ऽअसदत्सुदक्षः ॥ अदब्धव्रतप्रमतिर्वसिष्ठः सह

सं. १५

स्रम्भरश्शुचिंजिह्वोऽअग्निः ॥ ३६ ॥ सꣳसीदस्व ॥ सꣳसीदस्वम
हाँ२ अंसिशोचंस्वदेववीतंमः ॥ विधूममंग्नेऽअरुपम्मिंयेद्ध्यसृज
प्प्रंशस्तदर्शतम् ॥३७॥ [१०] अपोदेवीः ॥ अपोदेवीरुपंसृजमधुं
मतीरयक्ष्मायंप्प्रजाब्भ्यंः ॥ तासांमास्त्थानादुज्जिहतामोषंधयः
सुपिप्पलाः ॥ ३८ ॥ सन्तें । वायुर्म्मातरिश्श्वांदधातूत्तानायाहृदंयं
य्यद्विकंस्तम् ॥ योदेवानाञ्चरंसिप्प्राणथेंनकस्म्मैंदेववषंडस्तुतुब्भ्यं
म् ॥ ३९ ॥ सुजातोज्ज्योतिंषा । सहशर्म्मवरूथमासंदत्स्वः ॥ वा

सोऽअग्नेविश्वरूपꣳसंव्ययस्वविभावसो ॥ ४० ॥ उदुतिष्ठ । स्वध्व
रावानोदेव्याधिया ॥ दृशेचभासाबृहतासुशुक्वनिराग्नेयाहिसुश
स्तिभिः ॥ ४१ ॥ ऊर्ध्वऽऊषुणः ॥ ऊर्ध्वऽऊषुणऽऊतयेतिष्ठादेवोन
सविता ॥ ऊर्ध्वोवाजस्यसनितायदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥ ४२ ॥
सजातः ॥ सजातोगर्भोऽअसिरोदस्योरग्नेचारुर्विभृतऽओषधीषु ॥
चित्रःशिशुःपरितमाꣳस्यक्तून्प्रमातृभ्योऽअधिकनिक्रदद्गाः ॥
॥ ४३ ॥ स्थिरोभव । वीड्वङ्गऽआशुर्भववाज्यर्वन् ॥ पृथुर्भवसुष

दुस्त्वमग्ग्नेश्पुरीषवाहंणः ॥ ४४ ॥ शिवोभंव । प्प्रजाब्भ्योमानुंषी
ब्भ्युस्त्वमंङ्गिरः ॥ माद्यावांपृथिवीऽअभिशोंचीर्म्मान्तरिक्षुम्मा
वनस्प्पतीन् ॥ ४५ ॥ प्रैतु । व्वाजीकनिंक्क्रदुन्नानंदद्द्रासंभुःपत्वां ॥
भरंन्नुग्निम्पुंरीष्ष्युम्मापाद्यायुंषःपुरा ॥ वृषाग्निम्वृषंणम्भरंन्नुपाङ्ग
ब्भंः समुद्द्रियंम् ॥ अग्नऽआयांहिवीतयें ॥ ४६ ॥ ऋतः सुत्त्यमृतः
सुत्यमग्निम्पुंरीष्ष्यमङ्गिरस्वद्भरामः ॥ ओषंधयुःप्प्रतिंमोदद्ध्वमग्नि
मेतः शिवमायन्तंमुब्भ्यत्रंयुष्ष्माः ॥ व्यस्युन्विश्वाऽअनिराऽअ

मीवानिषीदन्नोऽअपदुर्म्मतिञ्जहि ॥४७॥ ओषधयꣳप्प्रति ॥ ओष
धयꣳप्प्रतिगृब्भ्णीतपुष्पवतीꣳसुपिप्पलाः ॥ अयंव्वोगर्ब्भऽऋत्त्वि
यः प्प्रत्नꣳसधस्त्थमासदत् ॥ ४८ ॥ विपाजसा । पृथुनाशोशुचा
नोबाधस्वद्विषोरक्षसोऽअमीवाः ॥ सुशर्म्मणोबृहतःशर्म्मणिस्या
मग्नेरहꣳसुहवस्यप्प्रणीतौ ॥ ४९ ॥ [१२] आपोहि । ष्ठामयोभुव
स्तानऽऊर्ज्जेदधातन ॥ महेरणायचक्षसे ॥५०॥ योवः । शिवतमोर
सस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥५१॥ तस्म्माऽअरम् ॥

तस्म्मा॒ऽअरङ्गमामवो॒यस्य॒क्षया॑यजिन्वथ ॥ आपो॑ज॒नय॑थाचनः
॥५२॥मि॒त्रश्स॒ह्सृज्ज्य॑ । पृ॒थि॒वीम्भूमि॑ञ्च॒ज्ज्योति॑षास॒ह॥सु॒जा॑तञ्जा
तवे॑द॒सम॒य॒क्ष्माय॑त्त्वा॒सह्सृ॑जामि॒प्र॒जाब्भ्य॑ः॥ ५३ ॥ रु॒द्राश्स॒ह्सृ
ज्ज्य॑ । पृ॒थि॒वीम्बृ॒हज्ज्योति॒ःसमी॑धिरे ॥ तेषा॑म्भा॒नुर॑जस्र॒ऽइच्छु॒क्को
दे॒वषु॑रोचते ॥ ५४ ॥ सह्सृ॑ष्टां॒वसु॑भिः ॥ सह्सृ॑ष्टां॒वसु॑भीरु॒द्रैर्द्धीरैः
कर्म्म॒ण्ण्या॒म्मृदम् ॥ ह॒स्ता॑ब्भ्याम्मृ॒द्वीङ्कृ॒त्त्वासि॑नीवा॒लीक्कृ॑णोतुता
म॥५५॥ सि॒नी॒वा॒लीसु॑कप॒र्द्दा । सु॒कुमा॒री॒रा॒स्वौ॑प॒शा॥ सा॒तुब्भ्य॑मदि

तेमह्योखान्दधातुहस्तयोः ॥५६॥ उषाङ्कृणोतु । शक्त्याबाहुभ्या

मदितिर्द्धिया ॥ मातापुत्त्रंय्यथोपस्थेसाग्निम्बिभर्तुगर्ब्भऽआ ॥

मखस्यशिरोंसि ॥ ५७॥ वसवस्त्वा । कृण्ण्वन्तुगायत्त्रेणच्छन्दसा

ङ्गिरस्वद्ध्रुवासिपृथिव्व्यसिधारयामयिप्प्रजाᳪंरायस्प्पोषङ्गौपत्त्यᳪं

सुवीर्य्यᳪंसजातान्न्यजमानायरुद्द्रास्त्वाकृण्ण्वन्तुत्त्रैष्टुभेनच्छन्दं

साङ्गिरस्वद्ध्रुवास्यन्तरिक्षमसिधारयामयिप्प्रजाᳪंरायस्प्पोषङ्गौप

त्त्यᳪंसुवीर्य्यᳪंसजातान्न्यजमानायादित्त्यास्त्वाकृण्ण्वन्तुजागते

नच्छन्दंसाङ्गिरस्वद्ध्रुवासिद्यौरसिधारयामयिंप्रजाᳬंरायस्पोष
ङ्गौपत्त्यᳬसुवीर्य्यᳬसजातान्यजमानायविश्वैत्त्वादेवावैश्वानराः
कृण्वन्त्वानुष्टुभेनच्छन्दंसाङ्गिरस्वद्ध्रुवासिदिशोसिधारयामयिं
प्रजाᳬंरायस्पोषङ्गौपत्यᳬसुवीर्य्यᳬसजातान्यजमानाय ॥
॥ ५८ ॥ अदित्यैरास्ना ॥ अदित्यैरास्नास्यदितिष्टेबिलङ्गृभ्णातु ॥
कृत्त्वायसामहीमुखामृन्मयींय्योनिमग्नये ॥ पुत्रेभ्यᳬप्रायच्छ
ददितिᳬश्रपयानिति॥५९॥वसंवस्त्वा। धूपयन्तुगायत्रेणच्छन्दसा

ङ्गिरस्वद्रुद्रास्त्वाधूपयन्तुत्रैष्टुभेनच्छन्दसाङ्गिरस्वदादित्त्यास्त्वा
धूपयन्तुजागतेनच्छन्दसाङ्गिरस्वद्विश्वेत्त्वादेवावैश्वानराधूपय
न्त्वानुष्टुभेनच्छन्दसाङ्गिरस्वदिन्द्रस्त्वाधूपयतुव्वरुणस्त्वाधूपयतु
व्विष्ष्णुस्त्वाधूपयतु ॥६०॥ [११] अदितिष्ट्वा । देवीव्विश्वदेव्यावती
पृथिव्याःसधस्त्थेऽअङ्गिरस्वत्खनत्ववटदेवानान्त्वापत्नीर्देवीर्व्वि
श्वदेव्यावतीःपृथिव्याःसधस्त्थेऽअङ्गिरस्वद्दधतूखेधिषणास्त्वादे
वीर्व्विश्वदेव्यावतीःपृथिव्याःसधस्त्थेऽअङ्गिरस्वदभीन्धतामुखेव्व

रू॒त्रीष्ट्वादेवीर्विश्वदेव्यावतीःपृथिव्याःसधस्थेऽअङ्गिरस्वच्छ्रपय
न्तूखेऽग्नास्त्वादेवीर्विश्वदेव्यावतीःपृथिव्याःसधस्थेऽअङ्गिरस्व
त्पचन्तूखेजनयस्त्वाच्छिन्नपत्रादेवीर्विश्वदेव्यावतीःपृथिव्याः
सधस्थेऽअङ्गिरस्वत्पचन्तूखे ॥ ६१ ॥ मित्रस्यचर्षणीधृतः ॥
मित्रस्यचर्षणीधृतोवोदेवस्यसानसि॥द्युम्नञ्चित्रश्रवस्तमम् ॥६२॥
देवस्त्वा। सवितोद्वपतुसुपाणिःस्वङ्गुरिःसुबाहुरुतशक्त्या ॥ अव्य
थमानापृथिव्यामाशादिशऽआपृण ॥ ६३ ॥ उत्थायबृहती। भवो

दुतिष्ठद्ध्रुवा त्वम् ॥ मित्रैतान्तऽउखाम्परिददाम्म्यभित्त्याऽएषामा
भेदि ॥६४॥ वसवस्त्वा । च्छृन्दन्तुगायत्रेणच्छन्दसाङ्गिरस्वद्रुद्रा
स्त्वाच्छृन्दन्तुत्रैष्टुभेनच्छन्दसाङ्गिरस्वदादित्त्यास्त्वाच्छृन्दन्तु
जागतेनच्छन्दसाङ्गिरस्वद्विश्वेत्त्वादेवावैश्वानराऽआच्छृन्दन्त्वा
नुष्टुभेनच्छन्दसाङ्गिरस्वत् ॥ ६५ ॥ [५] आकूतिमग्निम् ॥ आकू
तिमग्निम्प्रयुजꣳस्वाहामनोमेधामग्निम्प्रयुजꣳस्वाहाचित्तंवि
ज्ञातमग्निम्प्रयुजꣳस्वाहावाचोविधृतिमग्निम्प्रयुजꣳस्वाहाप्र

जापंतयेमनवेस्वाहाग्नयेवैश्वानुरायस्वाहा ॥ ६६ ॥ विश्वोदेव
स्यं । नेतुर्म्मर्त्तौवुरीतसुक्ख्यम् ॥ विश्वोरायऽइषुध्यातिद्युम्नंवृणीत
पुष्ष्यसेस्वाहा ॥ ६७ ॥ मासु । भित्त्थामासुरिषोम्वधृष्णुर्व्वीरयं
स्वसु ॥ अग्निश्चेदङ्करिष्ष्यथः ॥ ६८ ॥ द्दृढंहंस्वदेवि । पृथिविस्व
स्तयऽआसुरीमायास्वधयाकृतासि ॥ जुष्टन्देवेब्भ्यऽइदमस्तुहव्य
मरिष्टात्वमुदिहियज्ञेऽअस्मिन् ॥६९॥ द्वन्नःसर्प्पिरासुतिःप्प्रत्को
होताव्वरेण्यः ॥ सहसस्प्पुत्रोऽअद्भुतः ॥७०॥शतम् ॥५००॥ परस्या

ऽअधि। सुंव्वतोवंराँ२ऽअब्भ्यातंर ॥ यत्राहमस्म्मिताँ २ऽअंव ॥७१॥
पुरमस्यांःपरावतंः ॥ पुरमस्यांःपरावतौरोहिदंश्श्वऽइहागंहि ॥
पुरीष्ष्यःपुरुप्प्रियोग्ग्नेत्वन्तंरामृधंः ॥ ७२ ॥ यदंग्ग्ने । यदंग्ग्नेका
निकानिंचिदातेदारूंणिदुध्ध्मासिं ॥ सर्व्वन्तदंस्तुतेघृतन्तज्जुंषस्वय
विष्ठ्य ॥ ७३ ॥ यदत्त्ति ॥ यदत्त्युंपुजिह्विकायद्वम्म्रोऽअंतिसर्प्पंति ॥
सर्व्वन्तदंस्तुतेघृतन्तज्जुंषस्वयविष्ठ्य ॥ ७४ ॥ अहंरहरप्प्रंयावम् ॥
अहंरहरप्प्रंयावम्भरन्तोश्श्वायेवतिष्ठंतेघासमंस्म्मै ॥ रायस्प्पोषेण

॥९१॥ सम्मिषामदन्तोग्ग्नेमातेप्प्रतिवेशारिषाम ॥७५॥ नाभापृथिव्याः ।
समिधानेऽअग्नौरायस्पोषायबृहतेहवामहे ॥ इरम्मदम्बृहदुक्थं ॥११॥
य्यजत्रञ्जेतारमग्निम्पृतनासुसासहिम् ॥७६॥ याःसेनाः ॥ याः
सेनाऽअभीत्त्वरीराव्याधिनीरुगणाऽउत ॥ येस्तेनायेचतस्करास्ताँ
स्तेऽअग्नेपिदधाम्म्यास्ये ॥७७॥ दꣳष्ट्राभ्याम्मलिम्म्लून् ॥ दꣳ
ष्ट्राभ्याम्मलिम्म्लूञ्जम्भ्यैस्तस्कराँ२ऽउत ॥ हनुभ्याꣳस्तेनान्भ ॥९१॥
गवस्ताँस्त्वङ्खादसुखादितान् ॥७८॥ येजनेषु । मलिम्म्लवस्तेना

सुस्तस्कंराव्वनैं ॥ येकक्षैष्ष्वघायवुस्ताँस्तैंदधामिजम्भंयोः ॥ ७९॥
योऽअस्म्मब्भ्यंम् ॥ योऽअुस्म्मब्भ्यंमरातीयाद्यश्चंनोद्वेषंतेजनं÷ ॥
निन्दाद्योऽअुस्म्मान्धिप्प्सांच्चुसर्व्वन्तम्मंस्म्मुसाकुरु ॥८०॥ सꣳ
शितम्मे ॥ सꣳशितम्म्मेब्रह्मुसꣳशितंवीर्य्युम्बलंम् ॥ सꣳशितङ्क्षत्र
ञ्जिष्ष्णुयस्याहमस्म्मिपुरोहितः ॥ ८१ ॥ उदैंषाम् ॥ उदैंषाम्बाहु
ऽअंतिरमुद्वर्च्चोंऽअथोबलंम् ॥ क्षिणोमिब्रह्मंणामित्रानुन्नंयामि
स्वाँ२ऽअहम् ॥ ८२ ॥ अन्नंपतेन्नंस्य । नोदेह्यनमीवस्यंशुष्म्मिणं÷ ॥

प्रप्रंदातारंन्तारिषऽऊर्ज्जन्नोधेहिद्विपदेचतुष्पदे ॥ ८३ ॥ [१८॥]
इतिश्रीवाजसनेयसंहितायाएकादशोऽध्यायः ॥ ११ ॥ श्रीवेदपुरु
षायनमः ॥ अनुवाक्सूत्रम् ॥ दृशानःसप्तदशादिवस्परिद्वादशसमि
धाग्निंपंचदशापेतसप्तदशासुन्वंतंत्रयोदशयाओषधीसप्तविꣳशति
र्मामाषोडशसप्तसप्तदशꣳशतम् ॥ हरिःॐदृशानोरुक्मः ॥ दृशा
नोरुक्मऽउर्व्याव्यद्यौद्युर्म्मर्षमायुःश्रियेरुचानः ॥ अग्निरमृतोऽ ॥९२॥
अभवद्वयोभिर्य्यदेनन्द्यौरजनयत्सुरेताः ॥ १ ॥ नक्तोषासासमं

नसा । विरूपेधापयैतेशिशुमेकंᳬसमीची ॥ द्यावाक्षामारुक्मोऽ
अन्तर्विभातिदेवाऽअग्निन्धारयन्द्रविणोदाः ॥ २ ॥ विश्वारूपा
णि ॥ विश्वारूपाणिप्रतिमुञ्चतेकविःप्रासावीद्भद्रंद्विपदेचतुष्प
दे ॥ विनाकमख्यत्सविवितावरेण्योनुप्रयाणमुषसोविराजति ॥३॥
सुपर्णोसि । गरुत्माँस्त्रिवृत्तेशिरोगायत्रञ्चक्षुर्बृहद्रथन्तरेपक्षौ ॥
स्तोमऽआत्माच्छन्दाᳬंस्यङ्गानियजूᳬंषिनाम ॥ सामतेतनूर्वाम
देव्यंयज्ञायज्ञियम्पुच्छन्धिष्ण्याःशफाः ॥ सुपर्णोसिगरुत्मान्दि

वंङ्गच्छस्वः पत ॥४॥ विष्णोः क्रमः ॥ विष्णोः क्रमोऽसिसपत्नहा गायत्रञ्छन्दऽआरोह पृथिवीमनु विक्रमस्व विष्णोः क्रमोऽस्यभिमातिहा त्रैष्टुभञ्छन्दऽआरोहान्तरिक्षमनु विक्रमस्व विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतञ्छन्दऽआरोह दिवमनु विक्रमस्व विष्णोः क्रमोऽसि शत्रूयतो हन्तानुष्टुभञ्छन्दऽआरोह दिशोनु विक्रमस्व ॥ ५ ॥ अक्रन्ददग्निः ॥ अक्रन्ददग्निस्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ॥ सद्यो जज्ञानो विहीमिद्धो ऽअक्ख्यदारो

दसीभानुनाभात्यन्तः ॥ ६ ॥ अग्नेऽभ्यावर्त्तिन् ॥ अग्नेऽभ्यावर्त्ति
न्नभिमानिवर्त्तस्वायुषावर्च्चसाप्प्रजयाधनेन ॥ सन्न्यामेधयारय्या
पोषेण ॥ ७ ॥ अग्नेऽअङ्गिरः । शतन्तेसन्त्वावृतः सहस्रन्तऽउपा
वृतः ॥ अधापोषस्यपोषेणपुनर्न्नोनष्टमाकृधिपुनर्न्नोरयिमाकृधि ॥
॥८॥ पुनरूर्ज्जा । निवर्त्तस्वपुनरग्नऽइषायुषा ॥ पुनर्न्नःपाह्यꣳहसः
॥९॥ सहरय्या । निवर्त्तस्वाग्नेपिन्वस्वधारया ॥ विश्वप्प्स्न्यांवि
श्वतस्परि ॥ १० ॥ आत्त्वा । हार्षमन्तरभूर्द्ध्रुवस्तिष्ठाविचाचलिः ॥

व्विशंस्त्वासर्व्वाव्वाञ्छन्तुमात्वद्राष्ट्रमधिभ्रशत् ॥ ११ ॥ उदुत्तमम् ॥
उदुत्तमम्व्वरुणपाशमस्म्मदवाधमंव्विमंध्यमꣳश्रथाय ॥ अथाव्वय
मादित्यव्व्रतेतवानागसोऽअदितयेस्याम ॥१२॥ अग्ग्रेबृहन् ॥ अग्ग्रे
बृहन्नुषसामूर्द्ध्वोऽअंस्त्थान्निर्ज्जगन्वान्तमसोज्ज्योतिषागात् ॥ अ
ग्निर्भानुनारुशंतास्वङ्गऽआजातोव्विश्वासद्मान्यप्प्राः ॥ १३ ॥ हꣳ
सꣳशुचिषत् ॥ हꣳसꣳशुचिषद्व्वसुरन्तरिक्षसद्धोतावेदिषदतिथिर्दुरो
णसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽ

ऋतंबृहत् ॥१४॥ सीदत्त्वम्॥सीदत्त्वम्मातुरस्याऽउपस्त्थेव्विश्वांन्य
ग्ग्नेव्वयुनांनिव्विद्वान् ॥ मैनान्तपंसामार्चिषाभिशोंचीरन्तरंस्याᳬं
शुक्रज्ज्योंतिर्व्विभांहि॥१५॥अन्तरंग्ग्ने । रुचात्त्वमुखायाऽंसदंनेस्वे ॥
तस्यास्त्वᳬं हरंसातपञ्जातंवेदःशिवोभंव॥१६॥शिवोभूत्त्वा। मह्यं
मग्ग्नेअथोंसीदशिवस्त्वम् ॥ शिवाःकृत्त्वादिशःसर्व्वाःस्वंय्योनिंमि
हासंदः॥ १७॥[१७] दिवस्प्परिं। प्प्रथमञ्जंज्ञेऽअग्निरस्म्मद्द्विती
यम्परिंजातवेंदाः॥ तृतीयंमप्प्सुनृमणाऽअजंस्रमिन्धांनऽएनञ्जर

संहि. तेस्वाधीः ॥ १८ ॥ विद्मातें । अग्नेत्रेधात्रयाणिविद्मातेधामविभृं पू. अ.
॥९५॥ तापुरुत्रा ॥ विद्मातेनामंपरमङ्गुहायद्विद्मातमुत्संय्यतऽआजगन्थं ॥१२॥
॥ १९ ॥ समुद्रेत्त्वा । नृमणाऽअप्स्वन्तर्नृचक्षाईधेदिवोअग्नऊधं
न् ॥ तृतीयेंत्त्वारजांसितस्थिवाꣳसमपामुपस्थेमहिषाऽअवर्द्धन्
॥ २० ॥ अक्रन्ददग्निः ॥ अक्रन्ददग्निस्तनयंन्निवद्यौःक्षामारेरिह
द्वीरुधंःसमञ्जन् ॥ सद्योजंज्ञानोव्विहीमिद्धोऽअक्ख्यदारोदसीभा ॥९५॥
नुनाभात्यन्तः ॥ २१ ॥ श्रीणामुंदारः ॥ श्रीणामुंदारोधरुणोरयी

णाम्म॑नीषाणाम्प्राप्र्पण॒ह्सोम॑गोपाः ॥ वसु॑ःसूनुःसह॑सोऽअ॒प्सु
राजा॒विभा॒त्यग्र॑ऽउ॒षसा॑मिधा॒नः ॥ २२ ॥ विश्व॑स्यकेतुः ॥ विश्व॑
स्यके॒तुर्भुव॑नस्य॒गर्भ॒ऽआरोद॑सीऽअपृणा॒ज्जाय॑मानः ॥ वी॒डुञ्चि॑
द॒द्रिमभिनत्परा॒यञ्जना॒यद॒ग्निमय॑जन्त॒पञ्च॑ ॥ २३ ॥ उ॒शिक्पा॑व॒
कः ॥ उ॒शिक्पा॑व॒कोऽअ॒र॒तिःसु॑मे॒धामर्त्ते॑ष्व॒ग्निर॒मृतो॒निधा॑यि ॥
इय॑र्त्ति॒धूमम॑रु॒षम्भरि॑भ्र॒दुच्छु॒क्रेण॑शो॒चिषा॒द्यामिन॑क्षन् ॥ २४ ॥
दृ॒शा॒नोरु॒क्मः ॥ दृ॒शा॒नोरु॒क्मऽउ॒र्व्याव्य॑द्यौद्दु॒र्म्मर्ष॒मायुः॑श्रि॒येरु॑

संहि. चानः ॥ अग्निरमृतोऽअभवद्वयोभिर्यदेनन्द्यौरजनयत्सुरेताः पू.अ.
॥९६॥ ॥ २५ ॥ यस्ते । अद्यकृणवद्भद्रशोचेपूपन्देवघृतवन्तमग्ने ॥ प्रतन्न ॥१२॥
यप्प्रतरंवस्योऽअच्छाभिसुम्नन्देवभक्तंयविष्ठ ॥ २६ ॥ आतम् ॥
आतम्भजसौश्रवसेष्वग्नऽउक्थऽउक्थऽआभजशस्यमाने ॥ प्रि
यःसूर्येप्रियोऽअग्नाभवात्युज्जातेनभिनददुज्जनित्वैः ॥ २७ ॥
त्वामग्ने॥त्वामग्नेयजमानाऽअनुद्यून्विश्वावसुदधिरेवार्याणि ॥ ॥९६॥
त्वयासहद्रविणमिच्छमानाव्रजङ्गोमन्तमुशिजोविवव्रुः ॥ २८ ॥

अस्ताव्यग्निः ॥ अस्ताव्यग्निर्न्नरांᳬसुशेवोवैश्वानरऽऋषिभिःᳬसो
मंगोपाः ॥ अद्वेषेद्यावापृथिवीहुवेमदेवाधुत्तरयिमस्म्मेसुवीरम् ॥
॥२९॥ [१२] समिधाग्निम् ॥ समिधाग्निन्दुवस्यतघृतैर्बोधयता
तिथिम् ॥ आस्मिन्हव्याजुहोतन ॥ ३० ॥ उदुत्त्वा ॥ उदुत्त्वाविश्वेदेवाऽअग्नेभरन्तुचित्तिभिः ॥ सनोभवशिवस्त्वᳬसुप्प्रतीको
विभावसुः ॥ ३१ ॥ प्रेत् ॥ प्रेदग्ग्नेज्ज्योतिष्म्मान्याहिशिवेभिरर्चि
भिष्ट्वम् ॥ बृहद्भिर्भानुभिर्भासन्माहिᳬसीस्तन्न्वाप्प्रजाः ॥३२॥

अक्रन्ददग्निः ॥ अक्रन्ददग्निस्तनयन्निवद्यौःक्षामारेरिहद्वीरुधः
समञ्जन् ॥ सद्योजज्ञानोविहीमिद्धोऽअख्यदारोदसीभानुनाभा
त्यन्तः॥३३॥ प्रप्रायम् ॥ प्रप्रायमग्निर्भरतस्यशृण्वेवियत्सूर्यो
नरोचतेबृहद्भाः ॥ अभियःपूरुम्पृतनासुतस्थौदीदायदैव्योऽअति
थिःशिवोनः ॥३४॥आपोदेवीः॥आपोदेवीःप्प्रतिगृभ्णणीतभस्मै
तत्स्योनेकृणुध्वःसुरभाऽउंलोके ॥ तस्मैनमन्ताञ्जनयःसुपत्नी
र्म्मातेवपुत्रम्बिभृताप्स्वेनत् ॥ ३५ ॥ अप्स्वग्ने ॥ अप्स्वग्नेसाधि

ष्ट्वसौषधीरनुरुध्यसे ॥ गर्ब्भेसञ्जायसेपुनः॥३६॥गर्ब्भौऽअसि ॥
गर्ब्भौअस्योषधीनाङ्गर्ब्भौवनस्पतीनाम् ॥ गर्ब्भौविश्वस्यभूतस्या
ग्ग्नेगर्ब्भौऽअपामसि॥३७॥ प्रसद्यभस्म्मना ॥ प्रसद्यभस्म्मनायो
निमपश्चपृथिवीमग्ग्ने ॥ सꣳसृज्ज्यमातृभिष्ट्वञ्ज्योतिष्म्मान्पुनरा
सदः ॥ ३८ ॥ पुनरासद्य । पुनरासद्यसदनमपश्चपृथिवीमग्ग्ने ॥
शेषेमातुर्य्यथोपस्त्थेन्तरस्याꣳशिवतमः॥३९॥पुनरूर्ज्जा । निव
र्त्तस्वपुनरग्ग्नऽइषायुषा ॥ पुनर्न्नःपाह्यꣳहसः ॥ ४० ॥ सहरय्या ।

निवर्त्तस्वाग्ग्नेपिन्न्वंस्वधारंया ॥ विश्श्वप्प्स्न्यांविश्श्वतस्प्पारि॥४१॥
बोधांमे । ऽअस्यव्वचंसोयविष्ठमꣳहिंष्ठस्यप्प्रभृंतस्यस्वधावः ॥ पीयं
तित्त्वोऽअनुंत्त्वोगृणातिव्वन्दारुंष्टेतन्न्वंवन्देऽअग्ग्ने ॥४२॥सबोंधि ।
सूरिर्म्मघवाव्वसुंपतेव्वसुंदावन् ॥ युयोद्ध्यस्म्मद्द्वेषांꣳसिव्विश्श्वकंर्म्म
णेस्वाहा॥४३॥पुनंस्त्वा । दित्त्यारुद्द्राव्वसंवꣳसमिंन्धताम्पुनंर्ब्ब्रह्मा
णोव्वसुनीथयज्ञैः ॥ घृतेनत्त्वन्तन्न्वंव्वर्द्धयस्वसत्त्याःसन्तुयजंमान
स्यकामाः॥४४॥ [१५]अपेत ॥ अपेतव्वीतव्विचंसर्प्पतातोयेत्रस्त्थपु

राणायेचनूतंना॑ ॥ अदाद्यमोवसानंम्पृथिव्याऽअक्कंन्निमाम्पितरो
लोकमंस्म्मै॥४५॥सँञ्ज्ञानंमसि । कामधरंणम्मयिंतेकामधरंणम्भू
यात् ॥ अग्ग्नेर्ब्भस्म्मास्यग्ग्नेःपुरीषमासिचितंस्त्थपरिचितऽऊर्द्ध्वं
चितंः श्रयद्ध्वम्॥४६॥अयहंसंः ॥ अयꣳसोऽअग्निर्य्यस्मिमन्त्सोम
मिन्द्रंःसुतन्दधेजठरेंवावशानः ॥ सहस्रियम्वाजमत्त्यन्नसप्तिꣳ
ससवान्त्सन्त्स्तूयसेजातवेदः ॥ ४७ ॥ अग्ग्नेयत् ॥ अग्ग्नेयत्तेदि
विवर्च्चंःपृथिव्यांय्यदोषंधीष्ष्वप्प्स्वायंजत्र ॥ येनान्तरिंक्षमुर्व्वात

तन्थ॑त्त्वेष॒ꣳसभा॒नुरं॒र्ण्ण॒वो नृ॒चक्षाः॑ ॥४८॥ अग्ने॑दि॒वः॥ अग्ने॑दि॒वो
ऽअर्ण्ण॒मच्छा॑जिगा॒स्यच्छा॑दे॒वाँ२ऽऊ॑चिषे॒धिष्ण्या॒ये ॥ यारो॑च॒ने
प॒रस्ता॒त्सूर्य॑स्य॒याश्चा॒वस्ता॑दुप॒तिष्ठ॑न्त॒ऽआपः॑ ॥ ४९ ॥ पुरी॒ष्या॒
सोऽअ॒ग्नयः॑ । प्प्राव॒णेभिः॑स॒जोष॑सः ॥ जु॒षन्तां॒य्य॒ज्ञम॒द्द्रुहो॑न
मी॒वाऽइषो॑म॒हीः ॥ ५० ॥ इडा॑मग्ने । पु॒रु॒दꣳस॑ꣳस॒निङ्गोः॑श॒श्व
त्त॒मꣳहव॑मानायसाध ॥ स्यान्नः॑सू॒नुस्तन॑यो॒व्विजा॒वाग्ने॒सा॒ते॑सु॒म॒
ति॒र्भू॒त्त्व॒स्म्मे ॥५१॥ अ॒यन्ते॑ ॥ अ॒यन्ते॒योनि॑र्ऋ॒त्त्वियो॒यतो॒जा॒तो

ऽअरोचथाः ॥ तञ्ज्ञानन्नग्गन्ऽआरोहाथांनोवर्द्धयारयिम् ॥ ५२ ॥
चिर्दसि ॥ चिर्दसितयांदेवतंयाङ्गिरस्वद्ध्रुवासींदपरिचिर्दसितयांदे
वतंयाङ्गिरस्वद्ध्रुवासींद ॥ ५३ ॥लोकम्पृंण । च्छिद्रम्पृणाथोसीदद्ध्रु
वात्त्वम् ॥ इन्द्राग्नीत्त्वाबृहस्प्पातिरस्म्मिन्न्योनांवसीषदन् ॥५४॥
ताऽअंस्य । सूर्ददोहसःसोमंश्रीणन्तिपृश्नंयः ॥ जन्मन्देवानां
विशंस्त्रिष्ष्वारोचनेदिवः ॥ ५५ ॥ इन्द्रंविश्वाः ॥ इन्द्रंविश्वाऽअ
वीवृधन्त्समुद्रव्यचसङ्गिरंः ॥ रथीतमंरथीनांवाजांनांसत्पं

तिम्पतिम् ॥ ५६ ॥ समितम् ॥ समितुङ्सङ्कल्पेथाꣳसम्प्रियौरोचि
ष्णूसुमनस्यमानौ ॥ इषमूर्ज्जमभिसंवसानौ ॥५७॥संवाम् ॥ संवा
म्मनाꣳसिसंव्रतासमुचित्तान्याकरम् ॥ अग्नेपुरीष्याधिपाभव
त्वन्नऽइषमूर्ज्जय्यजमानायधेहि ॥५८॥ अग्नेत्त्वम् ॥ अग्नेत्त्वम्पु
रीष्योरयिमान्पुष्टिमाँ२ऽअसि ॥ शिवाꣳकृत्त्वादिशꣳसर्वाꣳस्वंय्यो
निमिहासदः ॥ ५९ ॥ भवतन्नः ॥ भवतन्नꣳसमनसौसचेतसावरेप
सौ ॥ मायज्ञꣳहिꣳसिष्टम्मायज्ञपतिञ्जातवेदसौशिवौभवतमद्य

नः ॥६०॥ मातेवपुत्त्रम् ॥ मातेवपुत्त्रम्पृथिवीपुरीष्ष्यमग्निꣳस्वे
योनावभारुखा ॥ तांव्विश्वैर्द्देवैर्ऋतुभिःसंव्विदानःप्प्रजापतिर्व्विश्व
कर्म्मा व्विमुञ्चतु ॥ ६१ ॥ [७]असुन्न्वन्तमयजमानम् ॥ असुन्न्वन्त
मयजमानमिच्छस्तेनस्येत्यामन्न्विहितस्करस्य ॥ अन्न्यमस्म्मदि
च्छसातऽइत्त्यानमोदेविनिर्ऋतेतुब्भ्यमस्तु ॥ ६२॥ नमःसुतेनिर्ऋ
तेतिग्मतेजोयस्म्मयंव्विचृताबन्धमेतम् ॥ यमेनत्त्वंय्यम्म्यासंव्वि
दानोत्तमेनाकेऽअधिरोहयैनम्॥ ६३ ॥ यस्यास्ते । घोरऽआसञ्जुहो

म्म्येषाम्बन्धानामवसर्ज्जनाय ॥ यान्त्वाजनोभूमिरितिप्प्रमदन्ते
निर्ऋतिन्त्वाहम्परिवेदविश्श्वतः ॥६४॥ यन्तेदेवीनिर्ऋतिराबबन्ध
पाशङ्ग्रीवास्वविचृत्त्यम् ॥ तन्तेविष्ष्याम्म्यायुषोनमद्ध्यादथैतम्पितु
मद्धिप्प्रसूतः ॥ नमोभूत्त्यैयेदञ्चकार ॥६५॥ निवेशनः सङ्गमनः ॥
निवेशनः सङ्गमनोवसूनांविश्श्वारूपाभिचष्ट्टेशचीभिः ॥ देवऽइवस
वितासत्त्यधर्म्मेन्द्रोनतस्त्थौसमरेपथीनाम् ॥६६॥ सीरायुञ्जन्ति ।
कवयोयुगाविर्तन्वतेपृथक् ॥ धीरादेवेषुसुम्म्नया ॥६७॥ युनक्तसी

रा॑ ॥ युनक्तसीराव्वियुगातनुद्ध्वङ्कृतेयोनौव्वपतेहबीजम् ॥ गिराचश्श्रु
ष्टिःसभराऽअसन्नोनेदीयऽइत्सृण्यःपक्कमेयात् ॥६८॥ शुनꣳसु ।
फालाविकृषन्तुभूमिꣳशुनङ्कीनाशाऽअभियन्तुवाहैः ॥ शुनासी
राहविषातोशमानासुपिप्पलाऽओषधीः कर्त्तनास्म्मे ॥६९॥ घृते
नसीता ॥ घृतेनसीतामधुनासमज्ज्यताव्विश्वैर्देवैरनुमतामरुद्भिः ॥
ऊर्ज्जस्वतीपयसापिन्न्वमानास्म्मान्त्सीतेपयसाभ्याववृत्स्व ॥७०॥
लाङ्गलम्पवीरवत् ॥ लाङ्गलम्पवीरवत्सुशेवꣳसोमपित्सरु ॥ तदु

संहि. ॥१०२॥

द्वूपतिगामविंम्प्रफर्व्व्यंञ्चपीवरीम्प्रस्त्थावंद्द्रथवाहंणम् ॥७१॥ कामं	पू. अ. ॥१२॥
ङ्कामदुघे । धुक्ष्वमित्रायवरुणायच ॥ इन्द्रायाश्विब्भ्यांम्पूष्णेप्र
जाब्भ्यऽओषधीब्भ्यः ॥७२॥ विमुंच्यद्ध्वम् ॥ विमुंच्यद्ध्वमग्घ्न्यादे
वयानाऽअगंन्मतमंसस्पारमस्य॥ज्योतिरापाम॥७३॥सजूरब्दः॥
सजूरब्दोऽअयंवोभिःसजूरुषाऽअरुणीभिः ॥ सजोषसावश्विना
दꣳसोभिःसजूःसूरऽएतशेनसजूर्वैश्वानर ऽइडयाघृतेनस्वाहा ॥	॥१०२॥
॥७४॥ [१३] याऽओषधीः ॥ याऽओषधीःपूर्व्वाजातादेवेब्भ्यस्त्रि

युगम्पुरा ॥ मनैनुबभ्रूणामहꣳशतन्धामानिसप्तचं ॥ ७५ ॥ शतं
वः ॥ शतंवोऽअम्बधामानिसहस्रमुतवोरुहः ॥ अधाशतक्रत्वो
यूयमिमम्मेऽअगदङ्कृत ॥ ७६ ॥ ओषधीꣳप्प्रति । मोदध्वम्पुष्पवं
तीꣳप्प्रसूवरीꣳ ॥ अश्वाऽइवसजित्वरीर्वीरुधःपारयिष्णवः ॥ ७७ ॥
ओषधीरिति । मातरस्तद्वोदेवीरुपब्रुवे ॥ सनेयमश्वङ्गावासऽआ
त्मानन्तवपूरुष ॥ ७८ ॥ अश्वत्थेवः ॥ अश्वत्थेवोनिषदनम्पर्णे
वोवसतिष्कृता ॥ गोभाजऽइत्किलासथयत्सनवथपूरुषम् ॥ ७९ ॥

यत्रौषधीः । समग्मंतराजानःसमिताविव ॥ विप्रःसऽउच्यतेभि
षग्रक्षोहामीवचातनः ॥ ८० ॥ अश्वावतीᳬसोमावतीम् ॥ अश्वा
वतीᳬसोमावतीमूर्ज्जयन्तीमुदोजसम् ॥ आवित्सिसर्वाऽओषधी
रस्माऽअरिष्टतातये ॥ ८१ ॥ उच्छुष्माः ॥ उच्छुष्माऽओषधी
नाङ्गावोगोष्ठादिवेरते ॥ धनᳬसनिष्यन्तीनामात्त्वानन्तवपूरुष
॥ ८२ ॥ इष्कृतिर्नाम । वोमाताथोयूयᳬस्थनिष्कृतीः ॥ सीराः
पतत्रिणीस्थनयदामयतिनिष्कृथ ॥ ८३ ॥ अतिविश्वाः । परिष्ठा

स्तेनऽइंवव्व्रजमंक्क्रमुः ॥ ओषंधीःप्प्राचुंच्च्यवुर्य्यत्किञ्चंतन्न्वोरपंः ॥ ८४ ॥ यदिमाः ॥ यदिमाव्वाजयंन्नहमोषंधीर्हस्तंऽआदुधे ॥ आत्मायक्ष्मंस्यनश्श्यतिपुराजीवगृभोयथा ॥ ८५ ॥ यस्यौषधीः । प्प्रसर्प्पथाङ्गंमङ्गम्परुंष्प्परुः ॥ ततोयक्ष्मंव्विबाधध्द्ध्वऽउग्ग्रोमंध्यमशीरिव॥८६॥साकंय्यक्ष्म ॥ साकंय्यंक्ष्मप्प्रपंतचाषेंणाकिकिदीविनां ॥ साकंव्वातंस्यद्ध्राज्ज्यांसाकन्नंश्यनिहाकंया ॥८७॥ अन्न्यावंः ॥ अन्न्यावोऽअन्न्यामंवत्त्वन्न्यान्न्यस्याऽउपांवत ॥ ताःसर्व्वाःसंव्विदाना

ऽइदम्मे प्प्रावता वचः ॥ ८८ ॥ याः फलिनीः ॥ याः फलिनीर्याऽ
अफलाऽअपुष्प्पायाश्च पुष्प्पिणीः ॥ बृहस्प्पतिप्प्रसूतास्तानो मु
ञ्चन्त्वꣳहसः ॥ ८९ ॥ मुञ्चन्तु मा । शपथ्थ्यादथो वरुण्यादुत ॥ अथो
यमस्य पड्वीशात्सर्व्वस्म्माद्देवकिल्बिषात् ॥ ९० ॥ अवपतन्तीरवदन् ॥
अवपतन्तीरवदन्दिवऽओषधयस्प्परि ॥ यञ्जीवमश्नवामहै न स रि
ष्य्याति पूरुषः ॥ ९१ ॥ याऽओषधीः ॥ याऽओषधीः सोमराज्ञीर्ब
ह्वीः शतविचक्षणाः ॥ तासामसि त्त्वमुत्तमारङ्कामाय शꣳहृदे ॥ ९२ ॥

याऽओषधीः ॥ याऽओषधीःसोमराज्ञीर्विष्ठिताःपृथिवीमनु ॥ बृह
स्प्पतिप्प्रसूताऽअस्यैसन्दत्तवीर्य्यम् ॥ ९३ ॥ याश्च ॥ याश्चेदमुप
शृण्वन्तियाश्चदूरम्परागताः ॥ सर्व्वाःसङ्गत्त्यवीरुधोस्यैसन्दत्तवी
र्य्यम् ॥९४॥ मावः ॥ मावोरिषत्त्खनितायस्म्मैचाहङ्खनामिवः ॥
द्विपाच्चतुष्प्पादस्म्माकꣳसर्व्वमस्त्वनातुरम् ॥९५॥ ओषधयःसम् ॥
ओषधयःसमवदन्तसोमेनसहराज्ञा ॥ यस्म्मैकृणोतिब्ब्राह्मणस्तꣳ
राजन्पारयामसि ॥ ९६ ॥ नाशयित्त्रीबलासस्यार्शꣳसऽउपचिताम

सि ॥ अथौशतस्ययक्ष्माणाम्पाकारोरसिनाशनी ॥९७॥ त्वाङ्गन्धर्
र्वाः ॥ त्वाङ्गन्धर्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः॥ त्वामो
षधेसोमोराजाविद्वान्यक्ष्मादमुच्यत ॥९८॥ सहस्वमे ॥ सहस्वमेऽ
अरातीःसहस्वपृतनायतः ॥ सहस्वसर्वम्पाप्मानꣳसहमानास्योषधे
॥९९॥ दीर्घायुस्ते ॥ दीर्घायुस्तऽओषधेखनितायस्मैचत्त्वाखना
म्यहम्॥ अथोत्त्वन्दीर्घायुर्भूत्त्वाशतवल्शाविरोहतात् ॥१००॥
त्वमुत्तमा । स्योषधेतववृक्षाऽउपस्तयः ॥ उपस्तिरस्तुसोस्माकं

भ्यो॑ऽअ॒स्म्माँ २ ऽअ॑भि॒दास॑ति ॥ १०१ ॥ [२७] मामा॑हि॑ꣳसीज्ज
नि॒ताय॒ꣳ पृ॑थि॒व्यायो॒वा॑दिवं॑ꣳ स॒त्यध॑र्म्मा॒व्यान॑ट् ॥ यश्चा॒पश्च॒न्द्राः
प्प्र॑थ॒मोज॒जान॒कस्म्मै॑दे॒वाय॑ह॒विषा॑विधेम ॥ १०२ ॥ अ॒भ्याव॑र्त्त
स्व । पृथिवि य॒ज्ञेन॒ पय॑सासह ॥ व॒पान्ते॑ऽअ॒ग्निरि॑षि॒तोऽअ॑रोहत् ॥
॥ १०३॥ अग्ने॒यत् ॥ अग्ने॒यत्ते॑शु॒क्रंय्यच्च॒न्द्रंय्यत्पू॒तंय्यच्च॑य॒ज्ञियं॑
म् ॥ तद्दे॒वेभ्यो॑भरामसि ॥ १०४ ॥ इष॒मूर्ज्ज॑म् ॥ इष॒मूर्ज्ज॑म॒हमि॒तऽ
आद॑मृ॒तस्य॒योनि॑म्महि॒षस्य॒धारा॑म् ॥ आमा॒गोषु॒विश॒त्त्वात॒नूषु॒ज

हांमिसेदिमनिंराममीवाम् ॥ १०५ ॥ अग्नेतवं ॥ अग्नेतवश्रवोव्व
योमहिंभ्राजन्तेऽअर्च्चयोंव्विभावसो ॥ बृहंद्भानोशवंसावाजमु
क्थ्युन्दधांसिदाशुषेंकवे ॥ १०६ ॥ पावकवंर्च्चाꣳशुक्रवंर्च्चाꣳ ॥ पाव
कवंर्च्चाꣳशुक्रवंर्च्चाऽअनूंनवर्च्चाऽउदिंयर्षिभानुनां ॥ पुत्रोमातरांव्वि
चरन्नुपांवासिपृणक्षिरोदंसीऽउभे ॥१०७॥ ऊर्ज्जोनपात् ॥ ऊर्ज्जोंन
पाज्जातवेदꣳसुशस्तिभिर्म्मन्दंस्वधीतिभिंर्हितः ॥ त्वेऽइषꣳसन्दंधु
र्भूरिंवर्प्पसश्चित्रोतंयोव्वामजांताꣳ ॥१०८॥ इरज्ज्यन्नंग्ने । प्प्रथ

यस्वजन्तुभिरस्म्मेरायोऽअमर्त्त्यं ॥ सदंशुतस्युवपुंषोव्विरोजसिपृ
णाक्षिसानुसिङ्कतुंम् ॥ १०९ ॥ इष्कर्त्तारमद्ध्वरस्यं ॥ इष्कर्त्तारमद्ध्वर
स्यप्प्रचेतसङ्क्षयन्तुᳬराधंसोमुहः ॥ रातिंव्वामस्यंसुभगाम्महीमिषु
न्दधांसिसानुसिᳬरयिम् ॥ ११० ॥ ऋतावानम्माहिषं । व्विश्वदंर्शत
मग्निᳬसुम्न्नायंदधिरेपुरोजनांः ॥ श्रुत्कर्णᳬसुप्प्रथंस्तमन्त्वागिरा
दैव्यम्मानुषायुगा ॥ १११ ॥ आप्प्यायस्व । समेंतुतेव्विश्वतंः सोम
वृष्ण्यंम् ॥ भवाव्वाजंस्यसङ्गथे ॥ ११२ ॥ सन्ते ॥ सन्तेपयांᳬसि

समंयन्तुवाजाःसंव्वृष्ण्यान्यभिमातिषाहः ॥ आप्प्यायमानोऽ
अमृतांयसोमदिविश्रवांᳩस्युत्तमानिधिष्व ॥११३॥ आप्प्याय
स्व ॥ मदिन्तमसोमविश्वेभिरᳪशुभिः ॥ भवानःसप्रथस्तमःस
खावृधे ॥११४॥ आते । वत्सोमनोयमत्परमाच्चित्सधस्थात् ॥
अग्नेत्त्वाङ्कामयागिरा ॥११५॥ तुभ्यन्ताः ॥ तुभ्यन्ताऽअङ्गि
रस्तमविश्वाःसुक्षितयःपृथक् ॥ अग्नेकामायथेमिरे ॥११६॥ अ
ग्निःप्प्रियेषु ॥ अग्निःप्प्रियेषुधामसुकामोभूतस्यभव्यस्य ॥ सम्म्रा

डेकोविराजति ॥११७॥ [१६] इतिश्रीवाजसनेयसंहितायांद्वाद
शोऽध्यायः ॥१२॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ मयि
गृह्णामिपंचदशध्रुवासिमधुव्वाताएकादशकौसम्म्यक्स्रवंतिनवेमं
माषडपांत्वैकाऽयंपुरःपंचसप्ताष्टापंचाशत् ॥ मयिगृह्णामि ॥ मयि
गृह्णाम्म्यग्ग्रेऽअग्निꣳरायस्प्पोषांयसुप्प्रजास्त्वायसुवीर्य्यीय ॥ मा
मुंदेवताऽसचन्ताम्॥१॥ अपाम्पृष्ठम् ॥ अपाम्पृष्ठमंसियोनिरग्ग्नेः
संमुद्रमभितꣳपिन्न्वंमानम् ॥ वर्द्धमानोमहाँ२ऽआचपुष्कंरेदिवो

मात्रयावरिम्म्णापप्रथस्व ॥ २ ॥ ब्रह्मंयज्ञानम् ॥ ब्रह्मंयज्ञानम्प्र
थमम्पुरस्ताद्विसीमतःसुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमाऽअं
स्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥ ३ ॥ हिरण्यगर्भःसमवर्त्त
ताग्रेभूतस्यंजातःपतिरेकंऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमा
ङ्कस्मैदेवायहविषाविधेम ॥४॥ द्रप्पश्चस्कन्द । पृथिवीमनुद्या
मिमञ्चयोनिमनुयश्चपूर्व्वः ॥ समानंय्योनिमनुसञ्चरन्तन्द्रप्प्स
ञ्जुहोम्म्यनुसप्तहोत्राः ॥५॥ नमोस्तुसर्प्पेभ्योयेकेचपृथिवीमनु ॥

येऽअन्तरिक्षेयेदिवितेभ्यः सर्प्पेभ्योनमः ॥ ६ ॥ याऽइषवं ॥
याऽइषवोयातुधानानांयेवावनस्पतीँ १ रनु ॥ येवावटेषुशेरते
तेभ्यः सर्प्पेभ्योनमः ॥ ७ ॥ येवा । मीरोचनेदिवोयेवासूर्य
स्यरश्मिषु ॥ येषामप्सुसदस्कृतन्तेभ्यः सर्प्पेभ्योनमः ॥ ८ ॥
कृणुष्वपाजः ॥ कृणुष्वपाजंप्रसितिन्नपृथ्वींयाहिराजेवाम
वाँ २ ऽइभेन ॥ तृष्वीमनुप्प्रसितिन्द्रूणानोस्तासिविध्यरक्षसस्त
पिष्ठैः ॥ ९ ॥ तवभ्रमासः ॥ तवभ्रमासऽआशुयापतन्त्यनुस्पृ

संहि. शधृषताशोशुचानः ॥ तपूंष्यग्नेजुह्वापतङ्गानसंन्दितोविसृज पू. अ.
॥१०९॥ विष्वगुल्काः ॥ १० ॥ प्रतिस्पशः॥ प्रतिस्पशोविसृजतूर्णित ॥१३॥
मोभवापायुर्विशोऽअस्याऽअदब्धः ॥ योनोदूरेऽअघशंसोयोऽ
अन्त्यग्नेमाकिष्टेव्यथिरादधर्षीत् ॥ ११ ॥ उदग्ने । तिष्ठप्रत्यातं
नुष्ष्वन्यमित्राँ२ ऽओषतात्तिग्ममहेते ॥ योनोऽअरातिंसमिधा
नचक्रेनीचातन्धक्ष्यतसन्नशुष्कम् ॥ १२ ॥ ऊर्ध्वोभव ॥ ऊर्ध्वोभ ॥१०९॥
वप्रतिविध्याध्यस्मदाविष्कृणुष्वदैव्यान्यग्ने ॥ अवस्थिरातनु

हियातुजूनांञ्जामिमजांमिम्प्रमृंणीहिशत्रूंन् ॥ अग्ग्नेष्ट्वातेजंसासा
दयामि ॥ १३ ॥ अग्निर्म्मूर्द्धा । दिवश्ककुत्त्पतिंःपृथिव्याअयम् ॥
अपाꣳरेताꣳसिजिन्वति ॥ इन्द्रंस्यत्त्वौजंसासादयामि ॥ १४ ॥
भुवोयज्ञस्यं ॥ भुवोयज्ञस्यरजंसश्चनेतायत्रांनियुद्भिꣳसचंसेशि
वाभिंः ॥ दिविमूर्द्धानंन्दधिषेस्वर्षांञ्जिह्वामंग्ग्नेचकृषेहव्यवाहंम्
॥ १५ ॥ [१५] ध्रुवासिं । धरुणास्तृंताविश्वकंर्म्मणा ॥ मात्त्वां
समुद्रऽउद्वंधीन्मासुपर्ण्णोंव्यंथमानापृथिवीन्दृꣳह ॥ १६ ॥ प्रजा

पंतिष्ठा । सादयत्त्वपाम्पृष्ठेसंमुद्रस्येमंन् ॥ व्यचंस्वतीम्प्रथंस्वतीम्प्र
थंस्वपृथिव्व्यसि ॥ १७ ॥ भूरंसि ॥ भूरंसिभूमिरस्यदितिरसिवि्श्श्व
धांयाविश्श्वंस्यभुवंनस्यधुर्त्री ॥ पृथिवींय्यंच्छपृथिवीन्दृंᳪहपृथिवी
म्माहिंᳪसीः ॥ १८ ॥ विश्श्वंस्म्मैप्प्राणायं ॥ विश्श्वंस्म्मैप्प्राणायांपा
नायंव्व्यानायोदानायंप्प्रतिष्ठायैचरित्रांय ॥ अग्निष्ट्वाभिपांतुमह्या
स्वस्त्याच्छर्दिषाशन्तंमेनतयांदेवतंयाङ्गिरस्वद्ध्रुवासींद ॥ १९ ॥
काण्डांत्काण्डात्प्ररोहंन्ती । परुंषः परुषस्प्पारिं ॥ एवानोंदूर्वेप्प्रतंनु

सहस्रेणशतेनंच ॥ २० ॥ याशतेनं । प्प्रतनोषिसहस्रेणविरोहंसि ॥
तस्यांस्तेदेवीष्टकेविधेमंहविषांवयम् ॥ २१ ॥ यास्ते । ऽअग्नेसूर्य्ये
रुचोदिवंमातन्वन्तिरश्मिभिः ॥ ताभिर्न्नोऽअद्यसर्वाभीरुचेज
नायनस्कृधि ॥ २२ ॥ यावः ॥ यावोदेवाःसूर्य्येरुचोगोष्वश्वेषु
यारुचः ॥ इन्द्राग्नीताभिःसर्वाभीरुचन्नोधत्तबृहस्पते ॥ २३ ॥
विराड्ज्योतिः ॥ विराड्ज्योतिरधारयत्स्वराड्ज्योतिरधारयत् ॥
प्रजापतिष्ट्वासादयतुपृष्ठेपृथिव्याज्ज्योतिष्मतीम् ॥ विश्वस्मैप्प्रा

संहि· ॥१११॥

णायापानायव्यानायविश्वञ्ज्योतिर्यच्छ ॥ अग्निष्टेधिपतिस्तया
देवतयाङ्गिरस्वद्ध्रुवासीद ॥ २४ ॥ मधुश्च ॥ मधुश्चमाधवश्चवा
सन्तिकावृतूऽअग्नेरन्तःश्लेषोसिकल्पेतान्द्यावापृथिवीकल्पन्ता
मापऽओषधयःकल्पन्तामग्नयःपृथङ्ममज्यैष्ठ्यायसव्रताः ॥
येऽअग्नयःसमनसोन्तराद्यावापृथिवीऽइमे ॥ वासन्तिकावृतू
अभिकल्पमानाऽइन्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गिर
स्वद्ध्रुवेसीदतम् ॥२५॥ अषाढासि ॥ अषाढासिसहमानासहस्वारा

पू· अ· ॥१३॥

॥१११॥

तीꣳसहस्वपृतनायतः ॥ सहस्वंवीर्य्यासिसामांजिन्व ॥२६॥ [११]
मधुव्वाताꣳ ॥ मधुव्वाताऽऋतायतेमधुंक्षरन्तिसिन्धंवꣳ ॥ माध्वीर्न्नꣳ
सन्त्वोषंधीꣳ ॥२७॥ मधुनक्कंम् ॥ मधुनक्कंमुतोषसोमधुंमत्पार्थिं
वꣳरजंः ॥ मधुद्यौरंस्तुनꣳपिता ॥ २८॥ मधुंमान्नꣳ ॥ मधुंमान्नोव
नस्पतिर्म्मधुंमाँ २ अस्तुसूर्य्यंः ॥ माध्वीर्गावोंभवन्तुनꣳ ॥ २९॥
अपाङ्गम्भंन् ॥ अपाङ्गम्भंन्तसीदुमात्त्वासूर्य्योभितांप्प्सीन्माग्नि
वैश्वानरः ॥ अच्छिन्नपत्राꣳप्प्रजाऽअंनुवीक्षस्वानुंत्त्वादिव्यावृष्टिंः

संहि. ॥११२॥

सचताम् ॥ ३० ॥ त्रीन्त्संमुद्रान् ॥ त्रीन्त्संमुद्रान्त्समंसृपत्स्वर्ग्गा
नुपाम्पतिर्वृषभऽइष्टंकानाम् ॥ पुरीषंवसानःसुकृतस्यंलोकेतत्रंग
च्छयत्रपूर्व्वेपरेताः ॥ ३१ ॥ महीद्यौःपृथिवीचंनऽइमंय्यज्ञम्मिमि
क्षताम् ॥ पिपृतान्नोभरीमभिः ॥ ३२ ॥ विष्णोःकर्म्माणि । पश्य
तयतोव्व्रतानिंपस्पशे ॥ इन्द्रस्ययुज्यःसखा ॥ ३३ ॥ ध्रुवासि । धरु
णेतोजज्ञेप्रथममेभ्योयोनिभ्योऽअधिजातवेदाः ॥ सगायत्र्या
त्रिष्टुभानुष्टुभाचदेवेभ्योहव्यंवहतुप्प्रजानन् ॥ ३४ ॥ इषेराये ।

पू. अ. ॥१३॥ ॥११२॥

स्तस्यनक्षत्त्राण्यप्प्सरसोभेकुरयोनाम ॥ सनऽइदम्ब्रह्मक्षत्त्रम्पातुत
स्म्मैस्वाहावाट्ताब्भ्यःस्वाहा ॥ ४० ॥ इषिरोव्विश्श्वव्यचाः ॥ इषिरो
व्विश्श्वव्यचाव्वातोगन्धर्व्वस्तस्यापोऽअप्प्सरसऽऊर्ज्जोनाम । सनऽइ
दम्ब्रह्मक्षत्त्रम्पातुतस्म्मैस्वाहावाट्ताब्भ्यःस्वाहा ॥ ४१ ॥ भुज्युःसु
पर्ण्णः । भुज्युःसुपर्ण्णोयज्ञोगन्धर्व्वस्तस्यदक्षिणाऽअप्प्सरसस्तवा
नाम ॥ सनऽइदम्ब्रह्मक्षत्त्रम्पातुतस्म्मैस्वाहावाट्ताब्भ्यःस्वाहा ॥
॥ ४२ ॥ प्रजापतिर्व्विश्श्वकर्म्मा । मनोगन्धर्व्वस्तस्यऽऋक्सामान्न्य

प्प्सरसऽएष्टयोनाम ॥ सनऽइदम्ब्रह्मक्षत्रम्पातुतस्मैस्वाहावाट्ता
भ्यꣳस्वाहा ॥ ४३ ॥ सनः ॥ सनोभुवनस्यपतेप्प्रजापतेयस्यतऽउ
परिगृहायस्यवेह ॥ अस्म्मैब्रह्मणेस्म्मैक्षत्रायमहिशर्म्मयच्छस्वा
हा ॥४४॥ समुद्रोसि ॥ समुद्रोसिनभस्वानार्द्रदानुꣳशम्भूर्म्मयोभू
रभिमावाहिस्वाहामारुतोसिमरुताङ्गणः शम्भूर्म्मयाभूरभिमा
वाहिस्वाहावस्यूरसिदुवस्वाञ्छम्भूर्म्मयोभूरभिमावाहिस्वाहा ॥
॥४५॥ यास्ते । ऽअग्नेसूर्य्येरुचोदिवमातन्वन्तिरश्मिभिः ॥ ता

भिन्नोऽअद्यसर्व्वाभिरुचेजनांयनस्कृधि॥४६॥यावं॥ यावोंदेवाः
सूर्य्येरुचोगोष्ष्वश्वेषुयारुचं॥ इन्द्राग्नीताभिःसर्व्वाभीरुचन्नो
धत्तबृहस्पते॥ ४७॥ रुचंनः॥ रुचंनोधेहिब्राह्मणेषुरुचःराजं
सुनस्कृधि॥ रुचंविश्यैषुशूद्रेषुमयिंधेहिरुचारुचम्॥४८॥ तत्त्वां।
यामिब्रह्मंणावन्दंमानस्तदाशांस्तेयजंमानोहविर्भिः॥ अहेंड
मानोवरुणेहबोध्युरुशंशसमानऽआयुःप्रमोषीः॥ ४९॥ स्वर्ण्ण॥
स्वर्ण्णघर्म्मःस्वाहास्वर्ण्णार्कःस्वाहास्वर्ण्णशुक्रःस्वाहास्वर्ण्णज्ज्यो

संहि-
॥१७१॥

पू. अ.
॥१८॥

ति॒ꣳस्वाहा॑स्व॒र्ण्णसूर्य्यꣳस्वाहा॑ ॥ ५० ॥ [१३] अ॒ग्निँय्युनज्मि॥अ॒
ग्निँय्युनज्मि॒शव॑सा॒घृतेन॑दि॒व्यꣳसु॒पर्ण्णँव्वय॑साबृ॒हन्त॑म् ॥ तेन॑व्व॒य
ङ्गमेमब्र॒ध्नस्य॑वि॒ष्टप॒ꣳस्वो॒रुहा॑णा॒अधि॒नाक॑मु॒त्त॒मम् ॥ ५१ ॥ शतम्
॥१०००॥ इ॒मौते॑। प॒क्षाव॒जरौ॑पत॒त्रिणौ॒याभ्या॒ꣳरक्षा॑ꣳस्यप॒हꣳ
स्य॑ग्ने ॥ ताभ्या॑म्पतेमसु॒कृता॑मु॒लो॒कँय्यत्र॒ऽऋष॑योज॒ग्मुःप्र॑थम॒
जाःपु॑रा॒णाः ॥ ५२ ॥ इन्दु॒र्दक्षः॑। श्ये॒नऽऋ॒ता॒वा॒हिर॑ण्ण्यपक्षꣳशकु॒ ॥१७१॥
नोभु॒र॒ण्ण्युꣳ ॥ म॒हान्त्स॒धस्थे॑ध्रु॒वऽआनि॒ष॑त्तो॒ऽनम॑स्तेऽअस्तु॒मामा॑

हिꣳसीः ॥ ५३ ॥ दिवोमूर्द्धा । सिपृथिव्यानाभिरूर्ग्गपामोषधीना
म् ॥ विश्वायुꣳशर्म्मसप्प्रथानमंस्प्पथे ॥ ५४ ॥ विश्वंस्यमूर्द्धन् ॥ वि
श्वंस्यमूर्द्धन्नधितिष्ठसिश्रितःसंमुद्रेतेहृदंयमप्प्स्वायुरपोदत्तोदुधि
म्भिन्त॥दिवस्प्पर्ज्जन्यांदुन्तरिक्षात्पृथिव्यास्ततोनोवृष्ट्याव ।५५।
इष्टोयज्ञः ॥ इष्टोयज्ञोभृगुंराशीर्द्दावसुंभिः ॥ तस्यंनऽइष्टस्यंप्प्रीत
स्यद्रविंणेहागमेः ॥५६॥ इष्टोऽअग्निः ॥ इष्टोऽअग्निराहुतःपिप
र्त्तुनऽइष्टꣳहविः ॥ स्वगेदन्देवेभ्योनमंः ॥ ५७ ॥ [७] यदाकूं

संहि. तात्॥यदाकूतात्समसुस्रोद्धृदोवामनसोवासम्भृतञ्चक्षुषोवा ॥ तद पू. अ.
॥१७२॥ नुप्प्रेतसुकृतामुलोकंयत्त्रऽऋषयोजग्मुःप्प्रथमजाःपुराणाः ॥५८॥ ॥१८॥
एतꣳसधस्थपरितेददामियमावहाच्छेवधिञ्जातवेदाः ॥ अन्वाग
न्तायज्ञपतिर्व्वोऽअत्रतꣳस्मजानीतपरमेव्व्योमन् ॥५९॥ एतञ्जा
नाथ । परमेव्व्योमन्देवाःसधस्थाव्विदरूपमस्य ॥ यदागच्छात्प
थिभिर्द्देवयानैरिष्टापूर्तेकृणवाथाविरस्मै ॥ ६० ॥ उद्बुध्यस्व ॥ उद्बु ॥१७२॥
ध्यस्वाग्नेप्प्रतिजागृहित्वमिष्टापूर्तेसꣳसृजेथामयञ्च ॥ अस्मिन्त्स

धस्थेऽअद्युत्तंरस्मिमुन्विश्वेंदेवायजंमानश्चसीदत ॥ ६१ ॥ येनव्व
हंसि । सुहस्रुंयेनांग्नेसर्व्ववेदुसम् ॥ तेनेमंय्युज्ञन्नोनयस्वुर्द्देवेषुगन्तं
वे ॥ ६२ ॥ प्रस्तुरेणंपरिधिनां । स्रुचावेद्यांचबुर्हिषां ॥ ऋचेमंय्युज्ञ
न्नोंनयुस्वुर्द्देवेषुगन्तंवे ॥ ६३ ॥ यद्दत्तम् ॥ यद्दुत्तंय्यत्पंरादानंय्यत्पू
र्त्तय्याश्चदक्षिणाः ॥ तदुग्निर्वैश्वकर्म्मुणःस्वर्द्देवेषुंनोदधत् ॥ ६४ ॥
यत्रधाराः ॥ यत्रधाराुऽअनंपेतामधोर्ग्घृतस्यंचुयाः ॥ तदुग्निर्वैश्व
कर्म्मुणःस्वर्द्देवेषुंनोदधत् ॥६५॥ अुग्निरंस्मि ॥ अुग्निरंस्मिजन्मं

नाजातवैदाघृतम्मेचक्षुरमृतम्मऽआसन् ॥ अर्क्कस्त्रिधातूरजसोवि
मानोजस्त्रोघर्म्मोहविरस्म्मिनाम ॥ ६६ ॥ ऋचोनाम ॥ ऋचोना
मास्म्मियजूᳬषिनामास्म्मिसामानिनामास्म्मि ॥ येऽअग्नयः
पाञ्चजन्न्याऽअस्याम्पृथिव्यामधि ॥ तेषामसित्वमुत्तमःप्प्रनोजी
वातवेसुव ॥६७॥ [१०] वार्त्रहत्यायशवसेपृतनाषाह्यायच ॥ इन्द्र
त्त्वावर्त्तयामसि ॥६८॥ सहदानुम्पुरुहूत । क्षियन्तमहस्तमिन्द्र
सम्पिणक्कुणारुम् ॥ अभिवृत्रंवर्द्धमानम्पियारुमपादमिन्द्रतवसा

जघन्थ ॥ ६९ ॥ विनं॑ ॥ विनं॑ऽइन्द्र॒मृधो॑जहि॒नी॒चाय॑च्छपृतन्न्य॒
तः ॥ योऽअ॒स्माँ२ऽअ॑भि॒दास॒त्यध॑रङ्गमया॒तमं॑ ॥७०॥ मृगोन ।
भी॒मः॑कु॒च॒रोगि॑रि॒ष्ठाः॑प॑रा॒वत॒ऽआज॑गन्था॒पर॑स्याः ॥ सृ॒कꣳ स॒ꣳशा
यं॑प॒विमि॑न्द्रति॒ग्ग्मंवि॑शत्रू॒न्ताढि॒विमृधो॑नुदस्व ॥ ७१ ॥ वै॒श्वा॒न॒रो
नं॑ ॥ वै॒श्वा॒न॒रोनं॑ऽऊ॒तय॒ऽआप्प्र॑या॑तुप॒रा॒वतः॑ ॥ अ॒ग्निर्नः॑सु॒ष्टु॒ती
रुपं॑ ॥ ७२ ॥ पृ॒ष्टोदि॒वि ॥ पृ॒ष्टोऽअ॒ग्निः॑पृ॑थि॒व्यांपृ॒ष्टोवि॒श्वा॒ऽओष॑
धी॒रावि॑वेश ॥ वै॒श्वा॒न॒रः॑सह॑सापृ॒ष्टोऽअ॒ग्निः॑सनो॒दिवा॒सरि॒षस्प्पा॑तु

नक्कैम् ॥७३॥ अश्यामतम् ॥ अश्यामतङ्कामंमग्नेतवोतीऽअश्या
मंरयिꣳरंयिवꣳसुवीरंम् ॥ अश्यामव्वाजंमभिवाजयन्तोश्यामंद्यु
म्नमंजराजरंन्ते ॥ ७४ ॥ वयन्तें । ऽअध्वरंरिमाहिकामंमुत्तानहं
स्तानमंसोपसद्यं ॥ यजिंष्ठेनमनंसायक्षिदेवानस्रेधतामन्मंनाव्वि
प्प्रोंऽअग्ने ॥ ७५ ॥ धामच्छदग्निः ॥ धामच्छदग्निरिन्द्रोब्रह्माद्दे
वोबृहस्प्पतिंः ॥ सचेतसोविश्वेदेवायज्ञम्प्रावंन्तुनꣳशुभे ॥ ७६ ॥
त्वंय्यंविष्ठ । दाशुषोनॄꣳपाहिशृणुधीगिरंः ॥ रक्षांतोकमुतत्क्म

नां ॥७७॥ [१०] इतिश्रीवाजसनेयसंहितायांअष्टादशोऽध्यायः
॥ १८ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ स्वाद्वींत्वैकादश
देवायज्ञंविꣳशतिःसुरावंतꣳसप्तदशोदीरतांत्रयोदशाच्याजानुर्द
शसोमोराजाष्टौसीसेनतंत्रꣳषोडशसप्तपंचनवतिः ॥ हरिःॐस्वा
द्वीन्त्वा । स्वादुनातीव्रान्तीव्रेणामृतामृतेन ॥ मधुमतीम्मधुम
तासृजामिसꣳसोमेन ॥ सोमोस्यश्विभ्यांम्पच्यस्वसरस्वत्यैपच्य
स्वेन्द्रायसुत्राम्णेपच्यस्व ॥ १ ॥ परीतः ॥ परीतोषिञ्चतासुतꣳसो

सं. ३०

मोयऽउत्तमꣳहविः ॥ दधन्वायोनय्यौंऽअप्प्स्वन्तरासुपावसोम
मद्रिभिः ॥ २ ॥ वायोःपूतः । पवित्रेणप्प्रत्यङ्क्सोमोऽअतिद्रुतः॥
इन्द्रस्ययुज्ज्यःसखा॥वायोःपूतःपवित्रेणप्प्राङ्क्सोमोऽअतिद्रुतः ॥
इन्द्रस्ययुज्ज्यःसखा ॥ ३ ॥ पुनातिते । परिस्रुतꣳसोमꣳसूर्य्यस्यदु
हिता ॥ वारेणशश्वतातना ॥ ४ ॥ ब्रह्मक्षत्रम् । ब्रह्मक्षत्रम्पवते
तेजऽइन्द्रियꣳसुरयासोमःसुतऽआसुतोमदाय ॥ शुक्रेणदेवदेव
ताःपिपृग्ग्धिरसेनान्नंय्यजमानायधेहि ॥५॥ कुविदङ्ग । यवमन्तो

यवंश्चिद्यथादान्त्यंनुपूर्वंव्वियूयं ॥ इहेहैषाङ्कृणुहिभोजंनानियेब
र्हिषोनमं॒ऽउक्तिंय्यजन्ति ॥ उपयामगृहीतोस्यश्विभ्यान्त्वास
रस्वत्यैत्वेन्द्रांयत्त्वासुत्रम्मणंऽएषतेयोनिस्तेजंसेत्त्वाव्वीर्य्यायत्त्वा
बलायत्त्वा ॥६॥ नानाहि । वान्देवहिंतं॒सदंस्कृतम्मासं॒सृंक्षाथा
म्परमेव्योमन् ॥ सुरात्वमसिंशुष्मिणीसोमं॒ऽएषमामांहिं॒सीं॑
स्वांय्योनिमाविशन्ती ॥ ७ ॥ उपयामगृंहीतोसि ॥ उपयामगृंही
तोस्याश्विनन्तेजंःसारस्वतंव्वीर्य्यमैन्द्रम्बलम् ॥ एषतेयोनिम्मौं

संहि.

॥१७६॥

दांयत्त्वानन्दायंत्त्वामहंसेत्त्वा ॥ ८ ॥ तेजोंसि ॥ तेजोंसितेजोमयिं
धेहिवीर्य्यंमसिवीर्य्युम्मयिंधेहिबलंमसिबलम्मयिंधेह्योजोस्यो
जोमयिंधेहिमन्न्युरंसिमन्न्युम्मयिंधेहिसहोंसिसहोमयिंधेहि ॥९॥
याव्याघ्रम् ॥ याव्याघ्रंविषूंचिकोभौवृकंञ्चरक्षंति ॥ श्येनम्पंतत्रि
णंᳲसिᳲहᳲसेमम्पात्वᳲहंसः ॥ १० ॥ यदांपिपेषं । मातरंम्पुत्रः
प्रमुंदितोधयंन् ॥ एतत्तदंग्ने अनृणोभंवाम्म्यहंतौपितरौमयां ॥
सम्पृचंस्त्थसम्मांभद्रेणंपृङ्क्तविपृचंस्त्थविमांपाप्मनांपृङ्क्त ॥ ११ ॥

पू. अ.

॥१९॥

॥१७६॥

[११] देवायज्ञम् ॥ देवायज्ञमंतन्वतभेषजम्भिषजाश्विनां ॥ वा
चासरंस्वतीभिषगिन्द्रांयेन्द्रियाणिदधंतः ॥ १२॥ दीक्षायैरूपम् ॥
दीक्षायैरूपꣳशष्पांणिप्प्रायणीयंस्यतोक्मांनि ॥ क्रयस्यंरूपꣳसो
मंस्यलाजाःसौमाꣳशवोमधुं॥ १३॥ आतित्थ्यरूपम्मासरम् ॥ आ
तित्थ्यरूपम्मासंरम्महावीरस्यंनग्नहुंः ॥ रूपमुंपसदांमेतत्तिस्रो
रात्रीःसुरासुंता ॥ १४ ॥ सोमंस्यरूपम् ॥ सोमंस्यरूपक्क्रीतस्यंपरि
स्रुत्परींषिच्यते ॥ अश्विभ्यांन्दुग्ग्धम्भेषजमिन्द्रांयैन्द्रꣳसरंस्व

संहि·
॥१७७॥

त्या ॥१५॥ आसन्दीरूपम् ॥ आसन्दीरूपꣳरांजासन्द्यैवेद्यैकुम्भी
सुंराधानी ॥ अन्तंरऽउत्तरवेद्यारूपङ्कांरोत्तरोभिषक् ॥ १६ ॥ वेद्या
वेदिंः ॥ वेद्यावेदिꣳसमांप्प्यतेबर्हिषांबर्हिरिन्द्रियम् ॥ यूपेनयूपंऽ
आप्प्यतेप्प्रणीतोऽअग्निरग्निनां ॥१७॥ हविर्द्धानंय्यत् ॥ हविर्द्धा
नंय्यदश्विनाग्नीध्रंय्यत्सरंस्वती ॥ इन्द्रांयैन्द्रꣳसदंस्कृतम्पंत्नीशा
लङ्गार्हपत्यः ॥ १८ ॥ प्रैषेभिंःप्प्रैषान् ॥ प्रैषेभिंःप्प्रैषानांप्नोत्या
प्प्रीभिराप्प्रीर्य्यज्ञस्यं ॥ प्रयाजेभिरनुयाजान्वंषट्कारेभिराहुंतीः

पू. अ.
॥१९॥
॥१७७॥

॥ १९ ॥ पशुभिः पशून् ॥ पशुभिः पशूनाप्नोति पुरोडाशैर्हवींᳪं

ष्यां ॥ छन्दोभिः सामिधेनीर्याज्याभिर्वषट्कारान् ॥ २० ॥ धा

नाः करम्भः सक्तवः परीवापः पयो दधि ॥ सोमस्य रूपᳪं हविषऽआ

मिक्षा वाजिनं मधु ॥ २१ ॥ धानानांᳪं रूपम् ॥ धानानांᳪं रूपङ्कु

वलं परीवापस्य गोधूमाः ॥ सक्तूनांᳪं रूपं बदरमुपवाकाः करम्भ

स्य ॥ २२ ॥ पयसो रूपम् ॥ पयसो रूपं यद्यवा दध्नो रूपङ्कर्कन्धूनि ॥

सोमस्य रूपं वाजिनᳪं सौम्यस्य रूपमामिक्षा ॥ २३ ॥ आश्रावय ॥

आश्श्रांवयेतिस्तोत्रियांहंप्प्रत्याश्श्रावोऽअनुरूपहं ॥ यजेतिधाय्या
रूपम्प्रगाथायेयजामहाः ॥ २४ ॥ अर्द्धऽऋचैरुक्थानाम् ॥ अर्द्धऽ
ऋचैरुक्थानांᳬरूपम्पदैराप्नोतिनिविदः ॥ प्प्रणवैःशस्त्राणांᳬरू
पम्पयसासोमंऽआप्प्यते ॥२५॥ अश्विभ्याम्प्रातहंसवनम् ॥ अश्वि
भ्याम्प्रातहंसवनमिन्द्रैणैन्द्रम्माध्यन्दिनम् ॥ वैश्वदेवहंसरस्वत्या
तृतीयमाप्तहंसवनम्॥२६॥ व्वायव्यैर्व्वायव्यानि ॥ व्वायव्यैर्व्वायव्या
न्याप्नोतिसतेनद्रोणकलशम्॥ कुम्भीभ्याम्मभृणौसुतेस्थालीभिः

स्थालीरांप्नोति ॥२७॥ यजुर्ब्भिराप्यन्ते ॥ यजुर्ब्भिराप्यन्तेग्ग्रहा
ग्ग्रहैस्तोमांश्चविष्टुतीः ॥ छन्दोंभिरुक्थाशस्त्राणिसाम्नांवभृथऽ
आंप्यते ॥ २८ ॥ इडांभिर्ब्भक्षान् ॥ इडांभिर्ब्भक्षानांप्नोतिसूक्त
वाकेनाशिषः ॥ शंयुनांपत्नीसंय्याजान्त्संमिष्टयजुषांसꣳस्थाम्
॥ २९ ॥ व्रतेनंदीक्षाम् ॥ व्रतेनंदीक्षामांप्नोतिदीक्षयांप्नोतिदक्षि
णाम् ॥ दक्षिणाश्श्रद्धामांप्नोतिश्श्रद्धयांसत्यमांप्यते ॥३०॥ एता
वद्रूपम् ॥ एतावद्रूपंय्यज्ञस्ययद्देवैर्ब्रह्मणाकृतम् ॥ तदेतत्सर्व्वमा

प्नोतियज्ञेसौत्रामणीसुते ॥३१॥[२०] सुरावन्तम्बर्हिषदम् ॥ सुरा
वन्तम्बर्हिषदꣳसुवीरंय्यज्ञꣳहिन्वन्तिमहिषानमोभिः ॥ दधा
नाꣳसोमन्दिविदेवतासुमदेमेन्द्रंय्यजमानाःस्वर्काः ॥३२॥ यस्ते ॥
यस्तेरसꣳसम्भृतऽओषधीषुसोमस्यशुष्मꣳसुरयासुतस्य ॥ तेन
जिन्वयजमानम्मदेनसरस्वतीमश्विनाविन्द्रमग्निम् ॥३३॥ यमश्विना । नमुचेरासुरादधिसरस्वत्यसुनोदिन्द्रियाय ॥ इमन्तꣳशु
क्रम्मधुमन्तमिन्दुꣳसोमꣳराजानमिहभक्षयामि ॥ ३४ ॥ यदत्र॥

यदत्रं रिप्त६ रसिनं ÷ सुतस्य यदिन्द्रो ऽअपिंबच्छचींभिः ॥ अहन्त

दंस्युमनंसाशिवेनसोमहराजांनमिहभंक्षयामि ॥३५॥ पितृभ्यंः

स्वधायिभ्यंः । स्वधानमंः पितामहेभ्यंः स्वधायिभ्यंः स्वधा

नमः प्रपितामहेभ्यंः स्वधायिभ्यंः स्वधानमंः ॥ अक्षन्पितरोमीं

मदन्तपितरोतीतृपन्तपितरः पितरः शुन्धंध्वम् ॥ ३६ ॥ पुनन्तुंमा

पितरंः सोम्यासंः पुनन्तुंमापितामहाः पुनन्तुप्रपितामहाः ॥ प

वित्रेणशतायुंषा ॥ पुनन्तुंमापितामहाः पुनन्तुप्रपितामहाः ॥

पवित्रेणशतायुषाविश्वमायुर्व्यश्नवै ॥ ३७ ॥ अग्नऽआयूꣳषि ।
पवसऽआसुवोर्ज्जमिषंञ्चनः ॥ आरेबाधस्वदुच्छुनाम् ॥ ३८ ॥ पुन
न्तुमा । देवजनाःपुनन्तुमनसाधियः ॥ पुनन्तुविश्वाभूतानिजा
तवेदःपुनीहिमा ॥३९॥ पवित्रेणपुनीहि । माशुक्रेणदेवदीद्यत् ॥
अग्नेक्रत्वाक्रतूँ१ऽरनु ॥४०॥यत्तेपवित्रमर्चिष्यग्नेविततमन्तरा ॥
ब्रह्मतेनपुनातुमा ॥ ४१ ॥ पवमानःसः ॥ पवमानःसोऽअद्यनः
पवित्रेणविचर्षणिः ॥ यःपोतासपुनातुमा ॥४२॥ उभाभ्यान्देव ।

सवितःपुवित्रेणसवेनंच ॥ माम्पुंनीहिव्विश्वतंः ॥ ४३ ॥ व्वैश्वदेवी
पुंनती । देव्यागाद्यस्यांमिमाबह्व्यस्तन्वोव्वीतपृष्ठाः ॥ तयामदन्तः
सधमादेंषुव्वयठंस्यांमपतंयोरयीणाम् ॥ ४४ ॥ येसंमानाःसमंनसः
पितरोयमराज्ये ॥ तेषाँल्लोकःस्वधानमोयज्ञोदेवेषुंकल्प्पताम् ४५
येसंमानाः ॥ येसंमानाःसमंनसोजीवाजीवेषुंमामकाः ॥ तेषाठं
श्रीर्म्मयिंकल्प्पतामस्मिँल्लोकेशतठंसमाः ॥ ४६ ॥ द्वेसृती । ऽअं
शृणवम्पितॄणामहन्देवानांमुतमर्त्यानाम् ॥ ताभ्यांमिदंव्विश्वमे

जत्समैतियदन्तरापितरम्मातरञ्च ॥ ४७ ॥ इदꣳहविः ॥ इदꣳह
विःप्रजननम्मेऽअस्तुदशवीरꣳसर्व्वगणꣳस्वस्तये ॥ आत्मसनि
प्प्रजासनिपशुसनिलोकसन्न्यमभयसनि ॥ अग्निःप्प्रजाम्बहुलाम्मे
करोत्वन्नम्पयोरेतोऽअस्म्मासुधत्त ॥४८॥[१७] उदीरताम् ॥ उदी
रतामवरऽउत्परासऽउन्मध्यमाःपितरःसोम्म्यासः ॥ असुंय्यऽ
ईयुरवृकाऽऋतज्ञास्तेनोवन्तुपितरोहवेषु ॥ ४९ ॥ अङ्गिरसोनः ।
पितरोनवग्ग्वाऽअथर्व्वाणोभृगवःसोम्म्यासः ॥ तेषांव्वयꣳसुमतौ

यज्ञियांनामपिंभद्रेसौंमनसेस्यांम ॥ ५० ॥ येनः ॥ येनःपूर्वैंपित
रःसोम्म्यासोंनूहिरेसौंमपीथंवासिष्ठाः ॥ तेभिर्य्यमःसꣳरराणो
हवीꣳष्युशन्नुशद्भिःप्रतिकामंमत्तु ॥ ५१ ॥ त्वꣳसोम ॥ त्वꣳसो
मप्रचिंकितोमनीषात्वꣳरजिष्ठमनुंनेषिपन्थांम् ॥ तवप्रणीतीपि
तरोंनऽइन्द्रोदेवेषुरत्नंमभजन्तधीराः ॥ ५२ ॥ त्वयाहि । त्वया
हिनःपितरःसोमपूर्वेकर्म्माणिचक्रुःपवमानधीराः ॥ वन्वन्नवा
तःपरिधीं १ ऽरपोर्णुवीरेभिरश्वैर्म्मघवाभवानः ॥ ५३ ॥ त्वꣳसो

म । पितृभिः संविदानोनुद्यावापृथिवीऽआततन्थ ॥ तस्म्मैतऽइ
न्द्रोहविषाव्विधेमव्वयꣳस्यामपतयोरयीणाम् ॥ ५४ ॥ बर्हिषदः
पितरः ॥ बर्हिषदःपितरऽऊत्यर्व्वागिमावोहव्याचकृमाजुषध्वम् ॥
तऽआगतावसाशन्तमेनाथानःशंय्योररपोदधात ॥५५॥ आहम् ॥
आहम्पितृन्त्सुविदत्राँ२ऽअवित्सिनपातञ्चविक्क्रमणञ्चविष्णोः ॥
बर्हिषदोयेस्वधयासुतस्यभजन्तपित्वस्तऽइहागमिष्ठाः ॥ ५६ ॥
उपहूताःपितरः । सोम्म्यासोबर्हिष्ष्येषुनिधिषुप्प्रियेषु ॥ तऽआ

गमन्तुतऽइहश्श्रुवन्त्वधिब्रुवन्तुतेवन्त्वस्म्मान् ॥५७॥ आयन्तु ।
नःपितरःसोम्म्यासोग्निष्ष्वात्ताःपथिभिर्देवयानैः ॥ अस्म्मिन्न्य
ज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्म्मान् ॥ ५८ ॥ अग्निष्ष्वात्ताः
पितरः ॥ अग्निष्ष्वात्ताःपितरऽएहगच्छतसदःसदःसदतसुप्प्रणी
तयः ॥ अत्ताहवीꣳषिप्प्रयतानिबर्हिष्ष्यथारयिꣳसर्ववीरन्दधा
तन ॥५९॥ येऽअग्निष्ष्वात्ताः ॥ येअग्निष्ष्वात्तायेऽअनग्निष्ष्वा
त्तामद्ध्येदिवःस्वधयामादयन्ते ॥ तेब्भ्यःस्वराडसुनीतिमेतांय्य

थावृशन्तुन्नवङ्कल्प्पयाति ॥ ६० ॥ अग्निष्ष्वात्तान्नृतुमतः ॥ अग्नि
ष्ष्वात्तान्नृतुमतोहवामहेनाराशुᳬसेसोमपीथंय्यंऽआशुः ॥ तेनो
व्विप्प्रासᳮसुहवाभवन्तुव्वयᳬस्यामपतयोरयीणाम् ॥ ६१ ॥ [१३]
आच्या जानु । दक्षिणतोनिषद्येमंय्यज्ञमभिगृणीतव्विश्वे॥माहिᳬ
सिष्टपितरᳮकेनचिन्नोयद्वऽआगःपुरुषताकराम ॥ ६२॥ आसीना
सोऽअरुणीनाम् ॥ आसीनासोऽअरुणीनामुपस्थेरयिन्धत्तदाशुषे
मर्त्याय ॥ पुत्रेब्भ्यःपितरस्तस्यव्वस्वᳬप्प्रयच्छतुतऽइहोर्ज्जन्दधा

त ॥६३॥ यमंग्ने । कव्यवाहन्त्वंचिन्मन्यसेरयिम् ॥ तन्नोगीर्भिः
श्श्रवाय्यंन्देवत्रापनयायुजंम् ॥ ६४॥ योऽअग्निः । कव्यवाहनः
पितॄन्यक्षदृतावृधः ॥ प्रेदुहव्यानिवोचातिदेवेभ्यंश्चपितृभ्यऽ
आ ॥ ६५ ॥ त्वमंग्ने ॥ त्वमग्नऽईडितःकव्यवाहनावाड्ढव्यानिसु
रभीणिकृत्वी ॥ प्रादाःपितृभ्यः स्वधयातेऽअंक्षन्नद्धित्वन्देवप्र
यंताहवींᳬषि ॥ ६६ ॥ येचं ॥ येचेहपितरोयेचनेहयाँश्चविद्मयाँ
२ऽउंचनप्रविद्म ॥ त्वंवेत्थयतितेजातवेदःस्वधाभिर्यज्ञᳬसुकृं

तन्नुषस्व ॥ ६७ ॥ इदम्पितृभ्यो॒नमो॑ऽअस्त्व॒द्ययेपूर्वा॑सो॒यऽउप॑रा
सऽईयुः ॥ येपार्थि॑वे॒रज॒स्यानिष॑त्ता॒येवा॒नूनꣳसुवृ॒जना॑सुवि॒क्षु ॥
॥ ६८ ॥ अधायथा॑ । नꣳपित॒रꣳपरा॑सꣳप्रत्ना॑सो॑ऽअग्नऽऋ॒तमा॑शु
षा॒णाः ॥ शुची॒दय॒न्दीधि॑तिमु॒क्थ॒शासꣳक्षामा॑भि॒न्दन्तो॑ऽअरु॒णी
रप॑व्रन् ॥ ६९ ॥ उ॒शन्त॑स्त्वा ॥ उ॒शन्त॑स्त्वा॒निधी॑मह्युशन्त॒ꣳसमि
धीमहि ॥ उ॒शन्नु॑श॒तऽआव॑हपि॒तॄन्ह॒वि॑षे॒ऽअत्त॑वे ॥ ७० ॥ अ॒पाम्फे
नेन ॥ अ॒पाम्फेनेन॒नमु॑चे॒ꣳशिर॑ऽइ॒न्द्रोद॑वर्त्तयꣳ ॥ विश्वा॒यदज॑य

स्प्पृधं÷॥७१॥[१०] सोमोराजा॥ सोमोराजामृतꣳसुतऽऋजी
षेणाजहान्मृत्युम् ॥ ऋतेनसत्त्यमिन्द्रियम्विपानꣳशुक्रमन्धसऽ
इन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ ७२ ॥ अद्भ्यःक्षीरम् ॥ अद्भ्यः
क्षीरंव्यपिबत्कुङ्ङाङ्गिरसोधिया ॥ ऋतेनसत्यमिन्द्रियंविपानꣳशु
क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ ७३ ॥ सोमंमद्भ्यः
सोमंमद्भ्योव्यपिबच्छन्दसाहꣳसःशुचिषत् ॥ ऋतेनसत्यमिन्द्रि
यंविपानꣳशुक्रमन्धसइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ ७४ ॥

११०० शतम्० ॥ अन्नात्परिस्रुतः ॥ अन्नात्परिस्रुतोरसम्ब्रह्मणा
व्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः ॥ ऋतेनसत्यमिन्द्रियंविपा
नंशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ ७५ ॥ रेतोमू
त्रम् ॥ रेतोमूत्रंविजहातियोनिम्प्रविशदिन्द्रियम् ॥ गर्भोजरायु
णावृतऽउल्बञ्जहातिजन्मना ॥ ऋतेनसत्यमिन्द्रियंविपानंशु
क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ ७६ ॥ दृष्ट्वारूपे ।
व्याकरोत्सत्यानृतेप्रजापतिः ॥ अश्रद्धामनृतेदधाच्छ्रद्धांसत्ये

प्रजापतिः ॥ ऋतेनसत्यमिन्द्रियंविपानंशुक्रमन्धसऽइन्द्रस्ये
न्द्रियमिदम्पयोमृतम्मधु ॥ ७७॥ वेदेनरूपे । व्यपिबत्सुतासुतौ
प्रजापतिः ॥ ऋतेनसत्यमिन्द्रियंविपानंशुक्रमन्धसऽइन्द्रस्ये
न्द्रियमिदम्पयोमृतम्मधु ॥ ७८॥ दृष्ट्वापरिस्रुतः॥ दृष्ट्वापरिस्रुतो
रसंशुक्रेणशुक्रंव्यपिबत्पयःसोमम्प्रजापतिः ॥ ऋतेनसत्यमि
न्द्रियंविपानंशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥
॥७९॥ [८] सीसेनतन्त्रम् ॥ सीसेनतन्त्रम्मनसामनीषिणऽऊर्णा

सूत्रेणंकवयोव्वयन्ति ॥ अश्विनांयज्ञꣳसंवितासरंस्वतीन्द्रंस्यरूपं
व्वरुंणोभिषज्ज्यन् ॥ ८० ॥ तदंस्य । रूपममृतꣳशचींभिस्तिस्रोदं
धुर्द्देवतांꣳसꣳरराणाः ॥ लोमांनिशष्पैर्ब्बहुधानतोक्मंभिस्त्वगंस्य
मांꣳसमंभवन्नलाजाः ॥ ८१ ॥ तदश्विनां । भिषजांरुद्रवंर्त्तनीसरं
स्वतीव्वयतिपेशोऽअन्तंरम् ॥ अस्थिमज्जानम्मासंरैꣳकारोतरेणद
धंतोगवांन्त्वचि ॥८२॥ सरंस्वतीमनंसा । पेशलंव्वसुनासंत्याभ्यां
व्वयतिदर्शतंव्वपुः ॥ रसंम्परिस्रुतानरोहिंतन्नग्नहुर्द्धीरस्तसंरन्नवेमं

॥८३॥ पर्यंसाशुक्रम् ॥ पर्यंसाशुक्रमुमृतंञ्जनित्रहसुरंयामूत्रांज्जन
यन्तुरेतं ॥ अपामंतिन्दुर्म्मुतिम्बाधंमानाऽऊवंद्ध्यंवातं६सुब्बुन्त
दारात् ॥ ८४ ॥ इन्द्रं सुत्रामाहृदंयेनसुत्यम्पुरोडाशेनसविताजं
जान ॥ यक्कृत्क्लोमानंव्वरुणोभिषुज्ज्यन्मतंस्न्नेवायुब्यैर्न्नर्मिनाति
पित्तम् ॥८५॥ आन्त्राणिंस्थालीः ॥ आन्त्राणिंस्थालीर्म्मधुपि
न्वंमानागुदाःपात्राणिसुदुघानधेनुः ॥ श्येनस्युपत्रन्नप्लीहाशचीं
भिरासन्दीनाभिंरुदरन्नमाता ॥ ८६ ॥ कुम्भोवंनिष्ठुः ॥ कुम्भोवं

संहि. निष्टुर्जनिताशचीभिर्यस्मिन्नग्ग्रेयोन्याङ्गर्ब्भोऽअन्तः ॥ प्लाशि पू. अ.
॥१८७॥ र्व्यक्तꣳशतधारऽउत्सोदुहेनकुम्भीस्वधाम्पितृभ्यः ॥८७॥ मुखꣳ ॥१९॥
सत् ॥ मुखꣳसदस्यशिरऽइत्सतेनजिह्वापवित्रमश्विनासन्त्सरस्व
ती ॥ चप्यन्नपायुर्भिषगस्यवालोवस्तिर्नशेपोहरसातरस्वी ॥८८॥
अश्विभ्याञ्चक्षुः ॥ अश्विभ्याञ्चक्षुरमृतङ्ग्रहाभ्याञ्छागेनते
जोहविषाशृतेन ॥ पक्ष्माणिगोधूमैःकुवलैरुतानिपेशोनशुक्रमसि ॥१८७॥
तंवसाते ॥ ८९ ॥ अविर्न । मेषोनसिवीर्य्यायप्राणस्यपन्थाऽअमृ

तोग्ग्रहाभ्याम् ॥ सरस्वत्युपवाकैर्व्यानन्नस्यानिबर्हिर्बदरैर्ज्जजान
॥९०॥ इन्द्रस्यरूपम् ॥ इन्द्रस्यरूपमृषभोबलायकर्ण्णाभ्याꣳश्रो
त्रममृतङ्ग्रहाभ्याम् ॥ यवानबर्हिर्भ्रुविकेसराणिकर्क्कन्धुज्ज्ञेमधु
सारघम्मुखात् ॥९१॥ आत्मन्नुपस्थे ॥ आत्मन्नुपस्थेनवृकस्य
लोममुखेश्मश्रूणिनव्याघ्रलोम ॥ केशानशीर्षन्यशसेश्रियैशि
खासिꣳहस्यलोमत्विषिरिन्द्रियाणि ॥ ९२ ॥ अङ्गान्यात्मन् ॥
अङ्गान्यात्मन्भिषजातदश्विनात्मानमङ्गैꣳसमधात्सरस्वती ॥

संहि. ॥१८८॥

इन्द्रस्यरूपꣳशतमानमायुश्चन्द्रेणज्योतिरमृतन्दधानाः ॥ ९३ ॥ पू. अ. ॥१९॥
सरस्वतीयोन्याम् ॥ सरस्वतीयोन्याङ्गर्भमन्तरश्विभ्याम्पत्नीसु
कृतम्बिभर्त्ति॥अपाꣳरसेनवरुणोनसाम्नेन्द्रꣳश्रियैजनयन्नप्सु
राजा ॥ ९४ ॥ तेजः पशूनाम् ॥ तेजः पशूनाꣳहविरिन्द्रियावत्प
रिस्रुतापयसासारघम्मधु ॥ अश्विभ्यान्दुग्धम्भिषजासरस्वत्या
सुताबुताभ्याममृतःसोमऽइन्दुः ॥ ९५ ॥ [१६] इतिश्रीवाजस
नेयसंहितायांएकोनविंशतितमोऽध्यायः ॥ १९ ॥ श्रीवेदपुरुषाय ॥१८८॥

नमः ॥ अनुवाकसूत्रम् ॥ क्षत्रस्ययोनिस्त्रयोदशयद्देवादशाभ्याद
धाम्यष्टौयोभूतानांचतस्रःसमिद्धइंद्रएकादशायात्वष्टौसमिद्धोअ
ग्निर्द्वादशाश्विनाहविस्त्रयोदशाश्विनातेजसैकादशनवनवतिः ॥
हरिःॐ क्षत्रस्ययोनिः ॥ क्षत्रस्ययोनिरसिक्षत्रस्यनाभिरसि ॥
मात्त्वांहिꣳसीन्मामांहिꣳसीः ॥ १ ॥ निषसाद । धृतव्रतोवरुणः
पुस्त्यास्वा ॥ साम्म्राज्यायसुक्रतुः ॥ मृत्योःपाहिविद्योत्पाहि ॥
॥ २ ॥ देवस्यत्वा । सवितुःप्प्रसवेश्विनोर्बाहुभ्यांम्पूष्णोहस्ता

ब्भ्याम् ॥ अश्विनोर्ब्भैषज्ज्येनतेजसेब्रह्मवर्च्चसायाभिषिञ्चामिस
रस्वत्यैभैषज्ज्येनवीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणबला
यश्श्रियैयशसेभिषिञ्चामि ॥ ३ ॥ कोसि । कतमोसिकस्मैत्वा
कायत्वा ॥ सुश्लोकसुमङ्गलसत्यराजन् ॥ ४ ॥ शिरोमे ॥ शिरोमे
श्श्रीर्य्यशोमुखन्त्विषिःकेशाश्चश्म्मश्श्रूणि ॥ राजामेप्प्राणोऽ
अमृतꣳसम्म्राट्चक्षुर्व्विराट्श्रोत्रम् ॥ ५ ॥ जिह्वामे । भद्रव्वाङ्महो
मनोमन्युश्स्वराड्भामः ॥ मोदाःप्प्रमोदाऽअङ्गुलीरङ्गानिमित्रम्मे

सहः ॥६॥ बाहूमे ॥ बाहूमेबलमिन्द्रियꣳहस्तौमेकर्म्मवीर्य्यम् ॥
आत्माक्षत्रमुरोमम ॥ ७ ॥ पृष्ठीर्म्मे । राष्ट्रमुदरमꣳसौग्रीवाश्च
श्रोणी ॥ ऊरूऽअरत्नीजानुनीविशोमेङ्गानिसर्व्वतः ॥ ८ ॥ ना
भिर्म्मे । चित्तंविज्ञानंपायुर्म्मेपचितिर्भसत् ॥ आनन्दनन्दावा
ण्डौमेभगःसौभाग्ग्यम्पसः ॥ जङ्घाभ्याम्पद्भ्यान्धर्म्मोस्मिविशि
राजाप्प्रतिष्ठितः ॥ ९ ॥ प्प्रतिक्षत्रे । प्प्रतितिष्ठामिराष्ट्रेप्प्रत्यश्वेषु
प्प्रतितिष्ठामिगोषु ॥ प्रत्यङ्गेषुप्प्रतितिष्ठाम्म्यात्मन्प्प्रतिप्प्राणेषुप्प्र

संहि. तिंतिष्ठामिपुष्टेप्प्रतिद्यावांपृथिव्योःप्प्रतिंतिष्ठामियुज्ञे ॥१०॥ त्रया पू. अ.
॥१९०॥ देवाः ॥ त्रयादेवाऽएकांदशत्रयस्त्रिꣳशाꣳसुराधंसꣳ ॥ बृहस्प्पतिं ॥२०॥
पुरोहितादेवस्यंसवितुꣳसवे ॥ देवादेवैरंवन्तुमा ॥ ११ ॥ प्रथमाद्वि
तीयैꣳ ॥ प्रथमाद्वितीयैर्द्वितीयांस्तृतीयैस्तृतीयाꣳसत्येनंसत्यंय्य
ज्ञेनयज्ञोयजुर्भिर्य्यजूꣳषिसामंभिꣳ सामांन्यृग्ग्भिर्ऋचंः पुरोनु
वाक्याभिꣳपुरोनुवाक्यायाज्याभिर्य्याज्यावषट्कारैर्वषट्काराऽआ ॥१९०॥
हुतिभिराहुतयोमेकामान्त्समर्द्धयन्तुभूःस्वाहा ॥ १२ ॥ लोमानि

प्प्रयंतिः ॥ लोमांनिप्प्रयंतिर्म्मर्ममुत्वङ्मुऽआनंतिरागंतिः ॥ मा॒ꣳस
म्मुऽउपंनतिर्वस्वस्त्थिमुज्जामुऽआनंतिः ॥ १३॥ [१३] यद्देवाः ॥
यद्देवादेवहेडंनन्देवांसश्चकृमावयम् ॥ अग्निर्म्मातस्म्मादेनंसोवि
श्वांन्मुञ्चत्वꣳहंसः ॥ १४॥ यदिदिवां ॥ यदिदिवायदिनक्कमेनांꣳ
सिचकृमावयम् ॥ व्वायुर्म्मातस्म्मादेनंसोविश्वांन्मुञ्चत्वꣳहंसः ॥
॥ १५ ॥ यदिजाग्ग्रंत् ॥ यदिजाग्ग्रद्यदिस्वप्नऽएनांꣳसिचकृमा
वयम् ॥ सूर्य्योंमातस्म्मादेनंसोविश्वांन्मुञ्चत्वꣳहंसः ॥ १६॥ यद्ग्रा

मे ॥ यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये ॥ यच्छूद्रे यदर्य्ये य
देनश्चकृमा व्वयं यदेकस्याधि धर्म्मणि तस्यावयजनमसि ॥ १७ ॥
यदापः ॥ यदापो ऽअघ्न्या ऽइति व्वरुणेति शपामहे ततो व्वरुण नो मु
ञ्च ॥ अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः ॥ अव देवैर्देवकृतमे
नो ऽयक्ष्यव मर्त्यैर्मर्त्यकृतम्पुरुराव्णो देव रिषस्पाहि ॥ १८ ॥ समुद्रे
ते हृदयमप्स्वन्तः सन्त्वा विशन्त्वोषधीरुतापः ॥ सुमित्रिया न ऽ
आप ऽओषधयः सन्तु दुर्म्मित्रियास्तस्मै सन्तु यो ऽस्मान्द्वेष्टि यञ्च

व्वयन्द्विष्म्मः॥ १९॥ द्रुपदादिवमुमुचानः स्विन्नः स्नातोमलांदिव ॥
पूतम्पवित्त्रेणेवाज्ज्यमापः शुन्धन्तुमैनसः ॥ २० ॥ उद्वयम् ॥ उद्व
यन्तमसस्प्परिस्वः पश्यन्त ऽउत्तरम् ॥ देवन्देवत्त्रासूर्य्यमगन्म
ज्ज्योतिरुत्तमम् ॥ २१ ॥ अपोऽअद्य ॥ अपोऽअद्यान्वचारिषह्रसे
नसमसृक्ष्महि ॥ पयस्वानग्नऽआगमन्तम्मासꣳसृजव्वर्च्चसाप्प्रज
याचधनेनच ॥ २२॥ एधोसि ॥ एधोस्येधिषीमहिसमिदसितेजो
सितेजोमयिधेहि ॥ समाववर्त्तिपृथिवीसमुषाः समुसूर्य्यः समुवि

श्वमिदञ्जगत् ॥ वैश्वानरज्ज्योतिर्भूयासंविभून्कामान्व्यश्नवै
भूःस्वाहा ॥२३॥ [१०] ॥ अभ्यादधामि ॥ समिधमग्नेव्रतपतेत्व
यि ॥ व्रतञ्चश्श्रद्धाञ्चोपैमीन्धेत्वादीक्षितोऽअहम् ॥ २४ ॥ यत्रब्र
ह्म । चक्षत्रञ्चसम्यञ्चौचरतःसह ॥ तंल्लोकम्पुण्यम्प्रज्ञेषंय्यत्र
देवाःसहाग्निना ॥ २५ ॥ यत्रेन्द्रः ॥ यत्रेन्द्रश्चवायुश्चसम्य
ञ्चौचरतःसह ॥ तंल्लोकम्पुण्यम्प्रज्ञेषंय्यत्रसेदिर्नविद्यते ॥ २६ ॥
अहशुनाते । ऽअहशुःपृच्यताम्परुषापरुः ॥ गन्धस्तेसोममवतुम

दायुरसोऽअद्ध्युतꣳ ॥ २७ ॥ सिञ्चन्तिपरिं ॥ षिञ्चत्युत्सिञ्चन्तिपु
नन्तिच ॥ सुरायैबभ्रवैमदेकिन्त्वोवदातिकिन्त्वः ॥ २८ ॥ धाना
वन्तङ्करम्भिणम् ॥ धानावन्तङ्करम्भिणमपूपवन्तमुक्थिनम् ॥
इन्द्रम्प्रातर्ज्जुषस्वनꣳ ॥ २९ ॥ बृहदिन्द्राय । गायतमरुतोवृत्रह
न्तमम् ॥ येनज्ज्योतिरजनयन्नृतावृधोदेवन्देवायजागृवि ॥ ३० ॥
अद्धर्य्योऽअद्रिभिꣳ । सुतꣳसोमम्पवित्रऽआनय ॥ पुनाहीन्द्राय
पातवे ॥ ३१ ॥ [८] योभूतानाम् ॥ योभूतानामधिपतिर्य्यस्मिँ

ल्लोकाऽअधिश्रिता॑ः ॥ यऽईशेमहृतोमुहाँस्तेनंगृह्णामित्वामुहम्म
यिगृह्णामित्वामुहम् ॥ ३२ ॥ उपयामगृहीतोस्यश्विभ्यांन्त्वासरं
स्वत्यैत्वेन्द्रायत्वासुत्राम्म्णऽ एषतेयोनिरश्विभ्यांन्त्वासरंस्वत्यै
त्वेन्द्रायत्वासुत्राम्म्णे ॥ ३३ ॥ प्राणपामे । ऽअपानपाश्चक्षुष्पाः
श्रोत्रपाश्चमे ॥ वाचोमेविश्वभेषजोमनसोसिविलायकः ॥ ३४ ॥
अश्विनंकृतस्यते ॥ अश्विनंकृतस्यतेसरंस्वतिकृतस्येन्द्रेणसुत्राम्म्णां
कृतस्य ॥ उपहूतऽउपहूतस्यभक्षयामि ॥ ३५ ॥ [४] समिद्धऽइ

न्द्रं÷ ॥ समिद्धऽइन्द्रंऽउषसामनीकेपुरोरुचांपूर्व्वकृद्वावृधानः ॥
त्रिभिर्द्देवैस्त्रिᳪशतावज्रंबाहुर्ज्जघानंवृत्रंविदुरोववार ॥ ३६ ॥ नरा
शᳪसᳪंप्रति ॥ नराशᳪसᳪंप्रतिशूरोमिमानस्तनूनपात्प्रतियज्ञस्य
धाम ॥ गोभिर्व्वपावान्मधुनासमञ्जन्हिरण्यैश्चन्द्रीयजतिप्रचे
ताः ॥ ३७ ॥ ईडितोदेवैः ॥ ईडितोदेवैर्हरिवाँ२ऽअभिष्टिराजुह्वा
नोहविषाशर्द्धमानः ॥ पुरन्दरोगोत्रभिद्वज्रंबाहुरायातुयज्ञमुप
नोजुषाणः ॥ ३८ ॥ जुषाणोबर्हिः ॥ जुषाणोबर्हिर्हरिवाँ२न्नऽइ

न्द्रं॒ प्राचीन॑ᳬसीदत्प्रदिशां॑पृथि॒व्याः॥ ऊरुप्प्रथा॑ᳬप्प्रथ॑मान॒ᳬस्यो
नमा॑दि॒त्यैर॒क्क्तं॑वसुं॑भि॒ᳬस॒जोषा॑ᳬ ॥ ३९ ॥ इन्द्रं॒न्दुरः॑ ॥ कव॒ष्ष्यो
धाव॑माना॒वृषा॑णं॒व्वन्तु॒जन॑य॒ᳬसु॒पत्नी॑ᳬ॥ द्वारो॑दे॒वीर॒भितो॒ऽव्विश्श्रं
यन्ताऽᳬसु॒वीरां॒व्वी॒रम्प्रथ॑माना॒महो॑भि॒ᳬ ॥ ४० ॥ उ॒षासा॒नक्ता॑ ।
बृ॒ह॒तीबृ॒ह॒न्त॒म्पय॑स्वतीसु॒दु॒घे॒शूर॒मिन्द्र॑म् ॥ तन्तु॒न्त॒तम्पेशं॑सासं॒व्व
यन्ती॑दे॒वानां॑न्दे॒वं॒य्यं॑जत॒ᳬसु॒रु॒क्मे ॥ ४१ ॥ दैव्या॒मिमा॑ना॒ । मनुं॑
ष॒ᳬपु॒रु॒त्रा॒होता॑रा॒विन्द्रं॑म्प्रथ॒मासु॒वाचा॑ ॥ मू॒र्द्धन्य॒ज्ञस्य॒मधु॑ना॒दधा॑

नाप्प्राचीनञ्ज्योतिर्हविषावृधानः ॥४२॥ तिस्रोदेवीः ॥ तिस्रोदेवी
र्हविषावर्द्धमानाऽइन्द्रञ्जुषाणाजनयोनपत्नीः ॥ अच्छिन्नन्तन्तुं
पयसासरस्वतीडादेवीभारतीविश्वतूर्त्तिः ॥ ४३ ॥ त्वष्टादधत् ॥ त्व
ष्टादधच्छुष्ममिन्द्रायवृष्णेपाकोचिष्टुर्यशसेपुरूणि ॥ वृषायज
न्वृषणम्भूरिरेतामूर्द्धन्यज्ञस्यसमनक्तुदेवान् ॥ ४४ ॥ वनस्पति
रवसृष्टः ॥ वनस्पतिरवसृष्टोनपाशैस्त्मन्यासमञ्जञ्छमितानदे
वः ॥ इन्द्रस्यहव्यैर्ज्जठरम्पृणानःस्वदातियज्ञम्मधुनाघृतेन ॥४५॥

स्तोकानामिन्दुम् ॥ स्तोकानामिन्दुम्प्रतिशूरऽइन्द्रोवृषायमाणो
वृषभस्तुराषाट् ॥ घृतप्रुषामनसामोदमानाःस्वाहादेवाऽअमृता
मादयन्ताम् ॥ ४६ ॥ [११] आयातु ॥ आयात्विन्द्रोवसऽउपनऽ
इहस्तुतःसधमादस्तुशूरः ॥ वावृधानस्तविषीर्यस्यपूर्वीर्द्यौर्नक्ष
त्रमभिभूतिपुष्यात् ॥ ४७ ॥ आनः ॥ आनऽइन्द्रोदूरादानऽ
आसादभिष्टिकृदवसेयासदुग्रः ॥ ओजिष्ठेभिर्नृपतिर्वज्रबाहुः
सङ्गेसमत्सुतुर्वणिःपृतन्यून् ॥ ४८ ॥ आनः ॥ आनऽइन्द्रोहरिभि

र्य्यास्त्वच्छांर्व्वाचीनोवंसेराधंसेच ॥ तिष्ठांतिव्वज्ज्रीमघवांविरप्प्शी
मंस्युज्ज्मनुंनोव्वाजंसातौ ॥ ४९ ॥ त्त्रातारमिन्द्रंम् ॥ त्त्रातारमिन्द्र
मवितारमिन्द्रंहवेहवेसुहवंशूरमिन्द्रंम् ॥ ह्वयांमिशक्क्रम्पुंरुहूत
मिन्द्रंस्वस्तिनोंमघवांधात्विन्द्रंः ॥ ५० ॥ इन्द्रंःसुत्त्रामां ॥
इन्द्रंःसुत्त्रामास्ववाँ२ऽअवोंभिःसुमृडीकोभंवतुव्विश्श्ववेंदाः ॥ बाधं
तान्द्वेषोऽअभंयङ्कृणोतुसुवीर्य्यस्यपतंयःस्याम ॥ ५१ ॥ तस्यंव्वय
म् ॥ तस्यंव्वयःसुमतौयज्ञियस्यापिंभद्द्रेसौंमनसेस्यांम ॥ ससुत्त्रा

माऽस्ववाँ२ऽइन्द्रौऽअस्म्मेऽआराच्चिद्द्वेषंः सनुऽतर्य्युयोतु ॥ ५२ ॥
आमन्द्रैः ॥ आमन्द्रैरिन्द्रहरिभिर्य्याहिमयूररोमभिः ॥ मात्वाके
चिन्नियमन्न्विन्नपाशिनोतिधन्न्वेवताँ२ऽइहि ॥ ५३ ॥ एवेत् ॥ एवे
दिन्द्रंवृषणंवज्ज्रबाहुंवसिष्ठासोऽअब्भ्यर्च्चन्त्यर्क्कैः ॥ सनंस्तुतोवी
रवंद्धातुगोमंद्यूयम्पातस्वस्तिभिःसदानः ॥ ५४ ॥ [८] समिद्धोऽ
अग्निः ॥ समिद्धोऽअग्निरश्श्विनातप्प्तोघर्म्मोविराट्सुतः ॥ दुहेधेनुः
सरस्वतीसोमंशुक्क्रमिहेन्द्रियम् ॥ ५५ ॥ तनूपाभिषजा । सुतेश्श्वि

नोभासरंस्वती ॥ मद्धारजांᳫंसीन्द्रियमिन्द्रांयपथिभिर्व्वहान् ॥
॥५६॥ इन्द्रायेन्दुंम् ॥ इन्द्रायेन्दुᳫसरंस्वतीनराशᳫंसेननग्नहुंम् ॥
अधांतामश्विनामधुंभेषजम्भिषजांसुते ॥ ५७ ॥ आजुह्वांनासरं
स्वती । न्द्रांयेन्द्रियाणिंव्वीर्य्यंम् ॥ इडांभिरश्विनाविषᳫसमूर्ज्जᳫ
सᳫरयिन्दंधुᳫ ॥ ५८ ॥ अश्विनानमुंचेᳫ । सुतᳫसोमंᳫशुक्रम्पंरि
स्रुतां ॥ सरंस्वतीतमाभंरद्बर्हिंषेन्द्रांयपातंवे ॥ ५९ ॥ कवष्ष्योन ।
व्यचंस्वतीरश्विभ्यान्नदुरोदिशंः ॥ इन्द्रोनरोदंसीऽउभेदुहेकामा

न्त्सरंस्वती ॥६०॥ उषासानक्तंम् ॥ उषासानक्तंमश्विनादिवेन्द्रं॑
सायमिंन्द्रियैः ॥ सञ्ज्ञानानेसुपेशंसासमंञ्ज्ञातेसरंस्वत्या ॥ ६१ ॥
पातन्नंः ॥ पातन्नोंऽअश्विनादिवांपाहिनक्तं॑सरस्वती ॥ दैव्यांहो
ताराभिषजापातमिन्द्र॑सचांसुते ॥ ६२ ॥ तिस्रस्त्रेधा । सरंस्वत्य
श्विनाभारतीडां ॥ तीव्रम्पंरिस्रुतासोममिन्द्रांयसुषुवुर्म्मदंम् ॥६३॥
अश्विनांभेषजम् ॥ अश्विनांभेषजम्मधुंभेषजन्नःसरंस्वती ॥ इन्द्रे
त्वष्टायशःश्रियं॑रूप॑रूंपमधुःसुते ॥ ६४ ॥ ऋतुथेन्द्रंः ॥ ऋतु

थेन्द्रोव्वनस्प्पतिः शशमानश्पंरिस्रुतां ॥ कीलालंमश्विभ्याम्मधु
दुहेधेनुश्सरंस्वती ॥ ६५ ॥ गोभिर्न्न । सोमंमश्विनामासंरेणपरिस्रु
तां ॥ समंधातꣳसरंस्वत्यास्वाहेन्द्रेंसुतम्मधुं ॥ ६६ ॥ [१२] अश्वि
नांहविश् ॥ अश्विनांहविरिंन्द्रियन्नमुंचेर्द्धियासरंस्वती ॥ आशुक्र
मांसुराद्वसुंमघमिन्द्रांयजभ्रिरे ॥ ६७ ॥ यमश्विनां ॥ यमश्विना
सरंस्वतीहविषेन्द्रमवंर्द्धयन् ॥ सबिंभेदव्वलम्मघन्नमुंचावासुरेसचां
॥ ६८ ॥ तमिन्द्रंम् ॥ तमिन्द्रंम्पशवꣳसचाश्विनोभासरंस्वती ॥

दधांनाऽअभ्यनूषतहविषांयज्ञऽइंन्द्रियैः ॥ ६९ ॥ यऽइन्द्रे ॥
यऽइन्द्रंऽइन्द्रियन्दधुःसंविताव्वरुंणोभगः ॥ ससुत्रामांहविष्षपं
तिर्य्यजंमनायसश्चत ॥ ७० ॥ सविताव्वरुंणः ॥ सविताव्वरुंणो
दधद्यजंमानायदाशुषे ॥ आदंत्तनमुंचेर्व्वसुंसुत्रामाबलंमिन्द्रियम्
॥ ७१ ॥ व्वरुंणःक्षत्रम् ॥ व्वरुंणःक्षत्रमिंन्द्रियम्भगेंनसविताश्रि
यंम् ॥ सुत्रामायशंसाबलन्दधांनायज्ञमांशत ॥ ७२ ॥ अश्वि
नागोभिः ॥ अश्विनागोभिंरिन्द्रियमश्वेभिर्व्वीर्य्यम्बलंम् ॥ हवि

ऐन्द्रꣳसरस्वतीयजमानमवर्द्धयन् ॥ ७३ ॥ तानासत्या । सुपेशं
साहिरण्यवर्त्तनीनरा ॥ सरस्वतीहविष्म्मतीन्द्रकर्म्मसुनोवत ॥
॥ ७४ ॥ ताभिषजा । सुकर्म्मणासासुदुघासरस्वती ॥ सुवृत्रहाश
तक्रतुरिन्द्रायदधुरिन्द्रियम् ॥ ७५ ॥ युवꣳसुरामम् ॥ युवꣳसु
राममश्विनानमुचावासुरेसचा ॥ विपिपानाꣳसरस्वतीन्द्रङ्कर्म्म
स्वावतम् ॥ ७६ ॥ पुत्रमिवपितरौ ॥ पुत्रमिवपितरावश्विनोभे
न्द्रावथुꣳकाव्यैर्दꣳसनाभिꣳ ॥ यत्सुरामंव्यपिबꣳशचीभिꣳसरस्व

तीत्वामघवन्नभिष्णक् ॥ ७७ ॥ यस्मिन्नश्वासऋ ॥ यस्मिन्न
श्वासऽऋषभासऽउक्षणोवशावेषाऽअवसृष्टासऽआहुताऋ ॥ कीला
लपेसोमंपृष्ठायवेधसेहृदामतिञ्जनयेचारुमग्नये ॥ ७८ ॥ अहा
व्यग्ने । हविरास्येतेस्रुचीवघृतञ्चम्वीवसोमः ॥ वाजसनिᳯरयि
मस्मेसुवीरम्प्रशस्तन्धेहियशसम्बृहन्तम् ॥ ७९ ॥ [१३] शतम्
१२०० ॥ अश्विनातेजसा । चक्षुःप्राणेनसरस्वतीवीर्यम् ॥
वाचेन्द्रोबलेनेन्द्रायदधुरिन्द्रियम् ॥ ८० ॥ गोमदूषुणासत्या ॥

गोमंदूषुणांसत्याश्वांवद्यातमश्विना ॥ वर्त्तीरुद्रानृपाय्यम् ॥८१॥
नयत् ॥ नयत्परोनान्तंरऽआदुधर्षंवृषणवसू ॥ दुःशंसोमर्त्यौरि
पुः ॥ ८२ ॥ तान्नः ॥ तानऽआवोढमश्विनारयिम्पिशङ्गंसन्दृ
शम् ॥ धिष्ण्यांवरिवोविदंम् ॥ ८३ ॥ पावकान्नः ॥ पावकानः
सरंस्वतीवाजेंभिर्वाजिनींवती ॥ यज्ञंवष्टुंधियावंसुः ॥ ८४ ॥ चोद
यित्रीसूनृतांनाम् ॥ चोदयित्रीसूनृतांनाञ्चेतंन्तीसुमतीनाम् ॥ यज्ञ
न्दंधेसरंस्वती ॥ ८५ ॥ महोऽअर्ण्णः ॥ महोऽअर्ण्णःसरंस्वतीप्र

संहि. चैतयतिकेतुनां ॥ धियोविश्वाविराजति ॥ ८६ ॥ इन्द्रायाहि । पू. अ.
॥२००॥ चित्रभानोसुताऽइमेत्वायवंः ॥ अण्वीभिस्तनांपूतासंः ॥ ८७ ॥ ॥२०॥
इन्द्रायाहि । धियेषितोविप्रजूतंःसुतावंतः ॥ उपब्रह्माणिवाघ
तंः ॥ ८८ ॥ इन्द्रायाहि ॥ इन्द्रायाहितूतुंजानऽउपब्रह्माणि
हरिवः ॥ सुतेदंधिष्वनुश्चनंः ॥ ८९ ॥ अश्विनापिबताम् ॥ अ ॥२००॥
श्विनापिबताम्मधुसरंस्वत्यासजोषसा ॥ इन्द्रंःसुत्रामांवृत्रहाजु

षताᳬंसोम्म्यम्मधुं ॥ ९० ॥ [११] इतिश्रीवाजसेनयसंहिताया
विंशतितमोऽध्यायः ॥ २० ॥ ॥ श्रीवेदपुरुषायनमः ॥ ॥



इति श्रीवाजसनेयसंहितापूर्वविंशतिः समाप्ता ॥

अथ श्रीवाजसनेयसंहिताउत्तरविंशतिप्रारंभः ॥

संहि.
॥ १ ॥

॥ श्रीगणेशायनमः ॥ अनुवाकसूत्रम् ॥ इमम्मेसमिद्धोअग्निरेका
दशकौवसंतेनऋतुनाषड्ढोतायक्षत्समिधाग्निंद्वादशाश्विनौछागस्य
सप्तदेवंबर्हिश्चतुर्दशपडेकषष्टिः ॥ हरिःॐइमम्मे । वरुणश्रुधीह
वमुद्याचंमृडय ॥ त्वामंवस्युराचके ॥ १ ॥ तत्त्वा । यामिब्रह्मं
णावन्दंमानस्तदाशांस्तेयजंमानोहविर्भिः ॥ अहेडमानोवरुणे
हबोद्ध्युरुशꣳसमानऽआयुःप्रमोषीः ॥ २ ॥ त्वन्नः ॥ त्वन्नोऽअ
ग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः ॥ यजिष्ठोवह्नितम

उ. अ.
॥२१॥
॥ १ ॥

मꣳशोशुचानोव्विश्वाद्द्वेषांꣳसिप्प्रमुमुग्ग्ध्यस्म्मत् ॥ ३ ॥ सत्वम् ॥
सत्वन्नोऽअग्नेवमोभवोतीनेदिष्ठोअस्याऽउषसोव्व्युष्टौ ॥ अवंयक्क्ष्व
नोव्वरुणꣳरराणोव्वीहिमृडीकꣳसुहवोनऽएधि ॥ ४ ॥ महीमूषु ।
मातरꣳसुव्व्रतानामृतस्यपत्नीमवसेहुवेम ॥ तुविक्क्षत्रामजरन्ती
मुरूचीꣳसुशर्म्माणमदितिꣳसुप्प्रणीतिम् ॥ ५ ॥ सुत्रामाणम्पृ
थिवीम् ॥ सुत्रामाणम्पृथिवीन्द्यामनेहसꣳसुशर्म्माणमदितिꣳसु
प्प्रणीतिम् ॥ दैवीन्नावꣳस्वरित्रामनागसमस्रवन्तीमारुहेमास्व

स्तये ॥ ६ ॥ सुनावमारुहेयम् ॥ सुनावमारुहेयमस्त्रवन्तीमना
गसम् ॥ शतारित्राꣳस्वस्तये ॥ ७ ॥ आनः ॥ आनोमित्रावरुणा
घृतैर्गव्यूतिमुक्षतम् ॥ मध्वारजाꣳसिसुक्रतू ॥ ८ ॥ प्रबाहवा । सिसृ
तञ्जीवसेनऽआनोगव्यूतिमुक्षतङ्घृतेन ॥ आमाजनेᳲश्रवयतंय्युवा
नाᳲश्रुतम्मेमित्रावरुणाहवेमा ॥ ९ ॥ शन्नः ॥ शन्नोभवन्तुवाजि
नोहवेषुदेवतातामितद्रवꣳस्वर्काः ॥ जम्भयन्तोहिंवृकꣳरक्षाꣳसि
सनेम्म्यस्मद्युयवन्नमीवाः ॥ १० ॥ वाजेवाजेवत । वाजिनोनो

धनेषुविप्राऽअमृताऽऋतज्ञाः ॥ अस्यमद्ध्वःपिबतमादयद्ध्वन्तृप्ता
यातपथिभिर्द्देवयानैः ॥ ११ ॥ समिद्धोऽअग्निः ॥ समिधासुस
मिद्धोवरेण्यः ॥ गायत्रीच्छन्दऽइन्द्रियन्त्र्यविर्गौर्व्वयोदधुः ॥ १२ ॥
तनूनपाच्छुचिव्व्रतः ॥ तनूनपाच्छुचिव्व्रतस्तनूपाश्चसरस्वती ॥
उष्णिहाच्छन्दऽइन्द्रियन्दित्यवाड्गौर्व्वयोदधुः ॥ १३ ॥ इडाभि
रग्निः ॥ इडाभिरग्निरीड्यःसोमोदेवोऽअमर्त्यः ॥ अनुष्टुप्छन्दऽ
इन्द्रियम्पञ्चाविर्गौर्व्वयोदधुः ॥ १४ ॥ सुबर्हिरग्निः । पूषण्वान्स्ती

सहि. णँबर्हिरमर्त्यꣳ ॥ बृहतीच्छन्दंऽइन्द्रियन्त्रिवत्सोगौर्वयोदधुꣳ ॥ उ. अ.
॥ ३ ॥ ॥ १५ ॥ दुरोदेवीः ॥ दुरोदेवीर्दिशोमहीर्ब्रह्मादेवोबृहस्पतिः ॥ ॥२१॥
पङ्क्तिश्छन्दंइहेन्द्रियन्तुर्य्यवाङ्गौर्वयोदधुꣳ ॥ १६ ॥ उषेयह्वीꣳसुपे
शंसाविश्वेदेवाऽअमर्त्याꣳ ॥ त्रिष्टुप्छन्दंऽइहेन्द्रियम्पष्ठवाङ्गौर्व
योदधुꣳ ॥ १७ ॥ दैव्याहोतारा । भिषजेन्द्रेणसयुजायुजा ॥ जग
तीच्छन्दंइन्द्रियमनड्वान्गौर्वयोदधुꣳ ॥ १८ ॥ तिस्रऽइडा ॥ तिस्रऽ ॥ ३ ॥
इडासरस्वतीभारतीमरुतोविशः ॥ विराट्छन्दंऽइहेन्द्रियन्धेनुर्गौ

र्न्वयोदधुः ॥ १९ ॥ त्वष्टांतुरीपं॑ ॥ त्वष्टांतुरीपोऽअद्भुतऽइन्द्रा
ग्नीपुष्टिवर्द्धना ॥ द्विपंदाच्छन्दंऽइन्द्रियमुक्षागौर्नवयोदधुः ॥ २० ॥
शमितान॑ ॥ शमितानोवनस्प्पतिः सविताप्प्रसुवन्भगंम् ॥ ककु
प्प्छन्दंऽइहेन्द्रियंवशावेहद्वयोदधुः ॥ २१ ॥ स्वाहांयज्ञं । वरु
णःसुक्षत्रोभेषजङ्करत् ॥ अतिच्छन्दाऽइन्द्रियम्बृहदृषभोगौर्वयोद
धुः ॥ २२ ॥ [११] वसन्तेनंऽऋतुनां । देवावसवस्त्रिवृतांस्तुताः ॥
रथन्तरेणतेजंसाहविरिन्द्रेवयोदधुः ॥ २३ ॥ ग्रीष्म्मेणंऽऋतुनां ।

सं ३५

संहि. देवारुद्राःपञ्चदशेस्तुताः ॥ बृहतायशसाबलꣳहविरिन्द्रेवयोदधुः उ. अ.
॥ ४ ॥ ॥ २४ ॥ वर्षाभिर्ऋतुनादित्यास्तोमेसप्तदशेस्तुताः ॥ वैरूपेणवि ॥२१॥
शौजसाहविरिन्द्रेवयोदधुः ॥ २५ ॥ शारदेनऽऋतुना ॥ देवाऽए
कविꣳशऋभवस्तुताः ॥ वैराजेनश्रियाश्रियꣳहविरिन्द्रेवयोद
धुः ॥ २६ ॥ हेमन्तेनऽऋतुना । देवास्त्रिणवेमरुतस्तुताः ॥ बले
नशक्वरीःसहोहविरिन्द्रेवयोदधुः ॥ २७ ॥ शैशिरेणऽऋतुना । ॥ ४ ॥
देवास्त्रयस्त्रिꣳशेमृतास्तुताः ॥ सत्येनरेवतीःक्षत्रꣳहविरिन्द्रेवयो

दधुः ॥ २८॥ [६] होतायक्षत् ॥ होतायक्षत्समिधाग्निमिड
स्प्पदेश्विनेन्द्रꣳसरस्वतीमजोधूम्म्रोनगोधूमैꣳकुवलैर्भेषजम्मधुश
ष्पैर्न्नतेजऽइन्द्रियम्पयꣳसोमः परिस्रुताघृतम्मधुव्यन्त्वाज्यस्य
होतर्य्यज ॥ २९ ॥ होतायक्षत्तनूनपात्सरस्वतीम् ॥ होतायक्ष
त्तनूनपात्सरस्वतीमविर्म्मेषोनभेषजम्पथामधुमताभरन्नश्विनेन्द्रा
यवीर्य्यम्बदरैरुपवाकाभिर्भेषजन्तोक्मभिꣳपयꣳसोमः परिस्रुता
घृतम्मधुव्यन्त्वाज्यस्यहोतर्य्यज ॥ ३० ॥ होतायक्षन्नराशꣳ

संहि. ॥ ५ ॥

सन्न । नृम्नहुम्पतिंꣳसुरंया भेषजम्मेषश्सरंस्वती भिषग्रथोनचन्द्रयु ॥ उ. अ. ॥२१॥
श्विनौर्व्वपा ऽइन्द्रंस्यव्वीर्य्यम्बदंरैरुपवाकाभिर्भेषजन्तोक्मभिःꣳप
यꣳसोमं÷परिस्रुतांघृतम्मधुव्व्यन्त्वाज्ज्यंस्यहोतर्य्यज ॥ ३१ ॥ हो
तांयक्षदिडेडितः ॥ होतांयक्षादिडेडितऽआजुह्वांनꣳसरंस्वतीमिन्द्र
म्बलैनवर्द्धयंन्नृषभेणगवेन्द्रियमश्विनेन्द्रांयभेषजंय्यवैꣳकर्कन्धुं
भिर्म्मधुलाजैर्न्नमासंरम्पयꣳसोमं÷ परिस्रुतांघृतम्मधुव्व्यन्त्वाज्ज्यं ॥ ५ ॥
स्यहोतर्य्यज ॥ ३२॥ होतांयक्षद्बर्हिरूर्ण्णम्म्रदाꣳ ॥ होतांयक्षद्ब

हिर॑ण्ण्यैम्म्रदाभि॒षङ्गा॒सत्या॑भि॒षजा॑श्विना॒श्वाशि॒शुम॑तीभि॒षग्ग्धे॒
नुः॒सर॑स्वतीभि॒षग्ग्दुह॑ऽ इन्द्रा॑यभेष॒जम्पय॒ हंसोम॑ः परि॒स्रुता॑घृ॒त
म्मधु॒ब्व्यन्त्वाज्ज्य॑स्य॒होत॒र्य्यज॑ ।३३। होता॑यक्ष॒द्दु॒रो॒दिश॑ः कव॒ष्व्यो॒
नव्व्य॒च॑स्वतीर॒श्विभ्या॒न्नदुरो॒दिश॒ऽइन्द्रो॒नरो॒द॑सीदु॒घैदु॒हे॒धे॒नुःसर॑
स्वत्य॒श्विनेन्द्रा॑यभेष॒जः शु॒क्कनज्ज्योति॑रिन्द्रि॒यम्पय॒ हंसोम॑ःपरि॒
स्रुता॑घृ॒तम्मधु॒ब्व्यन्त्वाज्ज्य॑स्य॒होत॒र्य्यज॑ ॥ ३४ ॥ होता॑यक्ष॒त्सु॒
पेश॑ । सो॒षेनक्क॒न्दिवा॒श्विना॒सम॑ञ्जा॒तेसर॑स्वत्या॒त्विषि॒मिन्द्रे॒नभे॒

पुजऽंश्येनोनरजंसाहृदा॒श्वि॒युयानमासंरम्पयुहंसोमं॑ परिस्रुताघृ
तम्मधुव्यन्त्वाज्यंस्यहोतर्यजं ॥ ३५ ॥ होतायक्षद्दैव्याहोतारा ।
भिषजाश्विनेन्द्रन्नजागृंविदिवानक्कन्नभैषजैः शूपद्धसरस्वतीभिष
क्वसीसैनदुहऽइन्द्रियम्पयहंसोमं॑ परिस्रुताघृतम्मधुव्यन्त्वाज्यं
स्यहोतर्य्यजं ॥ ३६ ॥ होतायक्षत्तिस्रोदेवीः ॥ होतायक्षत्तिस्रो
देवीन्नभैषजन्त्रयंस्त्रिधातंवोपसोरूपमिन्द्रेंहिरण्ययमश्विनेडान
भारतीव्वाचासरस्वतीमहऽ इन्द्रायदुहइन्द्रियम्पयहंसोमं॑ परिस्रु

ताङ्घृतम्मधुव्यन्त्वाज्यस्यहोतुर्य्यज ॥ ३७ ॥ होतायक्षत्सुरेतस
मृषभम् ॥ होतायक्षत्सुरेतसमृषभन्नर्य्यापसन्त्वष्टारमिन्द्रमश्वि
नाभिषजन्नसरस्वतीमोजोनजूतिरिन्द्रियंवृकोनरभसोभिषग्ग्य
शꣳसुरयाभेषजꣳश्रियानमासरम्पयꣳसोमः परिस्रुताघृतम्मधु
व्यन्त्वाज्यस्यहोतुर्य्यज ॥ ३८ ॥ होतायक्षद्वनस्पतिꣳशमिता
रम् ॥ होतायक्षद्वनस्पतिꣳशमितारꣳशतक्क्रतुम्भीमन्नमन्युꣳ
राजानंव्याघ्रन्नमसाश्विनाभामꣳ सरस्वतीभिषगिन्द्रायदुहऽइ

न्द्रियम्पय॒ꣳसोमं॒ परि॒स्रुता॑घृ॒तम्मधु॒ व्यन्त्वाज्य॑स्य॒ होत॒र्य्यज॑ ॥
॥ ३९ ॥ होता॑ यक्षद॒ग्निꣳ स्वाहा॑ ॥ होता॑ यक्षद॒ग्निꣳ स्वाहाज्य॑
स्य स्तो॒काना॒ꣳ स्वाहा॒ मेद॑सा॒म्पृथ॒क्स्वाहा॒ च्छाग॑म॒श्विभ्या॒ꣳ स्वाहा॑
मे॒षꣳ सर॑स्वत्यै॒ स्वाहा॑ऽऋ॒ष॒भमिन्द्रा॑य सि॒ꣳहाय॒ सह॑सऽइन्द्रि॒यꣳ स्वा
हा॒ग्निर्न भे॑ष॒जꣳ स्वाहा॒ सोम॑मिन्द्रि॒यꣳ स्वाहेन्द्र॑ꣳ सु॒त्रामा॑णꣳ सवि॒
तार॒ंवरु॑ण॒म्भि॒षजा॒म्पति॒ꣳ स्वाहा॒ वन॒स्पति॑म्प्रि॒यम्पाथो॒ न भे॑ष॒जꣳ
स्वाहा॑ दे॒वाऽआ॑ज्य॒पा जु॑षा॒णोऽ अ॒ग्निर्भे॑ष॒जम्पय॒ꣳसोमं॒ परि॒स्रुता॑

घृतम्मधुघ्यन्त्वाज्ज्यंस्यहोतुर्य्यंज ॥ ४० ॥ [१२] होताय
क्षदुश्विनौछागंस्य । वुपायामेदंसोजुषेतांᳩहुविर्होतुर्य्यंज ॥
होतायक्षुत्सरंस्वतीम्मेषस्यंवुपायामेदंसोजुषतांᳩहुविर्होतुर्य्यंज ॥
होतायक्षुदिन्द्रंमृषुभस्यंवुपायामेदंसोजुषतांᳩहुविर्होतुर्य्यंज ॥
॥ ४१ ॥ होतायक्षदुश्विनौसरंस्वतीम् ॥ होतायक्षदुश्विनोसरंस्व
तीमिन्द्रᳪसुत्रामांणमिमेसोमांः सुरामांणश्छागैर्न्नमेषैर्ऋषभैःसु
ताः शष्पैर्न्नतोक्मंभिर्लाजैर्म्महंस्वन्तोमदामासंरेणपरिंष्कृताःशु

क्काꣳपर्यंस्वन्तोमृताꣳ प्प्रस्त्थितावोमधुश्श्चुतस्तानश्विनासरस्वती
न्द्रः सुत्रामावृत्रहाजुषन्ताꣳ सोम्म्यम्मधुपिबन्तुमदन्तुव्यन्तु
होतर्यज ॥ ४२ ॥ होतायक्षदश्विनौछागस्य । हविषऽआत्ताम्
द्यमध्यतोमेदऽउद्भृतम्पुराद्वेषोभ्यःपुरापौरुषेय्यागृभोघस्तान्नून
ङ्घासेऽअज्ज्राणाय्यवसप्प्रथमानाꣳ सुमत्क्षराणाꣳशतरुद्रियाणामग्निष्ष्वात्तानाम्पीवोपवसनानाम्पार्श्वतः श्रोणितः शितामत ऽउत्सादतोङ्गादङ्गादवत्तानाङ्करतऽएवाश्विनाजुषेताꣳहविर्हो

तर्य्यजं ॥ ४३ ॥ होतायक्षत्सरस्वतीम्मेषस्यहविषऽआवयदद्य

मध्यतोमेदऽउद्भृतम्पुराद्वेषोभ्यः पुरापौरुषेय्यागृभोघसन्नूनङ्घा

सेऽअज्राणाय्यवसप्रथमानाᳫसुमत्क्षराणाᳫशतरुद्रियाणाम

ग्निष्वात्तानाम्पीवोपवसनानाम्पार्श्वतः श्रोणितः शितामतऽउ

त्सादतोङ्गादङ्गादवत्तानाङ्करदेवᳬसरस्वतीजुषताᳫहविर्होतर्य्य

ज ॥४४॥ होतायक्षदिन्द्रमृषभस्यहविषऽआवयदद्यमध्यतोमेदऽ

उद्भृतम्पुराद्वेषोभ्यः पुरापौरुषेय्यागृभोघसन्नूनङ्घासेऽ अज्रा

णाय्यवंसप्प्रथमानाॅं सुमत्क्षंराणाॅं शतरुद्रियांणामग्निष्ष्वा
त्तानाम्पीवोपवसनानाम्पार्श्वतःश्श्रोणितः शितामतउत्सादुतोङ्गां
दङ्गादवंत्तानाङ्करंदेवमिन्द्रोजुषताॅंहविर्होतर्य्यजं ॥ ४५ ॥ हो
तांयक्षद्वनस्प्पतिमभि । हिपिष्टतंमयारभिष्ठयारशनयाधिंत ॥
यत्राश्विनोश्छागंस्यहविषं÷ प्प्रियाधामांनियत्रसरंस्वत्यामेषस्यं
हविषं÷प्प्रियाधामांनियत्रेन्द्रंस्यऽऋषभस्यंहविषं÷ प्प्रियाधामां ॥ ९ ॥
नियत्राग्नेः प्प्रियाधामांनियत्रसोमंस्यप्प्रियाधामांनियत्रेन्द्रंस्यसु

त्राम्म्णंः प्प्रियाधामांनियत्त्रंसवितुश्प्प्रियाधामांनियत्त्रव्वरुणस्य
प्प्रियाधामांनियत्त्रव्वनस्प्पतेंः प्प्रियापाथांꣳसियत्त्रंदेवानामाज्ज्य
पानांम्प्प्रियाधामांनियत्त्राग्नेर्होतुंः प्प्रियाधामांनितत्त्रैतान्प्प्रस्तुत्यें
वोपस्तुत्यैवोपावंस्त्रक्षद्रभीयसऽ इवकृत्वीकरंदेवन्देवोव्वनस्प्पतिं
र्जुषतांꣳहविर्होतर्य्यजं ॥ ४६ ॥ होतांयक्षदग्निꣳस्विष्टकृतम् ॥
होतांयक्षदग्निꣳ स्विष्टकृतमयांडग्निरश्विनोश्छागंस्यहविषंः प्प्रि
याधामान्ययाड्सरंस्वत्यामेषस्यंहविषंः प्प्रियाधामान्ययाडिन्द्रं

स्यऽऋषभस्यंहविषंः प्प्रियाधामान्ययांडग्नेःप्प्रियाधामान्ययाड्सो
मंस्यप्प्रियाधामान्ययाडिन्द्रंस्यसुत्राम्म्णंः प्प्रियाधामान्ययांड्स
वितुःप्प्रियाधामान्ययाड्वरुंणस्यप्प्रियाधामान्ययाड्वनस्प्पतेंःप्प्रि
यापाथाᳫंस्ययांड्देवानांमाज्यपानांम्प्रियाधामांनियक्षंदग्नेहोंतुः
प्प्रियाधामांनियक्षत्त्वम्मांहिमानमायंजतामेज्ज्याऽइषंः कृणो
तुसोऽअंद्धराजातवेदाजुषताᳫंहविर्होतर्य्यंज ॥ ४७ ॥ [७]
देवम्बर्हिःसरंस्वतीसुदेवमिन्द्रेंऽअश्विनां ॥ तेजोनचक्षुंरक्ष्योर्ब्ब

र्हिषांदधुरिन्द्रियंव्वंसुवनेंव्वसुधेयंस्यव्यन्तुयजं ॥ ४८ ॥ देवीर्द्वारः ॥
देवीर्द्वारोऽअश्विनाभिषजेन्द्रेसरस्वती ॥ प्राणन्नवीर्य्यन्नसिद्वारो
दधुरिन्द्रियंव्वंसुवनेंव्वसुधेयंस्यव्यन्तुयजं ॥ ४९ ॥ देवीऽउषासौ ॥
देवीऽउषासावश्विनासुत्रामेन्द्रेसरस्वती ॥ बलन्नवाचमास्यऽउषा
भ्यान्दधुरिन्द्रियंव्वंसुवनेंव्वसुधेयंस्यव्यन्तुयजं ॥ ५० ॥ देवीजो
ष्ट्री ॥ देवीजोष्ट्रीसरस्वत्याश्विनेन्द्रमवर्द्धयन् ॥ श्रोत्रन्नकर्ण्णयोर्य्य
शोजोष्ट्रीभ्यान्दधुरिन्द्रियंव्वंसुवनेंव्वसुधेयंस्यव्यन्तुयजं ॥ ५१ ॥

देवीऽऊर्जाहुती ॥ देवीऽऊर्जाहुतीदुघेसुदुघेन्द्रेसरस्वत्यश्विनाभि
षजावतᳫ॥ शुक्रन्नज्ज्योतिस्तनयोराहुतीधत्तऽइन्द्रियम्वसुवनेवसु
धेयस्यव्यन्तुयज ॥ ५२ ॥ देवादेवानाम् ॥ देवादेवानाम्भिषजा
होताराविन्द्रमश्विना ॥ वषट्कारैःसरस्वतीत्विषिन्नहृदयेमतिᳫ
होतृभ्यान्दधुरिन्द्रियंवसुवनेवसुधेयस्यव्यन्तुयज ॥ ५३ ॥ देवी
स्तिस्रः ॥ देवीस्तिस्रस्तिस्रोदेवीरश्विनेडासरस्वती ॥ शूषन्नमध्ये
नाभ्यामिन्द्रायदधुरिन्द्रियंवसुवनेवसुधेयस्यव्यन्तुयज ॥ ५४ ॥

देवऽइन्द्रः ॥ देवऽइन्द्रोनराशꣳसस्त्रिवरूथःसरस्वत्याश्विभ्यां
मीयतेरथः ॥ रेतोनरूपममृतञ्जनित्रमिन्द्रायत्वष्टादधदिन्द्रिया
णिव्वसुवनेव्वसुधेयस्यव्यन्तुयज ॥५५॥ देवोदेवैः ॥ देवोदेवैर्व्वनस्प
तिर्हिरण्णयपण्णोऽअश्विभ्याꣳसरस्वत्यासुपिप्पलऽइन्द्रायपच्यय
तेमधु । ओजोनजूतिर्ॠषभोनभामंव्वनस्पतिर्नोदधदिन्द्रिया
णिव्वसुवनेव्वसुधेयस्यव्यन्तुयज ॥ ५६ ॥ देवम्बर्हिः ॥ देवम्बर्हि
र्व्वारितीनामध्वरेस्तीर्ण्णमश्विभ्यामूर्ण्णम्म्रदाꣳसरस्वत्यास्योनमिं

न्द्रतेसदः ॥ ईशायैमन्युꣳराजानम्बर्हिषादधुरिन्द्रियंव्वसुवनेव्व
सुधेयस्यव्यन्तुयज ॥ ५७ ॥ देवोऽअग्निःस्विष्टकृद्देवान्यक्षद्यथा
यथꣳ होताराविन्द्रमश्विनावाचाव्वाचꣳ सरस्वतीमग्निꣳसोमꣳ
स्विष्टकृत्स्विष्टऽइन्द्रःसुत्रामासवितावरुणोभिषगिष्टोदेवोव्वनस्प
तिःस्विष्टादेवाऽआज्ज्यपाःस्विष्टो ऽअग्निरग्निनाहोताहोत्रेस्विष्टकृ
द्यशोनदधदिन्द्रियमूर्ज्जमपचितिꣳस्वधांव्वसुवनेव्वसुधेयस्यव्यन्तु ॥१२॥
यज ॥ ५८ ॥ अग्निमद्यहोतारमवृणीतायंय्यजमानःपचन्पक्तीः

पचन्पुरोडाशान्बध्नन्नश्विभ्याञ्छागꣳसरस्वत्यैमेषमिन्द्रायऽ
ऋषभꣳसुन्वन्नश्विभ्याꣳसरस्वत्याऽइन्द्रायसुत्राम्णेसुरासोमा
न्त्सूपस्थाऽअद्य ॥ ५९ ॥ सूपस्थाऽअद्यदेवोवनस्पतिरभवद
श्विभ्याञ्छागेनसरस्वत्यैमेषेणेन्द्रायऽऋषभेणाक्षँस्तान्मेदस्तःप्र
तिपचताग्रभीषतावीवृधन्तपुरोडाशैरपुरश्विनासरस्वतीन्द्रःसुत्रा
मासुरासोमाँस्त्वामद्य ॥ ६० ॥ त्वामद्यऽऋषऽआर्षेयऽऋषी
णान्नपादवृणीतायंयजमानोबहुभ्यऽ आसङ्गतेभ्यऽएषमेदेवे

पुवसुवार्य्यर्यायंक्ष्यत्ऽइतितायादेुवादैवुदानान्न्यदुस्तान्न्यंस्म्माऽआ
चुशास्वाचंगुरस्वेपिपितश्श्वंहोतुरासिभद्र्वाञ्च्यांयुप्प्रेपितोमानुंषऽंसूक्त
वाकायंसुक्ताब्रूंहि ॥ ६१ ॥ इतिश्रीवाजसेनयसंहितायाएक
विंशोऽध्यायः ॥ २१ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥
तेजोसिपंचाग्नयएकाहिंकारायद्वेतत्सवितुर्द्दशविभूमर्मात्रैकाकाय
द्वेआब्रह्मँस्त्रयोदशशेषादेकैकोनविंᳪशतिश्चतुस्त्रिंᳪशत् ॥ हरिः
ॐ तेजोसिशुक्रममृतंमायुुष्पाऽआयुंर्म्मेपाहि ॥ देवस्यंत्वासवि

तुःप्प्र॑स॒वे॒ऽश्विनो॑र्ब्बा॒हुभ्या॑म्पू॒ष्णोहस्ता॑भ्या॒माद॑दे ॥ १ ॥ इ॒मा
म॑गृभ्णन् ॥ इ॒माम॑गृभ्णन्न्र॒श॒नामृ॒तस्य॒पूर्व्व॒ऽआयु॑षिवि॒दथे॑षुक॒
व्या ॥ सानो॑ऽअ॒स्मिन्त्सु॒तऽआब॑भूवऽऋ॒तस्य॒साम॑न्त्स॒रमा॒रप॑
न्ती ॥ २ ॥ अ॒भि॒धाऽअ॑सि ॥ अ॒भि॒धाऽअ॑सि॒भुव॑नमसिय॒न्तासि॑
ध॒र्त्ता ॥ सत्वम॒ग्निंवै॑श्वान॒रꣳसप्प्र॑थसङ्गच्छ॒स्वाहा॑कृतꣳ ॥ ३ ॥ स्व॒
गात्वा॑ । दे॒वेभ्य॑ःप्र॒जाप॑तये॒ब्रह्म॒न्न॒श्वम्भ॒न्त्स्यामि॑दे॒वेभ्य॑ःप्प्र॒
जाप॑तये॒तेन॑राध्यासम् ॥ तम्ब॑धानदे॒वेभ्य॑ःप्प्र॒जाप॑तये॒तेन॑राध्नु

हि ॥४॥ प्रजापतयेत्वा ॥ प्रजापतयेत्वाजुष्टम्प्प्रोक्षामीन्द्राग्निभ्यां
न्त्वाजुष्टम्प्प्रोक्षामिवायवेत्वाजुष्टम्प्प्रोक्षामिविश्वेभ्यस्त्वादेवेभ्यो
जुष्टम्प्प्रोक्षामिसर्वेभ्यस्त्वादेवेभ्योजुष्टम्प्प्रोक्षामि ॥ योऽअर्वन्त
ञ्जिघांꣳसतितमभ्यमीतिवरुणःपरोमर्त्तःपरःश्वा ॥ ५ ॥ [५]
अग्नयेस्वाहा ॥ अग्नयेस्वाहासोमायस्वाहापाम्मोदायस्वाहासवि
त्रेस्वाहावायवेस्वाहाविष्णवेस्वाहेन्द्रायस्वाहाबृहस्पतयेस्वाहा
मित्रायस्वाहावरुणायस्वाहा ॥ ६ ॥ [१] हिङ्कारायस्वाहा ॥

हिङ्कारायस्वाहाहिङ्कृतायस्वाहाक्रन्दतेस्वाहावक्रन्दायस्वाहाप्रो
थतेस्वाहाप्रप्रोथायस्वाहागन्धायस्वाहाघ्रातायस्वाहानिविष्टा
यस्वाहोपविष्टायस्वाहासन्दितायस्वाहावल्गतेस्वाहासीनायस्वाहा
शयानायस्वाहास्वपतेस्वाहाजाग्रतेस्वाहाकूजतेस्वाहाप्रबुद्धाय
स्वाहाविजृम्भमाणायस्वाहाविचृत्तायस्वाहासꣳहानायस्वाहोप
स्थितायस्वाहायनायस्वाहाप्रायणायस्वाहा ॥ ७ ॥ यते
स्वाहा ॥ यतेस्वाहाधावतेस्वाहोद्द्रावायस्वाहोद्द्रुतायस्वाहाशूका

रायस्वाहाशूक्कृतायस्वाहानिषण्णायस्वाहोत्थितायस्वाहाजवाय
स्वाहाबलायस्वाहाविवर्त्तमानायस्वाहाविवृत्तायस्वाहाविधून्वा
नायस्वाहाविधूतायस्वाहाशुश्रूषमाणायस्वाहाशृण्वतेस्वाहेक्षमा
णायस्वाहेक्षितायस्वाहाव्वीक्षितायस्वाहानिमेषायस्वाहायदत्ति
तस्म्मैस्वाहायत्पिबतितस्म्मैस्वाहायन्मूत्रङ्करोतितस्म्मैस्वाहाकु
र्व्वतेस्वाहाकृतायस्वाहा ॥८॥ [२] तत्सवितुः ॥ तत्सवितुर्व्वरेण्य
म्भर्ग्गोदेवस्यधीमहि ॥ धियोयोनः प्प्रचोदयात् ॥ ९ ॥ हिरण्य

पाणिमूतये सवितारमुपह्वये ॥ सचेत्तांदेवतांपदम् ॥ १० ॥ देव
स्यचेततः ॥ देवस्यचेततोमहीम्प्रसंवितुर्हवामहे ॥ सुमतिꣳसत्य
राधसम् ॥ ११ ॥ सुष्टुतिꣳसुमतीवृधः ॥ सुष्टुतिꣳसुमतीवृधोरा
तिꣳसवितुरीमहे ॥ प्रदेवायमतीविदे ॥ १२ ॥ रातिꣳसत्पतिम् ॥
रातिꣳसत्पतिम्महेसवितारमुपह्वये ॥ आसवन्देववीतये ॥ १३ ॥
देवस्यसवितुः ॥ देवस्यसवितुर्म्मतिमासवंविश्वदेव्यम ॥ धियाभ
गम्मनामहे ॥ १४ ॥ अग्निꣳस्तोमेन । बोधयसमिधानोऽअमर्त्यं

संहि.
॥ १६॥

म् ॥ हुव्यादुवेषुनोदधत् ॥ १५ ॥ सहंव्युवाट् ॥ सहंव्युवाडमंर्त्यऽ उ. अ.
उुशिग्गद्दूतश्चनोंहितः ॥ अुग्निर्द्धियासमृंण्वति ॥ १६ ॥ अुग्निन्दू ॥२२॥
तम्पुरोदंधेहव्युवाहुमुपंब्रुवे ॥ देुवाँ२आसांदयादिुह ॥ १७ ॥ अजीं
जनोुहिपवंमानुसूर्यंविुधारेुशक्मंनापयंः ॥ गोजींरयार॑हंमाणः
पुरंन्ध्या ॥ १८ ॥ [९] व्विभूर्म्मात्रा । प्प्रभूःपित्राश्वोंसिुहयोस्य
त्यौंसिुमयोस्यर्व्वासिुसप्तिंरसिव्वाुज्यसिव्वृषांसिनृमणाऽअसि ॥ य ॥ १६॥
युुर्न्नामांसिुशिशुर्न्नामांस्यादिुत्यानाम्पत्वान्विंहिुदेवाऽआशापाला

ऽएतन्देवेभ्यो॑ऽश्वमेधाय॒प्प्रोक्षित॑ᳬ रक्षत॒हरं॑न्ति॒रि॑ह॒रं॑मता॒मि॒हधृ
तिं॒रि॑ह॒स्वधृ॑ति॒ᳬस्वाहा॑ ॥ १९ ॥ [२] काय॒स्वाहा॑ ॥ काय॒स्वाहा॒क
स्म्मै॒स्वाहा॑कत॒मस्म्मै॒स्वाहा॒स्वाहा॒धिमाधीता॑य॒स्वाहा॒मनः॑प्प्रजा
प॑तये॒स्वाहा॑चि॒त्तंव्वि॑ज्ञाता॒यादि॑त्यै॒स्वाहादि॑त्यैम॒ह्यै॒स्वाहादि॑त्यैसुमृ
डी॒कायै॒स्वाहा॒सर॑स्वत्यै॒स्वाहा॒सर॑स्वत्यैपाव॒कायै॒स्वाहा॒सर॑स्वत्यैबृह
त्यैस्वाहा॑पू॒ष्णेस्वाहा॑पू॒ष्णेप्प्र॑प॒थ्या॒य॒स्वाहा॑पू॒ष्णेन॒रन्धि॑षाय॒स्वा
हा॒त्वष्ट्रे॒स्वाहा॒त्वष्ट्रे॑तु॒रीपा॑य॒स्वाहा॒त्वष्ट्रे॑पु॒रु॒रूपा॑य॒स्वाहा॒व्विष्ण॑वे

संहि. स्वाहा॒विष्ण॑वेनिभूयपाय॒स्वाहा॒विष्ण॑वेशिपिवि॒ष्टाय॒स्वाहा॑ ॥२०॥ उ. अ.
॥ १७॥ विश्वो॑दे॒वस्य॑ । ने॒तुर्म्मर्त्तो॑वुरीतस॒ख्यम् ॥ विश्वो॑रा॒यऽइ॑षुध्यतिद्यु॒म्म्नं ॥२२॥
वृ॑णीतपु॒ष्ष्यसे॒स्वाहा॑ ॥ २१ ॥ [१] आब्रह्म॑न् ॥ आब्रह्म॑न्ब्राह्म॒
णोब्र॑ह्मवर्च्च॒सीजा॑यता॒मारा॒ष्ट्रेरा॑ज॒न्यः॒शूर॑ऽइष॒व्योऽति॑व्या॒धीम॑हा
र॒थोजा॑यता॒न्दोग्ग्ध्रीं॑धे॒नुर्वोढा॑न॒ड्वाना॒शुः सप्ति॒ःपुर॑न्धि॒र्य्योषा॑
जि॒ष्णूर॑थे॒ष्ठाःस॒भेयो॒युवास्य॒यज॑मानस्यवी॒रोजा॑यतान्निका॒मेनि॑ ॥१७॥
कामेनः॒पर्ज्ज॑न्न्यो॒वर्षतु॒फल॑वत्यो॒न॒ऽओष॑धयःपच्च्यन्तां॒योगक्षे॒मो

नः कल्पताम् ॥ २२ ॥ [१] प्राणायस्वाहा । पानायस्वाहाव्या
नायस्वाहाचक्षुषेस्वाहाश्रोत्रायस्वाहावाचेस्वाहामनसेस्वाहा ॥
॥ २३ ॥ [१] प्राच्यैदिशे । स्वाहार्वाच्यैदिशेस्वाहादक्षिणायैदि
शेस्वाहार्वाच्यैदिशेस्वाहाप्रतीच्यैदिशेस्वाहार्वाच्यैदिशेस्वाहोदी
च्यैदिशेस्वाहार्वाच्यैदिशेस्वाहोर्ध्वायैदिशेस्वाहार्वाच्यैदिशेस्वाहा
वाच्यैदिशेस्वाहार्वाच्यैदिशेस्वाहा ॥ २४ ॥ [१] अद्भ्यःस्वा
हावार्भ्यःस्वाहोदकायस्वाहातिष्ठन्तीभ्यःस्वाहास्रवन्तीभ्यः

स्वाहास्यन्दमानाभ्यःस्वाहाकूप्याभ्यःस्वाहासूद्याभ्यःस्वाहा
धार्याभ्यःस्वाहार्ण्णवायस्वाहासमुद्रायस्वाहासरिरायस्वाहा ॥
॥ २५ ॥ [१] व्वातायस्वाहा । धूमायस्वाहाभ्रायस्वाहामेघा
यस्वाहाविद्योतमानायस्वाहास्तनयतेस्वाहावस्फूर्ज्जतेस्वाहाव्वर्षते
स्वाहाववर्षतेस्वाहोग्ग्रंव्वर्षतेस्वाहाशीग्घ्रंव्वर्षतेस्वाहोद्गृह्णतेस्वाहो
द्गृहीतायस्वाहाप्प्रुष्णतेस्वाहाशीकायतेस्वाहाप्प्रुष्वाभ्यःस्वा
हाह्रादुनीभ्यःस्वाहानीहारायस्वाहा ॥ २६ ॥ [१] अग्नये

स्वाहा ॥ अग्नयेस्वाहासोमायस्वाहेन्द्रायस्वाहापृथिव्यैस्वाहान्त
रिक्षायस्वाहादिवेस्वाहादिग्ग्भ्यःस्वाहाशाब्भ्यः स्वाहोर्व्यैदिशे
स्वाहार्वाच्यैदिशेस्वाहा ॥ २७ ॥ [१] नक्षत्रेब्भ्यःस्वाहा ॥ नक्ष
त्रियेब्भ्यःस्वाहाहोरात्रेब्भ्यःस्वाहार्द्धमासेब्भ्यःस्वाहामासेब्भ्यः
स्वाहऽऋतुब्भ्यःस्वाहार्तवेब्भ्यःस्वाहासंवत्सरायस्वाहाद्यावापृथि
वीब्भ्याᳪंस्वाहाचन्द्रायस्वाहासूर्य्यायस्वाहारश्मिब्भ्यःस्वाहाव
सुब्भ्यःस्वाहारुद्रेब्भ्यःस्वाहादित्येब्भ्यः स्वाहामरुद्भ्यःस्वाहाविश्वे

संहि. ॥ १९ ॥

भ्योदेवेभ्यः स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पति
भ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा
॥ २८ ॥ [१] शतम् १३०० ॥ पृथिव्यै स्वाहा ॥ पृथिव्यै स्वा
हान्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्राय स्वाहा नक्षत्रे
भ्यः स्वाहाद्भ्यः स्वाहौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा प
रिप्लवेभ्यः स्वाहा चराचरेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा ॥ २९ ॥
[१] असवे स्वाहा ॥ असवे स्वाहा वसवे स्वाहा विभुवे स्वाहा विवस्व

॥ १९ ॥

तेस्वाहागणश्रियेस्वाहागणपतयेस्वाहाभिभुवेस्वाहाधिपतयेस्वा
हाशूषायस्वाहासꣳसर्प्पायस्वाहाचन्द्रायस्वाहाज्योतिषेस्वाहाम
लिम्म्लुचायस्वाहादिवापतयतेस्वाहा ॥३०॥ [१] मधवेस्वाहा ॥
मधवेस्वाहामाधवायस्वाहाशुक्रायस्वाहाशुचयेस्वाहानभसेस्वा
हानभस्यायस्वाहेषायस्वाहोर्ज्जायस्वाहासहसेस्वाहासहस्यायस्वा
हातपसेस्वाहातपस्यायस्वाहाꣳहसस्पतयेस्वाहा ॥ ३१ ॥ [१]
वाजायस्वाहा।प्रसवायस्वाहापिजायस्वाहाक्रतवेस्वाहास्वःस्वा

हा॑मू॒र्द्ध्न्ये॑स्वाहा॑व्य॑श्नु॒विने॒स्वाहा॒न्त्या॑य॒स्वाहा॒न्त्या॑यभौव॒नाय॒स्वा
हा॒भुव॑नस्य॒पत॑ये॒स्वाहाधि॑पतये॒स्वाहा॑प्र॒जाप॑तये॒स्वाहा॑ ॥ ३२ ॥
[१] आयु॑र्य॒ज्ञेन॑ । कल्पता॒ꣳ॒स्वाहा॑प्रा॒णोय॒ज्ञेन॑कल्पता॒ꣳ॒ स्वा
हा॑पा॒नोय॒ज्ञेन॑कल्पता॒ꣳ॒स्वाहा॑व्या॒नोय॒ज्ञेन॑कल्पता॒ꣳ॒स्वाहो॑दा॒नो
य॒ज्ञेन॑कल्पता॒ꣳ॒स्वाहा॑समा॒नोय॒ज्ञेन॑कल्पता॒ꣳ॒स्वाहा॒चक्षु॑र्य॒ज्ञेन॑
कल्पता॒ꣳ॒स्वाहा॒श्रोत्रं॑य॒ज्ञेन॑कल्पता॒ꣳ॒स्वाहा॒वाग्य॒ज्ञेन॑कल्प
ता॒ꣳ॒स्वाहा॒मनो॑य॒ज्ञेन॑कल्पता॒ꣳ॒स्वाहा॒त्माय॒ज्ञेन॑कल्पता॒ꣳ॒

स्वाहा ब्रह्मा यज्ञेन कल्पताꣳ स्वाहा ज्योतिर्यज्ञेन कल्पताꣳ
स्वाहा स्वर्यज्ञेन कल्पताꣳ स्वाहा पृष्ठं यज्ञेन कल्पताꣳ स्वाहा य
ज्ञो यज्ञेन कल्पताꣳ स्वाहा ॥ ३३ ॥ एकस्मै स्वाहा द्वाभ्याꣳ
स्वाहा शताय स्वाहैकशताय स्वाहा व्युष्ट्यै स्वाहा स्वर्गाय स्वाहा
॥३४॥ [१] इतिश्रीवाजसनेयसंहितायांद्वाविंशोऽध्यायः ॥२२॥
श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ हिरण्यगर्भोयःप्राणतोद्वि
कौसुजंत्यष्टौवायुश्चापंचप्राणायतिस्रउत्सक्थ्याद्वादशगायत्री

स्त्वाषट्कौकःस्विदष्टौकास्विद्दशसुभूःस्वयंभूस्तिस्रएकादशपंचष
ष्टिः ॥ हरिःॐ हिरण्यगर्भःसम् ॥ हिरण्यगर्भःसमंवर्त्तताग्ग्रे
भूतस्यंजातःपतिरेकंऽआसीत् ॥ सदांधारपृथिवीन्द्यामुतेमाङ्कस्म्मै
देवायंहविषांविधेम ॥ १ ॥ उपयामगृंहीतोसि । प्रजापंतयेत्वा
जुष्टङ्गृह्णाम्म्येषतेयोनिःसूर्य्यंस्तेमहिमा ॥ यस्तेहन्त्संवत्सरेमंहि
मासम्बभूवयस्तेंवायावन्तरिंक्षेमहिमासम्बभूवयस्तेंदिविसूर्य्येंम ॥ २१ ॥
हिमासम्बभूवतस्म्मैतेमहिम्नेप्रजापंतयेस्वाहांदेवेभ्यंः ॥ २ ॥

[२] यः प्प्राणतो । निमिषतो महित्वैक ऽइद्राजा जगतो बभूव ॥
य ऽईशे ऽअस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ ३ ॥
उपयामगृहीतोसि । प्प्रजापतये त्वा जुष्टङ्गृह्णाम्म्येष ते योनिश्चन्द्र
मास्ते महिमा ॥ यस्ते रात्रौ संवत्सरे महिमा सम्बभूव यस्ते पृथिव्या
मग्नौ महिमा सम्बभूव यस्ते नक्षत्रेषु चन्द्रमसि महिमा सम्बभूव त
स्म्मै ते महिम्म्ने प्प्रजापतये देवेब्भ्यः स्वाहा ॥ ४ ॥ [२] युञ्जन्ति ब्र
ध्नमरुषञ्चरन्तम्परि तस्त्थुषः ॥ रोचन्ते रोचना दिवि ॥ ५ ॥ युञ्ज

न्त्यंस्य ॥ सुञ्जन्त्यंस्यकाम्म्याहरीविपंक्षसारथें ॥ शोणांधृष्षणूनृ
वाहंसा ॥ ६ ॥ यद्वातं÷ ॥ यद्वातोंऽअपोऽअगंनीगन्त्प्रियामिन्द्रं
स्यतन्वम् ॥ एतꣳस्तोंतरनेनंपथापुनरश्वमावंर्त्तयासिनः ॥ ७ ॥
वसंवस्त्वा । ञ्जन्तुगायत्रेणच्छन्दंसारुद्रास्त्वांञ्जन्तुत्रैष्टुंभेनच्छ
न्दंसादित्यास्त्वांञ्जन्तुजागंतेनच्छन्दंसा ॥ भूर्भुवःस्वर्लाँजी ३
च्छाँची ३ न्यव्ये गव्यंऽएतदन्नंमत्तदेवाऽएतदन्नंमद्धिप्रजापते ॥
॥ ८ ॥ कश्स्वित् ॥ कश्स्विदेकाकीचंरतिकऽउंस्विज्जायतेपुनं÷ ॥

किꣳस्विद्धिमस्यंभेषजङ्किम्म्वावपंनम्महत् ॥ ९ ॥ सूर्य्यंऽएका
की । चंरतिचन्द्रमांजायतेपुनंः ॥ अग्निर्हिमस्यंभेषजम्भूमिरा
वपंनम्महत् ॥ १० ॥ कास्वित् ॥ कास्विदासीत्पूर्वचित्तिःकिꣳ
स्विदासीद्बृहद्वयंः ॥ कास्विदासीत्पिलिप्पिलाकास्विदासीत्पिश
ङ्गिला ॥ ११ ॥ द्यौरांसीत् ॥ द्यौरांसीत्पूर्वचित्तिरश्वंऽआसीद्बृहद्व
यंः ॥ अविरासीत्पिलिप्पिलारात्रिरासीत्पिशङ्गिला ॥ १२ ॥ [८]
वायुष्ट्वा । पचतैरंवतुत्वासितग्रीवश्छागैर्न्यग्ग्रोधश्चमसैःशल्म्म

लिर्वृद्ध्यां ॥ एषस्यराथ्योवृषापड्भिश्चतुर्भिरेदंगन्ब्रह्माकृष्णश्च
नोवतुनमोग्नये ॥ १३ ॥ सᳫंशितोरश्मिना । रथᳫंसᳫंशितोर
श्मिनाहयंः ॥ सᳫंशितोऽअप्स्वप्सुजाब्रह्मासोमंपुरोगवᳫं ॥
॥ १४ ॥ स्वयंवाजिन् ॥ स्वयंवाजिंस्तन्वंकल्पयस्वस्वयंय्यंजस्व
स्वयञ्जुषस्व ॥ महिमातेन्येननसन्नशे ॥ १५ ॥ नवै ॥ नवाऽउंऽए
तन्म्रियसेनरिष्यसिदेवाँ २ ऽइदेषिपथिभिःसुगेभिः ॥ यत्रास
तेसुकृतोयत्रतेययुस्तत्रंत्वादेवᳫंसविताधातु ॥१६॥ अग्निःपशुः ॥

अग्निःपशुरासीत्तेनायजन्तसऽएतंल्लोकमजयद्यस्मिन्नग्निःस
तेलोकोभविष्यतितञ्जेष्यसिपिबैताऽअपः ॥ वायुःपशुरासीत्ते
नायजन्तसऽएतंल्लोकमजयद्यस्मिन्वायुःसतेलोकोभविष्यति
तञ्जेष्यसिपिबैताऽअपः ॥ सूर्य्यःपशुरासीत्तेनायजन्तसऽएतं
ल्लोकमजयद्यस्मिन्त्सूर्य्यःसतेलोकोभविष्यतितञ्जेष्यसिपिबै
ताऽअपः ॥ १७॥ प्राणायस्वाहा । पानायस्वाहाव्यानायस्वाहा ॥
अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन ॥ ससस्त्यश्वकःसुभ

द्रिकाङ्काम्पीलवासिनीम् ॥ १८ ॥ गणानान्त्वा । गणपतिꣳहवा
महेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳ
हवामहेव्वसोमम ॥ आहमजानिगर्ब्भधमात्वमजासिगर्ब्भधम् १९
ताऽउभौ । चतुरः पदः सम्प्रसारयावस्वर्ग्गेलोकेप्प्रोर्णुवाथांव्वृषा
व्वाजीरेतोधारेतोदधातु ॥२०॥ [३] उत्सक्थ्याऽअवगुदन्धेहि स
मञ्जिञ्चारयाव्वृषन् ॥ यस्त्रीणाञ्जीवभोजनः ॥ २१ ॥ यकासकौ । ॥२४॥
शकुन्तिकाहलगितिव्वञ्चति । आहन्तिगभेपसोनिगल्गलीतिधारं

का ॥ २२ ॥ यकोसकौ । शंकुन्तकऽआहलगितिवञ्चंति ॥ विवंक्ष
तऽइवतेमुखमर्द्धंर्ग्यांमानुस्त्वमभिभांपथाः ॥२३॥ माताचं । ते
पिताचुतेग्ग्रंवृक्षस्यंरोहतः ॥ प्रतिंलामीतिंतेपितागभेमुष्टिमंतॸस
यत् ॥२४॥ माताचं । तेपिताचुतेग्ग्रेवृक्षस्यंक्रीडतः ॥ विवंक्षतऽइ
वतेमुखम्ब्रहमन्मात्वंवंदोबहु ॥ २५ ॥ ऊर्द्धामैनाम् ॥ ऊर्द्धामैना
मुच्छ्रांपयगिरौभारॸहरंन्निव ॥ अथांस्यैमद्धंमेधताꣳशीतेवातेपुन
न्निव ॥२६॥ ऊर्द्धमैनम् ॥ ऊर्द्धमैनमुच्छ्रंयताद्गिरौभारॸहरंन्निव ॥

अथास्यमध्यमेजतुशीतेवातेपुनन्निव ॥२७॥ यदस्याꣳ ॥ यदस्याऽ
अꣳहुभेद्याꣳकृधुस्थूलमुपातसत ॥ मुष्काविदस्याऽएजतोगोशफे
शकुलाविव ॥२८॥ यद्देवासः ॥ यद्देवासोललामंगुम्प्रविष्टीमिन्
माविषुꣳ ॥ सक्थ्नादेदिश्यतेनारीसत्यस्याक्षिभुवोयथा ॥ २९ ॥
यद्धरिणः ॥ यद्धरिणोयवमत्तिनपुष्टम्पशुमन्यते ॥ शूद्रायदर्य्यं
जारानपोषायधनायति ॥ ३० ॥ यद्धरिणोयवमत्तिनपुष्टम्बहुम
न्यते । शूद्रोयदर्य्यायैजारोनपोषमनुमन्यते ॥ ३१ ॥ दधिक्रा

ण्णोऽअकारिषञ्जिष्ण्णोऽरश्श्वंस्यब्बाजिनं॑ः ॥ सुरभिनोमुखांकरत्स
णऽआयूंठंषितारिषत् ॥ ३२ ॥ [१२] गायत्रीत्त्रिष्टुप् ॥ गायत्री
त्त्रिष्टुब्ब्जगंत्यनुष्टुप्पङ्क्त्यासह ॥ बृहत्युष्णिहांकुकुप्सूचीभिं॑ःश
म्म्यन्तुत्वा ॥ ३३ ॥ द्विपंदायाः ॥ द्विपंदायाश्च्चतुष्पदास्त्रिपंदा
याश्च्चषट्पंदाः ॥ विच्छंन्दायाश्च्चसच्छंन्दाः सूचीभिं॑ःशम्म्यन्तुत्वा
॥ ३४ ॥ महानाम्न्योरेवत्यं॑ः ॥ महानाम्न्योरेवत्योव्विश्श्वाऽ
आशांःप्प्रभूवंरीः ॥ मैघीर्व्विद्युतोव्वाचं॑ःसूचीभिं॑ःशम्म्यन्तुत्वा ॥

संहि. ॥ ३५ ॥ नार्य्यस्तेपत्न्योलोमविचिन्वन्तुमनीषया ॥ देवानाम्प उ. अ.
॥२६॥ त्न्योदिशःसूचीभिःशम्म्यन्तुत्वा ॥ ३६ ॥ रजताहरिणीः । सी ॥२३॥
सायुजोयुज्यन्तेकर्म्मभिः ॥ अश्वस्यव्वाजिनस्त्वचिसिमाःशम्म्य
न्तुशम्म्यन्तीः ॥ ३७ ॥ कुविदङ्ग । यवमन्तोयवञ्चिद्यथादान्त्य
नुपूर्व्वंव्वियूय ॥ इहेहैषाङ्कृणुहिभोजनानियेबर्हिषोनमऽउक्तिंय्य
जन्ति ॥ ३८ ॥ [८] कस्त्वा ॥ कस्त्वाछ्यतिकस्त्वाव्विशास्ति ॥ २६ ॥
कस्तेगात्राणिशम्म्यति ॥ कउतेशमिताकविः ॥ ३९ ॥ ऋतवं

स्ते ॥ ऋतवंस्तऽऋतुथापर्व्वंशमितारोव्विशांसतु ॥ संव्वत्सरस्यतेजं
साशमीभिंःशम्म्यन्तुत्वा ॥ ४० ॥ अर्द्धमासाःपरूꣳषितेमासाऽ
आच्छ्यंन्तुशम्म्यंन्तꣳ ॥ अहोरात्राणिमरुतोव्विलिंष्टꣳसूदयन्तु
ते ॥ ४१ ॥ दैव्व्यांऽअद्ध्वर्य्यव । स्त्वाच्छ्यंन्तुव्विचंशासतु ॥ गात्रांणि
पर्व्वंशस्तेसिमांꣳकृण्ण्वन्तुशम्म्यंन्तीꣳ ॥ ४२ ॥ द्यौस्तें । पृथिव्व्युन्त
रिंक्षंव्वायुश्छिद्रंम्पृणातुते ॥ सूर्य्यंस्तेनक्षंत्रैꣳसहलोकङ्कृंणोतुसाधुया
॥४३॥ शन्तें ॥ शन्तेपरेंब्भ्योगात्रेंब्भ्युꣳशमस्त्ववंरेब्भ्यꣳ ॥ शम्

सहि॰ स्त्यथम्भ्यौमुज्जम्भ्युहंशाम्म्वंस्तुतन्वैुतवं ॥ ४४ ॥ [६] कश्स्वित् ॥ उ॰ अ॰
॥ २७ ॥ कश्स्विदेकाकीचंरतिकऽउंस्विज्जायतेपुनंः ॥ किंᳬस्विद्धिमस्यंभे ॥ २३ ॥
षुजङ्किम्म्वावपंनम्महत् ॥ ४५ ॥ सूर्य्यंऽएकाकी । चंरतिचुन्द्रमां
जायतेपुनंः ॥ अग्निर्हिमस्यंभेषुजम्भूमिंरावपंनम्महत् ॥ ४६ ॥
किंᳬस्वित् ॥ किंᳬस्वित्सूर्य्यसमञ्ज्योतिंःकिंᳬसंमुद्रसंमहसरंः ॥
किंᳬस्वित्पृथिव्यैवर्षीयंःकस्यमात्रानविंद्यते ॥ ४७ ॥ ब्रह्मसूर्य्यं ॥ २७ ॥
समम् ॥ ब्रह्मसूर्य्यसमञ्ज्योतिर्द्योंःसंमुद्रसंमहसरंः ॥ इन्द्रंःपृथि

व्यैव्वर्षीयान्गोस्तुमात्रानविद्यते ॥ ४८ ॥ पृच्छामित्वा । चितयै
देवसखयदित्वमत्रमनसाजगन्थ ॥ येषुव्विष्णुस्त्रिषुपदेष्ष्वेष्टस्ते
षुविश्वम्भुवनमाविवेश ॥ ४९ ॥ अपितेषु । त्रिषुपदेष्ष्वस्म्मिये
षुविश्वम्भुवनमाविवेश ॥ सद्यःपर्य्यैमिपृथिवीमुतद्यामेकेनाङ्गेन
दिवोऽअस्यपृष्ठम् ॥ ५० ॥ केष्ष्वन्तः । पुरुषऽआविवेशतान्यन्तः
पुरुषेऽअर्प्पितानि ॥ एतद्ब्रह्मन्नुपवल्हामसित्वाकिंस्विन्नःप्प्रति
वोचास्यत्र ॥ ५१ ॥ पञ्चस्वन्तः । पुरुषऽआविवेशतान्यन्तःपुरु

षेऽअर्प्पितानि ॥ एतत्वात्रप्प्रतिमन्न्वानोऽअस्म्मिनसाययांभव
स्युत्तरोमत् ॥ ५२ ॥ [८] कास्वित् ॥ कास्विदासीत्पूर्व्वचित्तिः
किᳬस्विदासीद्बृहद्वयः ॥ कास्विदासीत्पिलिप्पिलाकास्विदासी
त्पिशङ्गिला ॥ ५३ ॥ द्यौरासीत् ॥ द्यौरासीत्पूर्व्वचित्तिरश्श्वऽआसी
द्बृहद्वयः ॥ अविरासीत्पिलिप्पिलारात्रिरासीप्पिशङ्गिला ॥५४॥
काऽईम् ॥ काऽईमरेपिशङ्गिलाकाऽईङ्कुरुपिशङ्गिला ॥ कऽईमा
स्कन्दमर्षतिकऽईम्पन्थांव्विसर्प्पति ॥ ५५ ॥ अजारे । पिशङ्गिला

श्वावित्कुरुपिशङ्गिला ॥ शशऽआस्कन्दमर्षत्यहिःपन्थांविसर्प्प
ति ॥ ५६ ॥ कत्यंस्य । विष्ठाःकत्यक्षराणिकतिहोमासःकतिधा
समिद्धः ॥ यज्ञस्यंत्वाविदथांपृच्छमत्रकतिहोतारऽऋतुशोयंज
न्ति ॥ ५७ ॥ षडस्य । विष्ठाःशतमक्षराण्यशीतिहोमाःसमिधो
हतिस्रः ॥ यज्ञस्यंतेविदथाप्प्रब्ब्रवीमिसप्तहोतारऽऋतुशोयंजन्ति
॥ ५८ ॥ कोऽअस्य । वेदभुवनस्यनाभिङ्कोद्यावापृथिवीऽअन्तरि
क्षम् ॥ कःसूर्य्यस्यवेदबृहतोजनित्रङ्कोवेदचन्द्रमसंयतोजाः ॥

संहि. ॥ २९ ॥

॥ ५९ ॥ वेदाहम् ॥ वेदाहमस्यभुवनस्यनाभिंवेदद्यावापृथिवीऽ उ. अ. ॥ २३ ॥
अन्तरिक्षम् ॥ वेदसूर्य्यस्यबृहतोजनित्रमथोवेदचन्द्रमसंयतो
जाः ॥ ६० ॥ पृच्छामित्वा ॥ पृच्छामित्वापरमन्तम्पृथिव्याःपृ
च्छामियत्रभुवनस्यनाभिः ॥ पृच्छामित्वावृष्णोऽअश्वस्यरेतः
पृच्छामिवाचःपरमंव्योम ॥ ६१ ॥ इयंवेदिः ॥ इयंवेदिःपरोऽ
अन्तः पृथिव्याऽअयंयज्ञोभुवनस्यनाभिः ॥ अयᳫंसोमोवृ ॥ २९ ॥
ष्णोऽअश्वस्यरेतोब्रह्मायंवाचःपरमंव्योम ॥ ६२ ॥ [१०] सुभूः

स्वंयम्भूः । प्प्रंथमोन्तर्म्मंहृत्य॒र्ण्णंवे ॥ द॒धेह॒गर्ब्भंमृत्वियुंर्य्यतो
जा॒तश्प्र॒जापंतिः ॥ ६३ ॥ होतांयक्षत् ॥ होतांयक्षत्प्र॒जापंति॒ꣳ
सोमंस्यमहि॒म्मन्नः ॥ जुषता॒म्पिबंतु॒सोम॒ꣳहोत॒र्य्यंज ॥ ६४ ॥ प्रजां
पते॒न । त्वदे॒तान्य॒न्न्यो॒विश्श्वांरू॒पाणि॒परि॒ताबंभूव ॥ यत्कांमास्तेजु
हु॒मस्तन्नौऽअस्तुव॒यꣳस्यां॒म॒पतंयोरयी॒णाम् ॥ ६५ ॥ [३] इतिश्री
वाजसेनयसंहितायांत्रयोविंशोऽध्यायः ॥ २३ ॥ श्रीवेदपुरुषाय
नमः ॥ अनुवाक्सूत्रम् ॥ अश्वस्तू॒परोधूम्रान्वसंतायसमुद्रायशि

 शुमारान्मयुःप्राजापत्योदशकाश्चत्वारश्चत्वारिꣳशत् ॥ हरिःॐ
॥३०॥ अश्वंस्तूपरः ॥ अश्वंस्तूपरोगोमृगस्तेप्प्राजापत्याःकृष्णग्ग्रीवऽ ॥२४॥
आग्नेयोरराटेंपुरस्तात्सारस्वतीमेष्ष्युधस्ताद्धन्न्वौराश्विनावधोरां
मौबाह्वोःसौमापौष्णःश्यामोनाब्भ्यांꣳसौर्य्ययामौश्वेतश्चंकृ
ष्णश्चंपार्श्वयोस्त्वाष्ट्रौलोमशसंक्क्थौसक्थ्योर्व्वायव्यःश्वेतःपुच्छ
ऽइन्द्रांयस्वपस्यायव्वेहद्वैष्णवोव्वांमनः ॥ १ ॥ रोहितोधूम्म्ररो ॥३०॥
हितः ॥ कर्क्कन्धुंरोहितस्तेसौम्म्याबब्भ्रुररुणबंब्भ्रुःशुकंबब्भ्रुस्ते

वारुणाःशितिरन्ध्रोऽन्यतः शितिरन्ध्रः समन्तशितिरन्ध्रस्तेसावि
त्राःशितिबाहुरन्यतः शितिबाहुः समन्तशितिबाहुस्तेबार्हस्प
त्याःपृषतीक्षुद्रपृषतीस्थूलपृषतीतामैत्रावरुण्यः ॥ २ ॥ शुद्धवा
लःसर्वशुद्धवालोमणिवालस्तऽआश्विनाः श्येतःश्येताक्षोरुणस्ते
रुद्रायपशुपतयेकर्णायामाऽ अवलिप्तारौद्रानभोरूपाः पार्ज
न्याः ॥ ३ ॥ पृश्निस्तिरश्चीनपृश्निः ॥ पृश्निस्तिरश्चीनपृश्निरूर्द्ध
पृश्निस्तेमारुताःफल्गूर्लोहितोर्णीपलक्षीताःसारस्वत्यःप्लीहाक

र्ण्णीः शुण्ठाकर्ण्णोद्ध्यालोहकर्ण्णस्तेत्वाष्ट्राःकृष्णग्ग्रीवःशितिक
क्षोञ्जिसक्थस्तऽऐन्द्राग्नाःकृष्णाञ्जिरल्पाञ्जिर्म्महाञ्जिस्तऽउष
स्याः ॥ ४ ॥ शिल्पावैश्वदेव्यः ॥ शिल्पावैश्वदेव्योरोहिण्य
स्त्र्यवयोव्वाचेविज्ञाताऽ अदित्यैसरूपाधात्रेवत्सतर्य्योदेवानाम्प
त्नीब्भ्यः ॥ ५ ॥ कृष्णग्ग्रीवाआग्नेयाः । शितिब्भ्रवोव्वसूनाꣳ
रोहितारुद्राणाꣳश्वेताऽअवरोकिणऽ आदित्यानान्नभोरूपाःपा
र्ज्जन्याः ॥ ६ ॥ उन्नतऽऋषभः ॥ उन्नतऽऋषभोव्वामनस्तऽऐन्द्रा

वैष्ष्णवाऽउंन्नतःशितिबाहुः शितिपृष्ठस्तऽऐन्द्राबार्हस्पत्याःशु
कंरूपाव्वाजिनाःकल्म्माषांऽआग्निमारुताःश्यामाःपौष्ष्णाः ॥
॥ ७ ॥ एतांऽऐन्द्राग्ग्नाः ॥ एतांऽऐन्द्राग्ग्नाद्विरूपाऽअंग्नीषोमी
यांव्वामनाऽअंनड्वाहंऽ आग्ग्नावैष्ष्णवाव्वशामैत्रावरुण्योन्न्यतंऽए
न्योमैत्र्य÷ ॥ ८ ॥ कृष्ष्णग्ग्रीवाऽआग्ग्नेयाः ॥ कृष्ष्णग्ग्रीवाऽआ
ग्ग्नेयाबब्भ्रवं÷सौम्म्याःश्वेताव्वांयव्याऽ अविज्ञाताऽअदित्यैसरू
पाधात्रेव्वत्सतर्य्यौदेवानाम्पत्नीब्भ्यः ॥ ९ ॥ कृष्ष्णाभौमाः ॥

संहि. ॥ ३२ ॥

कृष्णाभौमाधूम्राआन्तरिक्षाबृहन्तोदिव्याः शबलावैद्युताःसि ॥ उ. अ. ॥२४॥
ध्मास्तारकाः ॥ १० ॥ [१०] धूम्रान्वसन्ताय ॥ धूम्रान्वस
न्तायालभतेश्वेतान्ग्रीष्मायकृष्णान्वर्षाभ्योरुणाञ्छरदेपृष
तोहेमन्तायपिशङ्गाञ्छिशिराय ॥ ११ ॥ त्र्यविर्वयोगायत्र्यै । पञ्चा
वयस्त्रिष्टुभेदित्यवाहोजगत्यैत्रिवत्साऽअनुष्टुभेतुर्य्यवाहऽउष्णि
हे ॥१२॥ पष्ठवाहोविराजे ॥ पष्ठवाहोविराजऽउक्षाणोबृहत्याऽऋ ॥ ३२ ॥
षभाःककुभेनड्वाहःपङ्क्त्यैधेनवोतिच्छन्दसे ॥ १३ ॥ कृष्णग्रग्री

वाऽआग्ग्नेयाः ॥ कृष्ष्णग्ग्रीवाऽआग्ग्नेयाबब्भ्रवंः सौम्म्याऽउंपद्ध
स्ताःसांवित्त्रावंत्सतर्य्यःसारस्वत्त्यःश्यामाःपौष्ष्णाःपृश्न्नयोमारु
ताबंहुरूपावैंश्श्वदेवाव्वशाद्यांवापृथिवीयाः ॥ १४ ॥ उक्षाःसंञ्च
राः ॥ उक्षाःसंञ्चराऽएताऽऐन्द्राग्ग्नाःकृष्ष्णावांरुणाःपृश्न्नयोमा
रुताःकायास्तूपराः ॥ १५ ॥ अग्ग्नयेनीकवते । प्प्रथममजानालंभ
तेमरुद्भ्यःसान्तपनेब्भ्यःसवात्त्यान्न्मरुद्भ्योगृहमेधिब्भ्योबाष्किहा
न्न्मरुद्भ्यःक्रीडिब्भ्यःसꣳसृष्टान्न्मरुद्भ्यःस्वतवद्भ्योनुसृष्टान् ॥ १६ ॥

उक्काःसंञ्चराः ॥ उक्काःसंञ्चराऽएतांऐन्द्राग्नाꣳप्प्राशृङ्गामाहेन्द्रा
बहुरूपाव्वैश्वकर्म्मणाः ॥१७॥ धूम्म्राबब्भ्रुनीकाशाꣳ । पितॄणाꣳ
सोमवताम्बब्भ्रवोधूम्म्रनीकाशाꣳपितॄणांबर्हिषदाङ्कृष्ष्णाबब्भ्रुनी
काशाꣳपितॄणामग्निष्ष्वात्तानाङ्कृष्ष्णाꣳपृषन्तस्त्रैयम्बकाः॥ १८॥
उक्काःसंञ्चराः ॥ उक्काःसंञ्चराऽएताꣳ शुनासीरीयाꣳ श्वेताव्वाय
व्याꣳश्वेताꣳसौर्य्याः ॥ १९ ॥ व्वसन्तायकपिञ्जलान् ॥ व्वसन्ताय
कपिञ्जलानालभतेग्ग्रीष्ष्मायकलविङ्कान्वर्षाब्भ्यस्तित्तिरीञ्छर

देवर्तिकाहेमन्तायककराञ्छिशिरायविककरान् ॥ २० ॥ [१०]
समुद्रायशिशुमारान् ॥ समुद्रायशिशुमारानालभतेपर्ज्जन्यायम
ण्डूकानद्भ्योमत्स्यान्मित्रायकुलीपयान्वरुणायनाक्रान् ॥ २१ ॥
सोमायहꣳसान् ॥ सोमायहꣳसानालभतेवायवेबलाकाऽइन्द्रा
ग्निभ्याङ्क्रुञ्चान्मित्रायमद्गून्वरुणायचक्रवाकान् ॥ २२ ॥ अग्नये
कुटरून् ॥ अग्नयेकुटरूनालभतेवनस्पतिभ्यऽउलूकानग्नीषो
माभ्याञ्चाषानश्विभ्याम्मयूरान्मित्रावरुणाभ्याङ्कपोतान् ॥

॥ २३ ॥ सोमायलबान् ॥ सोमायलबानालंभतेत्वष्ट्रेकौलीकान्गो
षादीर्द्देवानाम्पत्नीभ्यःकुलीकादेवजामिभ्योग्नयेगृहपतयेपारु
ष्णान् ॥२४॥ अन्हेपारावतान् ॥ अन्हेपारावतानालंभतेरात्र्यैसी
चापूरहोरात्रयोः सन्धिभ्योजतूम्मासेभ्योदात्यौहान्त्संवत्सरा
यमहतःसुपर्ण्णान् ॥ २५ ॥ भूम्म्यांऽआखून् ॥ भूम्म्यांऽआखूना
लंभतेन्तरिक्षायपाङ्क्तान्दिवेकशान्दिग्भ्योनकुलान्बभ्रुकानवा
न्तरदिशाभ्यः ॥ २६ ॥ वसुभ्यऽऋश्यान् ॥ वसुभ्यऽऋश्या

नालंभतेरुद्रेभ्योरुरूंनादित्येभ्योन्यङ्कून्विश्वेभ्योदेवेभ्यः
पृषतान्त्साध्येभ्यःकुलुङ्गान् ॥२७॥ ईशानायपरस्वतः ॥ ईशाना
यपरस्वतऽआलभतेमित्रायगौरान्वरुणायमहिषान्बृहस्पतयेग
वयाँस्त्वष्ट्रऽउष्ट्रान् ॥ २८ ॥ प्रजापतयेपुरुषान् ॥ प्रजापतयेपु
रुषान्हस्तिनऽआलभतेवाचेप्लुषीँश्चक्षुषेमशकाञ्छ्रोत्रायभृङ्गाः
॥२९॥ शतम् ॥१४००॥ प्रजापतयेच । वायवेचगोमृगोवरुणायार
ण्योमेषोयमायकृष्णोमनुष्यराजायमर्कटः शार्दूलायरोहिद्

॥ ३५ ॥ पृभायंगवयीक्षिप्प्रश्येनायुवर्तिकानीलङ्गोःक्रिमिः समुद्रायंशि
शुमारोंहिमवंतेहुस्ती ॥ ३० ॥ [१०] मयुःप्प्रांजापत्यः ॥ मयुः ॥२४॥
प्प्रांजापत्यऽउलोहुलिक्ष्ण्णोवृषदुंः शस्तेधात्रेदिशाङ्कङ्कोधुङ्क्षांग्ने
यीकंलविङ्कोलोहिताहिःपुंष्करसादस्तेत्वाष्ट्रावाचेक्रुञ्चंः ॥ ३१ ॥
सोमांयकुलुङ्गः ॥ सोमांयकुलुङ्गऽआंरण्ण्योजोनंकुलःशकातेपौ
ष्णाःक्रोष्टामायोरिन्द्रंस्यगौरमृगःपिद्वोन्न्यङ्कुंः कक्कटस्तेनुंमत्यै ॥३५॥
प्प्रतिश्श्रुत्कांयैचक्रवाकः ॥ ३२ ॥ सौरीबुलाकां । शार्गःसृंजयः

श्याण्डकुस्तेमैत्राःसरस्वत्यैशारिः पुरुषवाक्श्वाविद्भौमीशार्दू
लोवृकःपृदाकुस्तेमन्यवेसरस्वतेशुकःपुरुषवाक् ॥ ३३ ॥ सुपर्णः
पार्ज्जन्यः ॥ सुपर्णःपार्ज्जन्यऽआतिर्व्वाहसोदर्व्विदातेव्वायवेबृहस्प
तयेव्वाचस्पतयेपैङ्गराजोलजऽआन्तरिक्षः प्लवोमद्गुर्म्मत्स्यस्तेनं
दीपतयेद्यावापृथिवीयःकूर्म्मः ॥ ३४ ॥ पुरुषमृगश्चन्द्रमसः ॥
पुरुषमृगश्चन्द्रमसोगोधाकालकादार्व्वाघाटस्तेव्वनस्पतीनाङ्कृकवा
कुःसावित्रोहꣳसोवातस्यनाक्रोमकरःकुलीपयस्तेकूपारस्यान्हियै

शल्यंकः ॥ ३५ ॥ एण्ण्यन्हं÷ ॥ एण्ण्यन्होमण्डूकोमूषिंकाति
 त्तिरिस्तेसर्प्पाणांल्लोपाशऽआंश्विनः कृष्ष्णोरात्र्याऽऋक्षोजतूःसु
षिलीकातऽइंतरजनानाञ्जहंशावैष्ष्णवी ॥ ३६ ॥ अन्न्यवापोर्द्ध
मासानांम् ॥ अन्न्यवापोर्द्धमासानाम्मृश्योंमयूरं÷सुपर्ण्णस्तेगंन्ध
र्वाणांमपामुद्रोमासाङ्कश्यपोंरोहित्कंङ्कुण्णाचीगोलत्तिकातेप्प्सर
सांम्मृत्यवेंसितः ॥ ३७ ॥ वर्षाहूर्ऋतूनाम् ॥ वर्षाहूर्ऋतूनामाखुः
कशोमान्थालस्तेपिंतॄणाम्बलांयाजगरोवसूंनाङ्कपिञ्जंलःकपोतऽउ

लूकः शशस्ते निर्ऋत्यै वरुणायारण्यो मेषः ॥ ३८ ॥ श्वित्र आदित्या
नाम् ॥ श्वित्र आदित्यानामुष्ट्रो घृणीवान्वार्ध्रीणसस्ते मत्या अर
ण्याय सृमरो रुरू रौद्रः क्वयिः कुटरुर्दात्यौहस्ते वाजिनाङ्कामाय पि
कः ॥ ३९ ॥ खड्गो वैश्वदेवः । श्वा कृष्णः कर्णो गर्दभस्तरक्षुस्ते रक्ष
सामिन्द्राय सूकरः सिंहो मारुतः कृकलासः पिप्पका शकुनिस्ते शर
व्यायै विश्वेषान्देवानाम्पृषतः ॥ ४० ॥ [४] इतिश्रीवाजसनेय
संहितायांचतुर्विंशोऽध्यायः ॥ २४ ॥ श्रीवेदपुरुषायनमः ॥ अनु

संहि. वाक्सूत्रम् ॥ शादंदद्भिर्नवैकैकाहिरण्यगर्भश्चतस्रआनोदशमा उ. अ.
॥३७॥ नोमित्रोयदश्वस्याष्टकौयत्तेषडिमानुकंद्वेपञ्चदशसप्तचत्वारिꣳश ॥२५॥
त् ॥ हरिःॐशादंन्दद्भिः ॥ शादन्दद्भिरवकान्दन्तमूलैर्मृदम्ब
स्वैस्तेगान्दꣳष्ट्राभ्याꣳ सरस्वत्याऽअग्रजिह्वंजिह्वायाऽउत्सादमं
वक्रन्देनतालुवाजꣳहनुभ्यामपऽआस्येनवृषणमाण्डाभ्यामा
दित्याँश्मश्रुभिःपन्थानम्भ्रूभ्यान्द्यावापृथिवीवर्तोभ्यांविद्युतं ॥३७॥
ङ्कनीनकाभ्याꣳशुक्लायस्वाहाकृष्णायस्वाहापार्याणिपक्ष्माण्य

वा॒र्य्यृ॑ऽइ॒क्षवो॒ वा॒र्य्या॑णि प॒क्ष्मा॑णि पा॒र्य्या॑ऽइ॒क्षवं॑ः ॥ १ ॥ [१]
वा॒तं प्रा॒णेनं ॥ वा॒तं प्रा॒णेना॑पा॒नेन॒ नासि॑केऽउपया॒मम॑धं॒रेणौष्ठे॑न
स॒दुत्त॑रेण प्र॒का॒शेनान्त॑रमनू॒का॒शेन॒ बाह्यं॑ निवे॒ष्यम्मू॒र्द्ध्ना स्त॑नयि॒त्नु
न्नि॑र्बा॒धेना॒शनि॑म्म॒स्तिष्क्के॑ण वि॒द्युतं॑ क॒नीन॑काभ्यां॒ कर्णा॑भ्या॒ᳫं श्रो
त्र॒ᳫं श्रोत्रा॑भ्यां॒ कर्णौ॑ तेदु॒नीम॑धरक॒ण्ठेना॒पः शु॒ष्कक॒ण्ठेन॑ चि॒त्तम्म
न्या॑भि॒रदि॑तिᳫं शी॒र्ष्णा निर्ऋ॑ति॒न्निर्ज्ज॑र्ज्जल्ह्ये॑न शी॒र्ष्णा स॑ङ्क्रो॒शैः प्रा॒
णाॅन्रे॒ष्माणᳫं॑ स्तु॒पेनं ॥ २ ॥ [१] म॒श॒कान्केशैः॑ ॥ म॒श

कान्केशैरिन्द्रꣳस्वपंसावहेनबृहस्पतिꣳशकुनिसादेनकूर्म्माञ्छ
कैराक्रमणꣳस्थूराभ्यामृक्षलाभिःकपिञ्जलाञ्जवञ्जङ्घाभ्यामध्वा
नम्बाहुभ्याञ्जाम्बीलेनारण्यमग्निमतिरुग्भ्याम्पूषणन्दोर्भ्याम
श्विनावꣳसाभ्याꣳरुद्रꣳरोराभ्याम् ॥ ३ ॥ [१] अग्नेःप
क्षतिः ॥ अग्नेःपक्षतिर्वायोर्न्निपक्षतिरिन्द्रस्यतृतीयासोमस्यचतु
र्थ्यदित्यैपञ्चमीन्द्राण्यैषष्ठीमरुताꣳसप्तमीबृहस्पतेरष्टम्म्यर्य
म्णोनवमीधातुर्दशमीन्द्रस्यैकादशीवरुणस्यद्वादशीयमस्यत्रयो

दुशी ॥ ४ ॥ [१] इन्द्राग्ग्न्योः पंक्षुतिः सरंस्वत्यैनिपंक्षतिम्म्मि
त्रस्यंतृतीयापाञ्चंतुर्त्थीनिर्ऋत्यैपञ्चम्म्युग्नीषोमंयोःषुष्ठीसुर्प्पाणाᳬं
सप्तुमीव्विष्णोरष्टुमीपूष्णोनंवमीत्वष्टुर्द्दशमीन्द्रंस्यैकादुशीव्वरुंण
स्यद्वादुशीयुम्म्यैत्रंयोदुशीद्यावांपृथि्व्योर्द्दक्षिणम्पार्श्वंव्विश्वेषान्दे
वानामुत्तंरम् ॥ ५ ॥ [१] मुरुताᳬंस्कुन्धाः ॥ मुरुताᳬंस्कुन्धा
व्विश्वेषान्देवानांम्प्रथमाकीकंसारुद्राणांन्द्वितीयांदित्यानांन्तृती
यांव्वायोः पुच्छंमुग्नीषोमंयोर्भासंदौक्रुञ्चौःश्रोणिंभ्यामिन्द्राबृह

स्प्पतीऽऊरुभ्यांम्मित्रावरुणावल्गाभ्यांमाक्क्रमणᳫंस्त्थूलाभ्या
म्बलङ्कुष्ठाभ्याम् ॥ ६ ॥ [१] पूषणंव्वनिष्ठुनान्धाहीन्त्स्थूल
गुदयासर्प्पान्गुदाभिर्व्विह्रुतऽआन्त्रैरपोव्वस्तिनाव्वृषणमाण्डाभ्यां
व्वाजिनᳫशेपेनप्प्रजाᳫंरेतसाचाषान्पित्तेनप्प्रदरान्पायुनाकूश्म्मा
ञ्छकपिण्डैः ॥ ७ ॥ [१] इन्द्रंक्क्रोडः ॥ इन्द्रस्यक्क्रोडोऽदित्य
पाजस्यन्दिशाञ्जत्रवोदित्यैभसज्जीमूतान्हृदयौपशेनान्तरिक्षम्पु
रीततानभᳫं ऽउदर्य्यैणचक्रवाकौमतस्नाभ्यान्दिवंव्वृक्काभ्यांङ्गि

रीन्प्लाशिभिरुपलान्प्लीह्नाव्वल्म्मीकान्क्लोमभिर्ग्ग्लौभिर्ग्गुल्म्मा
न्हिराभिःस्स्रवन्तीर्ह्रदान्कुक्षिब्भ्याꣳ समुद्रमुदरेणवैश्वानरम्भ
स्म्मना ॥ ८॥ [१] विधृतिन्नाब्भ्याम् । घृतꣳरसेनापोयूष्णामरीची
र्व्विप्प्रुड्भिर्न्नीहारमूष्म्मणाशीनंव्वसयाप्प्रुष्ष्वाऽ अश्श्रुभिर्ह्रादुनीर्दू
षीकाभिरस्न्नारक्षाꣳ सि चित्राण्यङ्गैर्न्नक्षत्राणिरूपेणपृथिवीन्त्व
चाजुम्बकायस्वाहा ॥९॥ [१] हिरण्यगर्भःसम ॥ हिरण्यगर्भः
समवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआसीत् ॥ सदाधारपृथिवीन्द्या

मुतेमाङ्कस्म्मैदेवायंहविषांविधेम ॥ १० ॥ यःप्प्राणतः ॥ यःप्प्रा
णतोनिमिषतोमंहित्वैकऽइद्राजाजगतोबभूवं ॥ यऽईशेऽअस्यद्वि
पदश्चतुष्पदःकस्म्मैदेवायंहविषांविधेम ॥ ११ ॥ यस्येमे । हि
मवन्तोमहित्वायस्यसमुद्रꣳरसयासहाहुः ॥ यस्येमाःप्प्रदिशो
यस्यबाहूकस्म्मैदेवायंहविषांविधेम ॥ १२ ॥ यऽआत्मदा ॥ यऽ
आत्मदाबलदायस्यविश्वऽउपासतेप्प्रशिषंयस्यदेवाः ॥ यस्य
च्छायामृतंय्यस्यमृत्युःकस्म्मैदेवायंहविषांविधेम ॥ १३ ॥ [४]

आनः ॥ आनोभद्राःक्क्रतवोयन्तुविश्वतोदब्धासोऽअपरीतासऽ
उद्भिदः ॥ देवानोयथासदमिद्वृधेऽअसन्नप्प्रायुवोरक्षितारोदिवेदि
वे ॥ १४ ॥ देवानाम्भद्रा । सुमतिर्ऋजूयतान्देवानाᳫंरातिरभि
नोनिवर्त्तताम् ॥ देवानाᳫंसक्ख्यमुपसेदिमाव्वयन्देवानऽआयुः
प्प्रतिरन्तुजीवसे ॥ १५ ॥ तान्पूर्व्वयानिविदाहूमहेव्वयम्भगम्मित्र
मदितिन्दक्षमस्स्रिधम् ॥ अर्य्यमणंव्वरुणᳫंसोममश्श्विनासरस्वती
नःसुभगामयस्करत् ॥ १६ ॥ तन्नः ॥ तन्नोव्वातोमयोभुव्वातुभेष

जन्तन्मा॒तापृ॑थि॒वीतत्पि॒ता॒द्यौः ॥ तद्ग्रावा॑णःसोम॒सुतो॑मयो॒भुव॒
स्तद॑श्विनाशृणुतन्धिष्ण्यायु॒वम् ॥ १७॥ तमीशा॑नम् ॥ तमीशा॑
न॒ञ्जग॑तस्त॒स्थुष॒स्पतिं॑न्धियञ्जि॒न्वमव॑सेहूमहेव्व॒यम् ॥ पू॒षानो॒
यथा॒व्वेद॑सा॒मसद्वृ॒धेर॑क्षि॒तापा॒युरद॑ब्धःस्व॒स्तये॑ ॥ १८ ॥ स्व॒स्तिन॑ः ॥
स्व॒स्तिन॒ऽइन्द्रो॑वृ॒द्धश्र॑वाःस्व॒स्तिन॑ःपू॒षावि॒श्ववे॑दाः ॥ स्व॒स्तिन॒
स्तार्क्ष्यो॒ऽअरि॑ष्टनेमिःस्व॒स्तिनो॒बृह॒स्पति॑र्दधातु ॥१९॥ पृष॑दश्वाम॒
रुत॑ः ॥ पृष॑दश्वाम॒रुत॒ःपृश्नि॑मातरःशु॒भंया॒वानो॑वि॒दथे॑षु॒जग्म॑

यः ॥ अ॒ग्निजि॒ह्वामन॑वः॒सूर॑चक्षसो॒विश्वे॑नोदे॒वाऽअव॒सागं॑मन्नि॒ह
॥२०॥ भ॒द्रङ्कर्णे॑भिः। शृणु॒याम॑देवाभ॒द्रम्प॑श्येमा॒क्षभि॑र्य्यजत्राः ॥
स्थि॒रैरङ्गै॑स्तुष्टु॒वाꣳ संस्त॒नूभि॒र्व्य॑शेमहि॒दे॒वहि॑तं॒य्यदायुः ॥ २१ ॥
श॒तमित् ॥ श॒तमिन्नु॒श॒रदो॒ऽअन्ति॑देवा॒यत्रा॑नश्च॒क्राज॒रसं॑न्त॒नू
नाम् ॥ पु॒त्रासो॒यत्र॑पि॒तरो॒भव॑न्ति॒मानो॑म॒ध्यारी॑रिष॒तायु॒र्ग्गन्तोः
॥ २२ ॥ अदि॑ति॒र्द्यौरदि॑ति॒रन्तरि॑क्ष॒मदि॑ति॒र्म्मा॒तासपि॒तासपु॒त्रः ॥
विश्वे॑दे॒वाऽअदि॑तिः पञ्च॒जना॒ऽअदि॑ति॒र्ज्जा॒तमदि॑ति॒र्ज्जनि॑त्वम् ॥

॥ २३ ॥ [१०] मानः ॥ मानोमित्रोव्वरुणोअर्य्यमायुरिन्द्रऽऋ
भुक्षामरुतः परिक्ख्यन् ॥ यद्वाजिनोदेवजातस्यसप्तेः प्प्रवक्ष्यामो
व्विदथेव्वीर्य्याणि ॥ २४ ॥ यन्निर्णिजा ॥ यन्निर्णिजारेक्णसाप्प्रावृ
तस्यरातिङ्गृभीताम्मुखतोनयन्ति ॥ सुप्प्राङ्जोमेम्म्यद्विश्वरूपऽ
इन्द्रापूष्णोः प्प्रियमप्प्येतिपाथः ॥ २५ ॥ एषछागः । पुरोऽअ
श्वेनव्वाजिनापूष्णोभागोनीयतेव्विश्वदेव्यः ॥ अभिप्प्रियंय्यत्पु
रोडाशमर्व्वतात्वष्टेदेनᳫंसौश्रवसायजिन्वति ॥ २६ ॥ यद्धविष्य्

म् ॥ यद्धविष्ष्यमृतुशोदेवयानन्त्रिर्म्मानुषाः पर्य्यश्श्वन्नयन्ति ॥
अत्रापूष्ष्णः प्प्रथमोभागऽएतियज्ञन्देवेब्भ्यः प्प्रतिवेदयन्नजः ॥
॥ २७ ॥ होताध्ध्वर्य्युः ॥ होताध्ध्वर्य्युरावयाऽअग्निमिन्धोग्ग्रावग्ग्रा
भऽउतशꣳस्तासुविप्प्रः ॥ तेनयज्ञेनस्वरङ्कृतेनस्विष्टेनवक्षणाऽआ
पृणध्ध्वम् ॥ २८ ॥ यूपव्व्रस्काऽउत । येयूपवाहाश्श्चषालँय्येऽअश्श्व
यूपायतक्षति ॥ येचार्व्वतेपचनꣳसम्भरन्त्युतोतेषामभिगूर्त्तिर्न्नऽइ
न्न्वतु ॥ २९ ॥ उपप्प्र ॥ उपप्प्रागात्सुमन्न्मेधायिमन्न्मदेवानामा

शाऽउपवीतपृष्ठं ॥ अन्वेनंविप्राऽऋषयोमदन्तिदेवानाम्पुष्टेचं
कृमासुबन्धुम् ॥ ३० ॥ यद्वाजिनंः ॥ यद्वाजिनोदामसन्दानमर्व्वं
तोयाशीर्षण्यारशनारज्जुरस्य ॥ यद्वाघास्यप्रभृतमास्येतृणंसर्व्वा
ताते अपिदेवेष्ष्वस्तु ॥३१॥ [८] यदश्वस्यक्रविषोम । क्षिकाशय
द्वास्वरौस्वधितौरिप्तमस्ति ॥ यद्धस्तयोःशमितुर्यन्नखेषुसर्व्वाता
तेऽअपिदेवेष्ष्वस्तु ॥ ३२ ॥ यदूवध्यम् ॥ यदूवध्यमुदरस्यापवाति
यऽआमस्यक्रविषोगन्धोऽअस्ति ॥ सुकृतातच्छमितारःकृण्वन्तु

तमेधꣳशृतपाकम्पचन्तु ॥ ३३ ॥ यत्ते ॥ यत्तेगात्रादग्निनापच्य
मानादभिशूलन्निहतस्यावधावति ॥ मातद्भूम्यामाश्रिषन्मातृ
णेषुदेवेभ्यस्तदुशद्भ्योरातमस्तु ॥ ३४ ॥ येवाजिनम् ॥ येवाजिनं
म्परिपश्यन्तिपक्वंयऽईमाहुःसुरभिर्निर्हरेति ॥ येचार्वतोमाꣳ
सभिक्षामुपासतऽउतोतेषामभिगूर्तिर्नऽइन्वतु ॥ ३५ ॥ यन्नीक्ष
णम् ॥ यन्नीक्षणम्माꣳस्पचन्न्याऽउखायायापात्राणियूष्णऽआसे
चनानि ॥ ऊष्मण्यापिधानाचरूणामङ्काःसूनाःपरिभूषन्त्यश्वं

म् ॥ ३६ ॥ मात्वां ॥ मात्वाग्निर्द्ध्वनयीद्धूमगंन्धिर्म्माखाभ्राजंन्त्य
भिविंत्त्क्कजग्घ्रिः ॥ इुष्टंवीतमुभिगूंर्त्तंवषंट्कृतुन्तन्देुवासःप्प्रतिगृ
ब्भ्णुन्त्यश्श्वंम् ॥ ३७ ॥ निुक्क्रमंणन्निुषदंनम् ॥ निुक्क्रमंणन्निुषदंनं
व्विवर्त्तंनुंयच्चुपड्वींशुमर्व्वतः ॥ यच्चंपुपौयच्चंघाुसिञ्जुघासुसर्व्वातातेऽ
अपिंदेुवेष्ष्वंस्तु ॥ ३८ ॥ यदश्श्वांय ॥ यदश्श्वांयुवासंऽउपस्तृुणन्त्यं
धीवासंय्याहिरंण्यान्यस्म्मै ॥ सुन्दानुमर्व्वंन्तुम्पड्वींशम्प्प्रियादेुवे
ष्ष्वायांमयन्ति ॥३९॥ [८] यत्ते । सादेमहंसाुशूक्कंतस्युपाष्ष्ण्यीं

वाकशंयावातुतोदं ॥ स्रुचेवताहविषोऽअध्वरेषुसर्व्वांतातेब्रह्मणा
सूदयामि ॥ ४० ॥ चतुस्त्रिꣳशद्वाजिनः ॥ चतुस्त्रिꣳशद्वाजिनोदे
वबन्धोर्व्वङ्क्रीरश्वस्यस्वधितिःसमेति ॥ अच्छिद्रागात्राव्वयुनाकृणो
तपरुष्परुरनुघुष्याव्विशस्त ॥ ४१ ॥ एकस्त्वष्टुः ॥ एकस्त्वष्टुर
श्वस्याव्विशस्ताद्वायन्ताराभवतस्तथऽऋतुः ॥ यातेगात्राणामृतु
थाकृणोमितातापिण्डानाम्प्रजुहोम्म्यग्नौ ॥ ४२ ॥ मात्वातपत्प्रि
यऽआत्मापियन्तम्मास्वधितिस्तन्व्वऽआतिष्ठिपत्ते ॥ मातेगृध्नु

रंविशस्तातिहार्यंच्छिद्द्रागात्राण्यसिनामिथूकः ॥ ४३ ॥ नवै ॥ न
वाऽउंऽएतन्म्रियसेनरिष्यसिदेवाँ२ इदेषिपथिभिः सुगेभिः ॥
हरीतेयुञ्जापृषंतीऽअभूतामुपास्त्थाद्वाजीधुरिरासंभस्य ॥ ४४ ॥
सुगव्व्यंन्नः ॥ सुगव्व्यंन्नोव्वाजीस्वश्व्यंम्पुहंसः पुत्राँ२ उतव्विश्वापुषंꣳ
रयिम् ॥ अनागास्त्वन्नोऽअदितिःकृणोतुक्षत्रन्नोऽअश्वोव्वनताꣳ
हविष्म्मान् ॥ ४५ ॥ [६] इमानु । कम्भुवनासीषधामेन्द्रश्श्चव्वि
श्वेचदेवाः ॥ आदित्यैरिन्द्रःसगंणोमरुद्भिरस्म्मभ्यंम्भेषजाकं

रत् ॥ यज्ञन्नंनस्तन्वञ्चप्रजाञ्चांदित्यैरिन्द्रं÷सहसींषधाति ॥४६॥
अग्नेत्वन्नोऽअन्तं । मऽउतत्राताशिवोभंवावरूथ्य÷ ॥ वसुंरग्नि
र्व्वसुंश्रवाऽअच्छांनाक्षिद्युमत्तंम६रयिन्दाः ॥ तन्त्वांशोचिष्ठदी
दिवःसुम्नायंनूनमींमहेसखिभ्यः ॥ ४७ ॥[२] इतिश्रीवाजसने
यसंहितायांपंचविंशोऽध्यायः ॥ २५ ॥ ॥ श्रीवेदपुरुषायनमः ॥
[१५] अनुवाक्सूत्रम् ॥ अग्निश्चपंचदशोच्चातएकादशद्यौषड्वि६
शतिः ॥ हरिःॐ अग्निश्चं । पृथिवीचसन्नंतेतेमेसन्नंमतामुदोवा

संहि. युश्चान्तरिक्षञ्चसन्नंतेतेमेसन्नंमतामदऽ आदित्यश्चद्यौश्चसन्नंतेते उ. अ.
॥४६॥ मेसन्नंमतामदऽआपश्चवरुणश्चसन्नंतेतेमेसन्नंमतामदः ॥ सप्तस ॥२६॥
ध्सदोऽअष्टमीभूतसाधनी ॥ सकामाँ२अध्वनस्कुरुसंज्ञानमस्तुमे
मुना ॥१॥ यथेमाम् ॥ यथेमांवाचंकल्याणीमावदानिजनेभ्यः ॥
ब्रह्मराजन्याभ्याँशूद्रायचार्यायचस्वायचारणायच ॥ प्रि
योदेवानान्दक्षिणायैदातुरिहभूयासमयम्मेकामः समृध्यतामुप ॥४६॥
मादोनमतु ॥ २ ॥ बृहस्पतेऽअति ॥ बृहस्पतेऽअतियदर्य्योऽअ

हाँद्युमद्भिर्भातिक्रतुंमज्जनेषु ॥ यद्दीदयच्छवंसऽऋतप्प्रजाततद्
स्म्मासुद्द्रविणन्धेहिचित्रम् ॥ उपयामगृंहीतोसिबृहस्प्पतंयेत्वैष
तेयोनिर्बृहस्प्पतंयेत्वा ॥ ३ ॥ इन्द्रगोमंन् ॥ इन्द्रगोमंन्निहायांहि
पिबासोमंᳪशतक्रतो ॥ विद्यद्भिर्ग्ग्रावंभिꣳसुतम् ॥ उपयामगृंही
तोसीन्द्रांयत्त्वागोमंतऽएषतेयोनिरिन्द्रांयत्त्वागोमंते ॥४॥ इन्द्रा
यांहि ॥ इन्द्रायांहिवृत्रहन्पिबासोमंᳪशतक्रतो ॥ गोमंद्भिर्ग्ग्रावं
भिꣳसुतम् ॥ उपयामगृंहीतोसीन्द्रांयत्वागोमंतऽएषतेयोनिरिन्द्रां

यत्वागोमंते ॥ ५ ॥ ऋतावांनंवैश्वानरम् ॥ ऋतावांनंवैश्वानरमृत
स्यज्ज्योतिषस्प्पतिम् ॥ अजंस्रङ्घर्म्ममीमहे ॥ उपयामगृंहीतोसि
वैश्वानरायंत्वैषतेयोनिर्वैश्वानरायंत्वा ॥ ६ ॥ वैश्वानरस्यंसुमतौ ।
स्यांमराजाहिकम्भुवंनानामभिश्रीः ॥ इतोजातोविश्वंमिदंविचं
ष्टेवैश्वानरोयंततेसूर्य्येण ॥ उपयामगृंहीतोसिवैश्वानरायंत्वैषते
योनिर्वैश्वानरायंत्वा ॥ ७ ॥ वैश्वानरोनंः ॥ वैश्वानरोनंऽऊतयुऽ
आप्रयांतुपरावतंः ॥ अग्निरुक्थेनवाहंसा ॥ उपयामगृंहीतोसि

वैश्वानरायंत्वैषपतेयोनिर्वैश्वानरायंत्वा ॥ ८ ॥ अग्निर्ऋषिः ॥ अ
ग्निर्ऋषिपवमानःपाञ्चजन्न्यःपुरोहितः ॥ तमीमहेमहागयम् ॥
उपयामगृहीतोस्यग्नयेत्वावर्चसऽएषतेयोनिरग्नयेत्वावर्च्चसे ॥
॥ ९ ॥ महाँ२ऽइन्द्रः ॥ महाँ२ऽइन्द्रोवज्रहस्तःषोडशीशर्म्मयच्छ
तु ॥ हन्तुपाप्मानंय्योस्मान्द्वेष्टि ॥ उपयामगृहीतोसिमहेन्द्रा
यंत्वैषतेयोनिर्म्महेन्द्रायंत्वा ॥ १० ॥ तंवः ॥ तंवोदस्ममृतीष
हंवसोर्म्मन्दानमन्धसः ॥ अभिवत्सन्नस्वसरेषुधेनवऽइन्द्रंगीर्भिः

न्नैवामहे ॥ ११ ॥ यद्वाहिंष्ठम् ॥ यद्वाहिंष्ठन्तदग्नयेबृहदर्चविभाव
सो ॥ महिषीवत्वद्रयिस्त्वद्वाजाऽउदीरते ॥ १२ ॥ एहि ॥ एह्यु
षुब्रवाणितेग्नऽइत्थेतराँगिरः ॥ एभिर्वर्द्धासऽइन्दुभिः ॥ १३ ॥
ऋतवस्ते ॥ ऋतवस्तेयज्ञंवितन्वन्तुमासारक्षन्तुतेहविः ॥ संवत्स
रस्तेयज्ञन्दधातुनःप्रजाञ्चपरिपातुनः ॥ १४॥ उपह्वरेगिरीणाम् ॥
उपह्वरेगिरीणाꣳसङ्गमेचनदीनाम्॥धियाविप्रोऽअजायत ॥१५॥
[१५] उच्चाते ॥ उच्चातेजातमन्धसोदिविसद्भूम्म्यादंदे ॥ उग्रꣳ

शर्म्म॑महि॒श्श्रव॑÷ ॥ १६ ॥ सनं॑÷ ॥ सन॒ऽइन्द्रा॑य॒यज्ज्य॑वे॒व्वरु॑णाय

म॒रुद्भ्यं÷ ॥ व्व॒रि॒वो॒वित्परि॑स्स्रव ॥ १७ ॥ ए॒नाव्विश्श्वा॑नि ॥ ए॒नाव्वि

श्श्वा॑न्न्य॒र्य्यऽआद्युम्म्नानि॒मानु॑षाणाम् ॥ सिषा॑सन्तोव्वनामहे ॥ १८ ॥

अनु॑वी॒रैः ॥ अनु॑वीरै॒रनु॑पुष्ष्यास्म्म॒गोभि॒रन्व॒श्श्वै॒रनु॒सर्वे॑णपु॒ष्टैः ॥

अनु॒द्द्विप॒दानु॒चतु॑ष्प्पदाव्व॒यन्दे॒वानो॑य॒ज्ञमृ॑तु॒थान॑यन्तु ॥ १९ ॥ अ

ग्ग्ने॒पत्क्नीः ॥ अग्ग्ने॒पत्क्नी॑रि॒हाव॑हदे॒वाना॑मुश॒तीरुप॑ ॥ त्वष्टा॑र॒ᳲसो

मं॑पीतये ॥ २० ॥ अ॒भिय॒ज्ञम् ॥ अ॒भिय॒ज्ञङ्गृ॑णीहिनो॒ग्ग्नावो॒नेष्टः

पिबंऽऋतुना ॥ त्वꣳहिरत्नधाऽअसि ॥ २१ ॥ द्रविणोदाःपिपीष
ति । जुहोतप्रचतिष्ठत ॥ नेष्ट्रादृतुभिरिष्यत ॥२२॥ तवायम् ॥
तवायꣳसोमस्त्वमेह्यर्वाङ्शश्वत्तमꣳसुमनाऽअस्यपाहि ॥ अस्मिन्
न्यज्ञेबर्हिष्ष्यानिषद्यादधिष्ष्वेमञ्जठरऽइन्दुमिन्द्र ॥ २३ ॥ अमे
वंनः ॥ अमेवंनःसुहवाऽआहिगन्तनानिबर्हिषिसदतनारणिष्ठन ॥
अथामन्दस्वजुजुषाणोऽअन्धसस्त्वष्टर्देवेभिर्जनिभिःसुमद्गणः ॥
॥ २४ ॥ स्वादिष्ठयामदिष्ठया ॥ स्वादिष्ठयामदिष्ठयापवस्वसोमधा

रंया ॥ इन्द्रायपातवेसुतः ॥ २५ ॥ रक्षोहाविश्वचर्षणिरभियोनि
मयोहते ॥ द्रोणेसधस्थमासदत् ॥२६॥ [११] ॥ २ ॥ इतिश्रीवा
वाजसेनयसंहितायांषड्विंशतितमोऽध्यायः ॥२६॥ श्रीवेदपुरुषाय
नमः ॥ अनुवाकसूत्रम् ॥ समास्त्वादशोर्द्ध्वाअस्यपीवोअन्नाद्वादश
कावभित्वैकादशचत्वारःपंचचत्वारिꣳशत् ॥ हरिःॐसमास्त्वा ॥
समास्त्वाग्नऽऋतवोवर्द्धयन्तुसंवत्सराऽऋषयोयानिसत्या ॥ स
न्दिव्येनदीदिहिरोचनेनविश्वाऽआभाहिप्प्रदिशश्चतस्रः ॥ १ ॥

सञ्चेध्यस्वाग्ने॒ प्रच॑बोधयैन॒मुच्च॑ तिष्ठ मह॒ते सौभ॑गाय ॥ माच॑रिषदुप
स॒त्ता ते॑ऽअग्ने ब्र॒ह्माण॑स्ते य॒शस॑ꣳ सन्तु॒ मान्ये ॥ २ ॥ त्वाम॑ग्ने ॥
त्वाम॑ग्ने वृणते ब्राह्म॒णाऽइ॒मे शि॒वोऽअ॑ग्ने स॒ंवर॑णे भवा नः ॥ स॒प॒त्न॒
हा नो॑ऽअभिमाति॒जिच्च॒ स्वे गये॑ जागृ॒ह्यप्र॑युच्छन् ॥ ३ ॥ इ॒हैव ॥
इ॒हैवाग्ने॒ऽअधि॑ धारया र॒यिम्मा त्वा॒ नि क्र॑न्पूर्व्व॒चितो॑ निका॒रिण॑ः ॥
क्ष॒त्रम॑ग्ने सु॒यम॑मस्तु॒ तुभ्य॑मुपस॒त्ता व॑र्द्धतान्ते॒ऽअनि॑ष्टृतः ॥ ४ ॥ क्ष॒त्रे
णाग्ने ॥ क्ष॒त्रेणा॑ग्ने स्वायुः सꣳर॑भस्व मि॒त्रेणा॑ग्ने मित्र॒धेये॑ यतस्व ॥ स

जातानांम्मद्ध्यमस्त्थाऽएंधिराज्ञांमग्ग्नेव्विहव्व्योदीदिहीह ॥ ५ ॥
अतिनिहं÷ ॥ अतिनिहोअतिस्स्रिधोत्त्यचिंत्तिमत्त्यरांतिमग्ग्ने ॥ व्वि
श्श्वाह्यग्ग्नेदुरितासहस्स्वाथास्म्मब्भ्यंꣳसहवीरांꣳरयिन्दाः ॥ ६ ॥
अनाधृष्ष्योजातवेदाः ॥ अनाधृष्ष्योजातवेदाऽअनिष्ट्टृतोव्विराडं
ग्नेक्षत्त्रभृद्दीदिहीह ॥ व्विश्श्वाऽऽआशाःप्प्रमुञ्चन्न्मानुषीर्ब्भियश्शिवे
भिरद्ध्यपरिंपाहिनोव्वृधे ॥ ७ ॥ बृहंस्प्पतेसवितः ॥ बृहंस्प्पतेसवित
बोंधयैनंसꣳशितञ्चित्सन्तराꣳसꣳशिशाधि ॥ व्वर्द्धयैनम्महते

संहि. ॥ ५१ ॥

सौभंगायुव्विश्वंऽएनमनुंमदन्तुदेवाः ॥ ८ ॥ अमुत्रभूयादधं ॥ अ उ. अ.
मुत्रभूयादधयद्यमस्यबृहंस्पतेऽअभिशंस्तेरमुंञ्चः ॥ प्रत्यौहता ॥२७॥
मश्विनांमृत्युमंस्म्माद्देवानांमग्नेभिषजाशचींभिः ॥९॥ उद्वयम् ॥
उद्वयन्तमंसुस्परिस्वुःपश्यंन्तऽउत्तंरम् ॥ देवन्देवत्रासूर्य्यमगं
न्मज्ज्योतिरुत्तमम् ॥१०॥ [१०] ऊर्द्धाऽअंस्यसमिधोंभवन्त्यूर्द्धा
शुक्राशोचींछंष्यग्नेः ॥ द्युमत्तंमासुप्रतीकस्यसूनोः ॥ ११ ॥ तनू ॥ ५१ ॥
नपादसुरः ॥ तनूनपादसुरोव्विश्ववेदादेवोदेवेषुदेवः ॥ पथोऽअंन

क्कुमद्ध्वांघृतेन ॥ १२ ॥ मद्ध्वायुज्ञम् ॥ मद्ध्वांयुज्ञन्नक्षसेप्प्रीणानो
नराशꣳसोऽअग्ने ॥ सूकृद्देवश्सविताविश्ववारः ॥१३॥ अच्छायम् ।
अच्छायमेति ॥ शवसाघृतेनैडानोवह्निर्न्नमसा ॥ अग्निꣳस्रुचोऽ
अद्धरेषुप्प्रयत्सु ॥ १४ ॥ सयक्षत् ॥ सयक्षदस्यमहिमानमग्नेश्सऽ
ईम्मन्द्रासुप्प्रयसः ॥ वसुश्चेतिष्ठोवसुधातमश्च ॥ १५ ॥ द्वारो
देवीः ॥ द्वारोदेवीरन्न्वस्यविश्वेव्व्रतादन्तेऽअग्नेः ॥ उरुव्यचसोधा
म्म्नापत्यमानाः ॥ १६ ॥ तेऽअस्य ॥ तेऽअस्ययोषणेदिव्येनयोनाऽ

उषासानक्ता ॥ इमंयुज्ञमंवतामध्वरन्नं÷ ॥ १७ ॥ दैव्याहोतारा ।
ऊर्ध्वमध्वरन्नोग्ग्नेर्ज्जिह्वामभिगृंणीतम् ॥ कृणुतन्नुः स्विष्टिम् ॥ १८ ॥
तिस्रोदेवीः ॥ तिस्रोदेवीर्बुर्हिरेदꣳसंदुन्त्विडासरस्वतीभारती ॥
महीगृंणाना ॥ १९ ॥ तन्नं÷ ॥ तन्नंस्तुरीपमद्भुतम्पुरुक्षुत्वष्टासुवी
र्य्यम् ॥ रायस्पोषंविष्यंतुनाभिमुस्म्मे ॥ २० ॥ वनंस्पतेवंसृ
जाररांणस्त्मनादुेवेषु ॥ अग्निर्हृव्यꣳशंमितासूंदयाति ॥ २१ ॥ अ
ग्नेस्वाहा । कृणुहिजातवेदुऽइन्द्रायहुव्यम् ॥ विश्वेदुेवाहुविरिदञ्जुं

पन्ताम् ॥ २२ ॥ [१२] पीवोऽअन्नारयिवृधः । सुमेधाःश्वेतःसि
षक्तिनियुताम्भिश्रीः ॥ तेवायवेसमनसावितस्थुर्विश्वेन्नरःस्व
पत्यानिचक्रुः ॥ २३ ॥ रायेनु । यञ्जज्ञतूरोदसीमेरायेदेवीधिषणा
धातिदेवम् ॥ अधवायुन्नियुतःसश्चतस्वाऽउतश्वेतंवसुधितिन्निरे
के ॥ २४ ॥ आपोह ॥ आपोहयद्बृहतीर्विश्वमायन्गर्भन्दधाना
जनयन्तीरग्निम् ॥ ततोदेवानाँसमवर्त्ततासुरेकःकस्मैदेवायह
विषाविधेम ॥ २५ ॥ यश्चित् ॥ यश्चिदापोमहिनापर्य्यपश्यद्द

संहि. ॥ ५३ ॥

क्षन्दधानाजनयंतीरुग्यंज्ञम् ॥ योदेवेष्ष्वधिदेवऽएकऽआसीत्क
स्म्मैदेवायहविषाविधेम ॥ २६ ॥ प्रयाभिः ॥ प्रयाभिर्य्यासिदा
श्वाᳬसमच्छानियुद्भिर्व्वायविष्टयेदुरोणे ॥ निनोरयिᳬसुभोजसं
य्युवस्वनिवीरङ्गव्यमश्व्व्यंञ्चराधः ॥ २७ ॥ आनः ॥ आनोनि
युद्भिःशतिनीभिरध्वरᳬसहस्रिणीभिरुपयाहियज्ञम् ॥ वायोऽअ
स्म्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिःसदानः ॥ २८ ॥ नियु
त्वान्वायो ॥ नियुत्वान्वायवागह्ययᳬशुक्कोऽअयामिते ॥ गन्ता

उ. अ. ॥ २७ ॥ ॥ ५३ ॥

सिसुन्ववतोगृहम् ॥ २९ ॥ व्वायोशुक्रः ॥ व्वायोशुक्रोऽअयामितेम
द्ध्वोऽअग्ग्रन्दिविष्टिषु ॥ आयांहिसोमंपीतयेस्प्पार्होदेवनियुत्वंता
॥ ३० ॥ व्वायुरंग्ग्रेगाः ॥ व्वायुरंग्ग्रेगायंज्ञप्प्रीःसाकङ्गन्मनंसायज्ञ
म् ॥ शिवोनियुद्भिःशिवाभिः ॥३१॥ व्वायोये । तेसहस्त्रिणोरथां
सस्तेभिरागंहि ॥ नियुत्वान्त्सोमंपीतये ॥ ३२ ॥ एकंयाच । दश
भिश्वस्वभूतेद्द्वाभ्यामिष्टयेव्विꣳशतीचं ॥ तिसृभिश्चवहंसेत्त्रिꣳ
शतांचनियुद्भिर्वायविहताव्विमुंञ्च ॥ ३३ ॥ तवंव्वायो ॥ तवंव्वायवृत

स्प्पते॒त्वद्भुं॑र्ज्जा॑मातरद्भुत ॥ अवा॒ऽऽस्यावृं॑णीमहे ॥ ३४ ॥ [१२] अ॒
भित्वां॑ । शू॒रनो॑नु॒मोदु॒ग्धाऽइवधे॒नवं॑ः ॥ ईशा॑नम॒स्यजग॑तः॒स्व॒र्द्दृ॒
श॒मीशा॑नमिन्द्रत॒स्तस्थु॒षं॑ः ॥३५॥ नत्वावा॑न् ॥ नत्वावाँ॑२ऽअ॒न्यो
दि॒व्यो॒नपार्त्थि॑वो॒नजा॒तोनजं॑निष्यते ॥ अ॒श्वा॒यन्तो॑मघवन्निंद्रवा॒
जिनो॑ग॒व्यन्तं॑स्त्वाहवामहे ॥ ३६ ॥ त्वामित् ॥ त्वामिद्धि॒हवां॑महे
सा॒तौवाजं॑स्यका॒रवं॑ः ॥ त्वांवृ॒त्रेष्वि॑न्द्र॒सत्प॑ति॒न्नर॒स्त्वाङ्का॒ष्ठा॒स्वर्वं॑
त॑ः ॥ ३७ ॥ सत्वम् ॥ सत्वन्नं॑श्चित्रवज्रहस्तधृष्णु॒याम॒हस्तं॑वा॒

नोऽअंद्रिवः ॥ गामश्वंᳬरत्थ्यमिन्द्रसङ्किरसत्रावाजन्नजिग्ग्युषे ॥
॥ ३८ ॥ कयांनः ॥ कयांनश्चित्रऽआभुंवदूतीसदावृंधःसखां ॥
कयाशचिंष्ठयावृता ॥ ३९ ॥ कस्त्वां । सत्योमदांनाम्मंहिंष्ठोम
त्सदन्धंसः ॥ दृढाचिंदारुजेव्वसुं ॥४०॥ अभीषुणं÷ ॥ अभीषुणः
सखीनामविताजंरितॄणाम् ॥ शतम्भंवास्यूतयें ॥ ४१ ॥ यज्ञायं
ज्ञावः ॥ यज्ञायंज्ञावोऽअग्नयेंगिरागिराचदक्षंसे ॥ प्रप्पंवयममृतं
ज्ञातवेंदसम्प्रियम्मित्रन्नशंᳬसिषम् ॥ ४२॥ पाहिनं÷ ॥ पाहिनोऽ

संहि. अग्नऽएकंयापाह्युतद्वितीयंया ॥ पाहिगीर्भिस्तिसृभिरूर्ज्जाम्प उ. अ.
॥५५॥ तेपाहिचंतसृभिर्व्वसो ॥ ४३ ॥ ऊर्ज्जोनपातम् ॥ ऊर्ज्जोनपातḇसहि ॥२७॥
नायमंस्म्मयुर्द्दाशेमहुव्यदातये ॥ भुवद्वाजेष्ष्ववितामुवद्वृधऽउत
त्रातातनूनाम् ॥४४॥संव्वत्सरोसि । परिवत्सरोसीदावत्सरोसीद्वत्स
रोसिव्वत्सरोसि ॥ उषसंस्तेकल्प्पन्तामहोरात्रास्तेकल्प्पन्तामर्द्धमा
सास्तेकल्प्पन्ताम्मासास्तेकल्प्पन्तामृतवस्तेकल्प्पन्ताꣳ संव्वत्सर ॥५५॥
स्तेकल्प्पन्ताम् ॥ प्रेत्याऽएत्यैसञ्चप्प्रचसारय ॥ सुपर्ण्णचिदंसित

यांदेवतंयाङ्गिरस्वद्ध्रुवःसीद ॥४५॥ [११] इतिश्रीवाजसनेयसंहि
तायांसप्तविꣳशोऽध्यायः ॥२७॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्
सूत्रम् ॥ होतायक्षदेकादशदेवंबर्हिर्द्वादशपुनरप्येवंचत्वारःषट्च
त्वारिꣳशत् ॥ हरिःॐहोतायक्षत् ॥ होतायक्षत्समिधेन्द्रमिडस्प
देनाभापृथिव्याऽअधि ॥ दिवोव्वर्ष्म्मन्त्समिध्यतऽओजिष्ठश्चर्ष
णीसहाव्वेत्वाज्ज्यस्यहोतर्य्यज ॥ १ ॥ होतायक्षत्तनूनपातमूति
भिर्ज्जेतारमपराजितम् ॥ इन्द्रन्देवꣳस्वर्व्विदम्पथिभिर्म्मधुमत्तमै

न्नराशꣳसेन॒तेज॑सा॒वेत्वाज्ज्य॑स्य॒होत॒र्य्यज॑ ॥ २ ॥ होता॑यक्ष॒दिडा॑
भि॒रिन्द्र॑म् ॥ होता॑यक्ष॒दिडा॑भि॒रिन्द्र॑मीडि॒तमा॒जुह्वा॑न॒मम॑र्त्यम् ॥
दे॒वोदे॒वैः॑सवी॑र्य्यो॒वज्र॑हस्तःपुरन्द॒रोवेत्वाज्ज्य॑स्य॒होत॒र्य्यज॑ ॥ ३ ॥
होता॑यक्षद्ब॒र्हिषीन्द्र॑म् ॥ होता॑यक्षद्ब॒र्हिषीन्द्र॑न्नि॒षद्व॒रंवृ॑ष॒भन्नर्य्या॑प
सम् ॥ वसु॑भीरु॒द्रैरा॑दि॒त्यैः॑स॒युग्भि॑र्ब॒र्हिरास॑द॒द्वेत्वाज्ज्य॑स्य॒होत॒र्य्य
ज॑ ॥ ४ ॥ होता॑यक्ष॒दोजो॒नवी॒र्य्यꣳ॒सहो॒द्वार॒ऽइन्द्र॑मवर्द्धयन् ॥ सु॒
प्रा॒य॒णाऽअ॒स्मिन्य॒ज्ञेविश्र॑यन्तामृता॒वृधो॒द्वार॒ऽ इन्द्रा॑यमी॒ढुषे॑

र्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ५ ॥ होतायक्षद्दुघेऽइन्द्रस्य । धेनूसुदु
घैमातरामही ॥ सवातरौनतेजसावत्सामिन्द्रमवर्द्धतांवीतामाज्ज्यं
स्यहोतर्य्यज ॥ ६ ॥ होतायक्षद्दैव्याहोतारा । भिषजासखायाहृ
विषेन्द्रम्भिषज्ज्यतः ॥ कवीदेवौप्प्रचेतसाविन्द्रायधत्तऽइन्द्रियं
वीतामाज्ज्यस्यहोतर्य्यज ॥ ७ ॥ होतायक्षत्तिस्रोदेवीः ॥ होता
यक्षत्तिस्रोदेवीर्न्नभेषजन्त्रयस्त्रिधातवोपसऽ इडासरस्वतीभारती
महीः ॥ इन्द्रपत्नीर्हविष्मतीर्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ८ ॥

होतायक्षत्त्वष्टारमिन्द्रम् ॥ होतायक्षत्त्वष्टारमिन्द्रन्देवम्भिषजꣳ
सुयजङ्घृतश्रियम् ॥ पुरुरूपꣳसुरेतसम्मघोनमिन्द्रायत्वष्टादध
दिन्द्रियाणिवेत्वाज्ज्यस्यहोतर्य्यज ॥ ९ ॥ होतायक्षद्वनस्प्पतिꣳ
शमितारम् ॥ होतायक्षद्वनस्प्पतिꣳशमितारꣳशतक्क्रतुन्धियोजो
ष्टारमिन्द्रियम् ॥ मध्वासमञ्जन्पथिभिःसुगेभिःस्वदातियज्ञम्म
धुनाघृतेनवेत्वाज्ज्यस्यहोतर्य्यज ॥ १० ॥ होतायक्षदिन्द्रꣳस्वा
हा ॥ होतायक्षदिन्द्रꣳस्वाहाज्ज्यस्यस्वाहामेदसःस्वाहास्तोका

नाꣳस्वाहास्वाहाकृतीनाꣳस्वाहाहुव्यसूक्तीनाम् ॥ स्वाहादेवाऽ
आज्यपाजुषाणाऽइन्द्रऽआज्यस्यव्यन्तुहोतर्य्यज ॥ ११ ॥ [११]
देवम्बर्हिरिन्द्रꣳसुदेवन्देवैर्व्वीरवत्स्तीर्णंव्वेद्यामवर्द्धयत् ॥ वस्तोर्व्वृ
तम्प्राक्तोर्भृतꣳरायाबर्हिष्मतोत्यगाद्वसुवनेव्वसुधेयस्यवेतुयज ॥
॥ १२ ॥ देवीर्द्वारः ॥ देवीर्द्वारऽइन्द्रꣳसङ्घातेव्वीड्वीर्य्यामन्नवर्द्ध
यन् ॥ आवत्सेनतरुणेनकुमारेणचमीवतापार्वाणꣳरेणुकंकाटन्नुद
न्तांवसुवनेव्वसुधेयस्यव्यन्तुयज ॥ १३ ॥ देवीऽउषासानक्ता ॥ दे

वीऽउषासानक्तेन्द्रंय्यज्ञेप्प्रयत्यह्वेताम् ॥ देवीर्व्विशः प्प्रायासिष्टᳫं

सुप्प्रीतेसुधितेव्वसुवनेव्वसुधेयंस्यव्वीतांय्यज ॥ १४ ॥ देवीजोष्ट्री ॥

देवीजोष्ट्रीव्वसुधितीदेवमिन्द्रंमवर्द्धताम् ॥ अयाव्व्यन्न्याघाद्वेषाᳫं

स्यान्न्यावक्षद्वसुवार्य्याणियजमानायशिक्षितेवसुवनेव्वसुधेयंस्यव्वी

तांय्यज ॥ १५ ॥ देवीऽऊर्ज्जाहुती ॥ देवीऽऊर्ज्जाहुतीदुघेसुदुघेप

यसेन्द्रंमवर्द्धताम् ॥ इषमूर्ज्जमन्न्यावक्षत्सग्ग्धिᳫंसपीतिमन्न्यानवे

नपूर्व्वन्दयमानेपुराणेननवमधाताम्मूर्ज्जमूर्ज्जाहुतीऽऊर्ज्जयमानेव्वसु

वाय्य्यौणियजंमानायशिक्षितेवंसुवनेवसुधेयंस्यवीताय्यजं ॥१६॥
देवादैव्या ॥ देवादैव्याहोतारादेवमिन्द्रंमवर्द्धताम् ॥ हताघंशꣳ
सावाभांष्टौवसुवाय्यौणियजंमानायशिक्षितौवंसुवनेवसुधेयंस्य
वीतांय्यजं ॥ १७ ॥ देवीस्तिस्रः ॥ देवीस्तिस्रास्तिस्रोदेवीःपति
मिन्द्रंमवर्द्धयन् ॥ अस्पृंक्षद्भारंतीदिवꣳरुद्रैय्यंज्ञꣳसरंस्वतीडाव
सुंमतीगृहान्वंसुवनेवसुधेयंस्यव्यन्तुयजं ॥ १८ ॥ देवऽइन्द्रं÷ ॥
देवऽइन्द्रोनराशꣳसंस्त्रिवरूथस्त्रिबन्धुरोदेवमिन्द्रंमवर्द्धयत् ॥ त्रि

तेनंशितिपृष्ठानामाहितं सहस्रेणप्रवर्त्ततेमित्रावरुणेदंस्यहोत्रम
हैतोबृहस्पतिस्तोत्रमश्विनाद्ध्वर्य्यवंव्वसुवनेव्वसुधेयस्यवेतुयज ॥
॥ १९ ॥ देवोदेवैः ॥ देवोदेवैर्व्वनस्पतिर्हिरण्यपर्णोमधुशाखः सु
पिप्पलोदेवमिन्द्रमवर्द्धयत् ॥ दिवमग्रेणास्पृक्षदान्तरिक्षम्पृथि
वीमदृंहीद्वसुवनेव्वसुधेयस्यवेतुयज ॥ २० ॥ देवम्बर्हिः ॥ देवम्ब
र्हिर्व्वारितीनान्देवमिन्द्रमवर्द्धयत् ॥ स्वासस्थमिन्द्रेणासन्नमन्न्या
बर्हीछंष्यभ्यभूद्वसुवनेव्वसुधेयस्यवेतुयज ॥ २१ ॥ देवोऽअग्निः ॥

देवोऽअग्निश्स्विष्टकृद्देवमिन्द्रमवर्द्धयत् ॥ स्विष्टङ्कुर्वन्त्स्विष्टकृत्स्वि
ष्टमद्यकरोतुनोव्वसुवनेव्वसुधेयस्यव्वेतुयज ॥ २२ ॥ अग्निमद्यहोता
रमवृणीतायंय्यजमानः पचन्पक्तीः पचन्पुरोडाशम्बध्नन्निन्द्राय
च्छागम् ॥ सूपस्थाऽअद्यदेवोव्वनस्पतिरभवदिन्द्रायच्छागेन ॥
अघत्तम्मेदस्तः प्रतिपचताग्रभीदवीवृधत्पुरोडाशेन ॥ त्वामद्यऽ
ऋषे ॥ २३ ॥ [१२ ॥ होतायक्षत् ॥ होतायक्षत्समिधानम्महद्य
शः सुसमिद्धंव्वरेण्यमग्निमिन्द्रंव्वयोधसम् ॥ गायत्रीञ्छन्दऽइन्द्रिय

संहि. ॥६०॥

न्त्र्यविङ्गांव्वयोदधद्धेत्वाज्ज्यंस्युहोतर्ष्यजं ॥ २४ ॥ होतायक्षत्तनू

नपातमुद्भिदम् ॥ होतायक्षत्तनूनपातमुद्भिदुंय्यञ्गर्भमदितिर्दधे

शुचिमिन्द्रंव्वयोधसम् ॥ उष्णिहञ्छन्दऽइन्द्रियन्दित्यवाहङ्गा

व्वयोदधद्धेत्वाज्ज्यंस्युहोतर्ष्यजं ॥ २५ ॥ होतायक्षदीडेन्यमीडित

म् ॥ होतायक्षदीडेन्यमीडितंवृत्रहन्तमिडाभिरीड्यꣳ सहꣳसोम

मिन्द्रंव्वयोधसम् ॥ अनुष्टुभञ्छन्दऽइन्द्रियम्पञ्चाविङ्गांव्वयोदध

द्धेत्वाज्ज्यंस्युहोतर्ष्यजं ॥ २६ ॥ होतायक्षत्सुबर्हिषम्पूषण्वन्तम् ॥

उ. अ. ॥२८॥

॥६०॥

होतायक्षत्सुबर्हिषम्पूषण्वन्तममर्त्त्यंᳬसीदन्तम्बर्हिषिप्प्रियेमृतेन्द्रं
व्वयोधसम् ॥ बृहतीञ्छन्दऽइन्द्रियन्त्रिवत्सङ्गांव्वयोदधद्वेत्वाज्ज्य
स्यहोतर्य्यज ॥ २७ ॥ होतायक्षद्व्यचस्वतीᳬसुप्प्रायणाऽ ॥ होता
यक्षद्व्यचस्वतीᳬसुप्प्रायणाऽऋतावृधोद्वारोदेवीर्हिरण्ययीर्ब्ब्रह्माण
णमिन्द्रंव्वयोधसम् ॥ पङ्क्तिञ्छन्दऽइहेन्द्रियन्तुर्य्यवाहङ्गांव्वयोद
धद्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ २८ ॥ होतायक्षत्सुपेशसासुशिल्पे
बृहतीऽउभेनक्क्तोषासानदर्शतेविश्श्वमिन्द्रंव्वयोधसम् ॥ त्रिष्टुभम्

ञ्छन्दऽइहेन्द्रियम्पंष्ठवाहङ्गाव्वयोदधंद्धीतामाज्ज्यंस्यहोतर्र्यज ॥
॥ २९ ॥ होतायक्षत्प्रचेतसादेवानामुत्तमंय्यशोहोतारादैव्याकवी
सयुजेन्द्रंव्वयोधसम् ॥ जगतिञ्छन्दऽइन्द्रियमनड्वाहङ्गांव्वयोदधं
द्धीतामाज्ज्यंस्यहोतर्र्यज ॥ ३० ॥ होतायक्षत्पेशस्वतीस्तिस्रः ॥
होतायक्षत्पेशस्वतीस्तिस्रोदेवीर्हिरण्ययीब्भारतीर्बृहतीर्म्महीःप
तिमिन्द्रंव्वयोधसम् ॥ विराजञ्छन्दऽइहेन्द्रियन्धेनुङ्गान्नव्वयोद
धद्व्यन्त्वाज्ज्यंस्यहोतर्र्यज ॥ ३१ ॥ होतायक्षत्सुरेतसन्त्वष्टारम् ॥

होतांयक्षत्सुरेतंसन्त्वष्टांरम्पुष्टिवर्द्धंनꣳ रूपाणिबिभ्रंतम्पृथक्पुष्टि
मिन्द्रंवयोधसम् ॥ द्विपंदुञ्छन्दंऽइन्द्रियमुक्षाणङ्गान्नवयोदधद्वे
त्वाज्यंस्यहोतर्य्यंज ॥३२॥ होतांयक्षद्वनस्प्पतिंꣳशमितारंम् ॥
होतांयक्षद्वनस्प्पतिꣳ शमितारꣳशतक्रंतुꣳहिरंण्ण्यपर्ण्णमुक्थि
नꣳरशनाम्बिभ्रंतंवशिम्भगमिन्द्रंवयोधसंम् ॥ ककुभञ्छन्दंऽ
इहेन्द्रियंवशांवेहतङ्गांवयोदधद्वेत्वाज्यंस्यहोतर्य्यंज ॥ ३३ ॥ हो
तांयक्षत्स्वाहांकृतीरग्निम् ॥ होतांयक्षत्स्वाहांकृतीरग्निङ्गृहपंतिम्पृ

थृग्ग्वर्रुणम्भेषुजङ्कुविङ्क्षत्रमिन्द्रँव्वयोधसम् ॥ अतिच्छन्दसुञ्छ
न्दऽइन्द्रियम्बृहद्दृषभङ्गाव्वयोदधुद्ध्यन्त्वाज्ज्यंस्यहोतर्य्यज ॥३४॥
[११] देवम्बर्हिः ॥ देवम्बर्हिर्व्वयोधसन्देवामिन्द्रमवर्द्धयन् ॥ गा
यत्र्याच्छन्दसेन्द्रियञ्चक्षुरिन्द्रेव्वयोदधंद्धसुवनेव्वसुधेयस्यव्वेतुयज
॥ ३५ ॥ देवीर्द्वारः ॥ देवीर्द्वारोव्वयोधसङ्शुचिमिन्द्रमवर्द्धयन् ॥
उष्णिहाच्छन्दसेन्द्रियम्प्राणमिन्द्रेव्वयोदधंद्धसुवनेव्वसुधेयस्यव्व्य
न्तुयज ॥ ३६ ॥ देवीऽउषासानक्ता । देवामिन्द्रँव्वयोधसन्देवीदे

वर्मंवर्द्धताम् ॥ अनुष्टुभाच्छन्दसेन्द्रियम्बलमिन्द्रेवयोदधंद्वसुव
नेवसुधेयंस्यवीताय्यज ॥ ३७ ॥ देवीजोष्ट्री ॥ देवीजोष्ट्रीवसुधि
तीदेवमिन्द्रंवयोधसन्देवीदेवमंवर्द्धताम् ॥ बृहत्याच्छन्दसेन्द्रि
यꣳश्रोत्रमिन्द्रेवयोदधंद्वसुवनेवसुधेयंस्यवीताय्यज ॥३८॥ देवीऽ
ऊर्ज्जाहुती ॥ देवीऽऊर्ज्जाहुतीदुघेसुदुघेपयसेन्द्रम्वयोधसन्देवीदे
वमंवर्द्धताम् ॥ पङ्क्याच्छन्दसेन्द्रियꣳशुक्रमिन्द्रेवयोदधंद्वसुवने
वसुधेयंस्यवीताय्यज ॥ ३९ ॥ देवादैव्या ॥ देवादैव्याहोतारादेव

संहि. मिन्द्रं॑व्वयो॒धसं॑न्दे॒वोदे॒वमं॑वर्द्धताम् ॥ त्रिष्टु॒भाच्छन्दं॑सेन्द्रि॒यंत्विषि॒ उ. अ.
॥ ६३ ॥ मिन्द्रे॒व्वयो॒दधं॑द्वसु॒वनेँव्वसु॒धेयं॑स्यवीता॒य्यज॑ ॥४०॥ दे॒वीस्ति॒स्रः ॥ ॥२८॥
दे॒वीस्ति॒स्रस्ति॒स्रोदे॒वीर्व्वयो॒धस॒म्पति॒मिन्द्रं॑मवर्द्धयन् ॥ जग॑त्या॒च्छ
न्दं॑सेन्द्रि॒यꣳशू॒षमिन्द्रे॒व्वयो॒दधं॑द्वसु॒वनेँव्वसु॒धेयं॑स्यव्यन्तु॒यज॑ ॥४१॥
दे॒वोनरा॒शꣳसः ॥ दे॒वोनरा॒शꣳसोदे॒वमिन्द्रं॑व्वयो॒धसं॑न्दे॒वोदे॒वमं॑व
र्द्धयत् ॥ व्विरा॒जाच्छन्दं॑सेन्द्रि॒यꣳरू॒पमिन्द्रे॒व्वयो॒दधं॑द्वसु॒वनेँव्वसु॒धेयं॑ ॥ ६३ ॥
स्यवे॒तु॒यज॑ ॥ ४२ ॥ दे॒वोव्वन॒स्पतिः ॥ दे॒वोवन॒स्पति॒र्हि॑वमिन्द्रं॑व्व

योधसंन्देवोदेवमंवर्द्धयत् ॥ द्विपदाच्छन्दंसेन्द्रियम्भगमिन्द्रेवयो
दधंद्वसुवनेंवसुधेयंस्यवेतुयज ॥४३॥ देवम्बर्हिः ॥ देवम्बर्हिर्वारीतीं
नान्देवमिन्द्रंवयोधसंन्देवोदेवमंवर्द्धयत् ॥ ककुभाच्छन्दंसेन्द्रि
यंयशऽइन्द्रेवयोदधंद्वसुवनेंवसुधेयंस्यवेतुयज ॥ ४४ ॥ देवोऽअ
ग्निः । स्विष्टकृद्देवमिन्द्रंवयोधसंन्देवोदेवमंवर्द्धयत् ॥ अतिच्छन्द
साच्छन्दंसेन्द्रियङ्क्षत्रमिन्द्रेवयोदधंद्वसुवनेंवसुधेयंस्यवेतुयज ॥
॥ ४५ ॥ अग्निमद्यहोतारमवृणीतायंय्यजमानःपचन्पक्तीःपचं

न्पुरोडाशम्बध्नन्निन्द्रायव्वयोधसेच्छागम् ॥ सूपस्थाऽअद्यदेवोव
नस्पतिरभवदिन्द्रायव्वयोधसेच्छागेन ॥ अघत्तम्मेदुस्तःप्प्रतिप
चताग्ग्रभीदवीवृधत्पुरोडाशेन ॥ त्वामद्यऽऋषे ॥४६॥ [१२] ॥४॥
इतिश्रीवाजसनेयसंहितायांऽअष्टाविंशोऽध्यायः ॥ २८ ॥ श्रीवेद
पुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ समिद्धोअंजन्नेकादशयदक्रंदस्त्र
योदशसमिद्धोअद्यद्वादशकेतुंकृण्वंश्चतुर्विंᳯशतिश्चत्वारःषष्टिः ॥
हरिः ॐ समिद्धोऽअञ्जन् ॥ समिद्धोऽअञ्जन्कृदरम्मतीनाङ्घृतमग्ने

मधुमत्पिन्न्वमानः ॥ व्वाजीव्वहन्न्वाजिनञ्जातवेदोदेवानांव्वक्षिप्प्रि
यमासधस्त्थम् ॥ १ ॥ घृतेनाञ्जन् ॥ घृतेनाञ्जन्त्सम्पथोदेवयानां
न्प्रजानन्न्वाज्ज्यप्प्येतुदेवान् ॥ अनुत्वासप्प्तेप्प्रदिशःसचन्ताँ
स्वधामस्म्मैयजमानायधेहि ॥ २ ॥ ईड्यश्च ॥ ईड्यश्चासिवन्द्द्य
श्चवाजिन्नाशुश्चासिमेद्ध्यश्चसप्प्ते ॥ अग्निष्ट्वादेवैर्व्वसुभिःसजो
षाःप्प्रीतंव्वह्निंव्वहतुजातवेदाः ॥ ३ ॥ स्तीर्ण्णम्बर्हिःसुष्टरीमाजु
षाणोरुपृथुप्प्रथमानम्पृथिव्व्याम् ॥ देवेभिर्य्युक्तमदितिःसजोषाः

स्योनङ्कृण्वानासुविंतेदंधातु ॥ ४ ॥ एताऽउंवं । सुभगांविश्वरूं
पाविपक्षोभिःश्रयमाणाऽउदातैः ॥ ऋष्वाःसतीःकुवषःशुम्भंमा
नाद्वारोदेवीःसुप्रायणाभंवंतु ॥ ५ ॥ अन्तरामित्रावरुणा ॥ अन्त
रामित्रावरुणाचरन्तीमुखंयज्ञानांमभिसंविदाने ॥ उषासांवाॐ
सुहिरण्येसुशिल्पेऽऋतस्ययोनांविहसांदयामि ॥ ६ ॥ प्रथमावां
म् ॥ प्रथमावांॐसराथिनांसुवर्णांदेवौपश्यन्तौभुवनानिविश्वां ॥
अपिप्रयज्ञोदंनावाम्मिमानाहोतांराज्योतिःप्रदिशांदिशन्तां

॥ ७ ॥ आदित्यैर्न्नः ॥ आदित्यैर्न्नोभारंतीवष्टुयज्ञꣳसरंस्वतीस
हरुद्रैर्न्नंऽआवीत् ॥ इडोपंहूतावसुंभिःसजोषांयज्ञन्नोंदेवीरमृतेषु
धत्त ॥ ८ ॥ त्वष्टांवीरम् ॥ त्वष्टांवीरन्देवकांमञ्जजानत्वष्टुरर्वांजा
यतऽआशुरश्वः ॥ त्वष्टेदंविश्वम्भुवंनञ्जजानबहोःकर्तारमिहयंक्षि
होतः ॥ ९ ॥ अश्वोघृतेनत्मन्यासमंक्तऽउपंदेवाँ२ऽऋंतुशःपाथं
ऽएतु ॥ वनस्पतिर्देवलोकम्प्रंजानन्नग्निनांहव्यास्वंदितानिंवक्षत्
॥ १० ॥ प्रजापंतेस्तपंसा । वावृधानःसद्योजातोदंधिषेयज्ञमंग्ने ॥

सहि. ॥६६॥

स्वाहांकृतेनहविषांपुरोगायाहिसाद्ध्याहविरंदन्तुदेवाः ॥ ११ ॥
[११] यदक्रंन्दः । प्प्रथमञ्जायमानऽउद्यन्त्संमुद्रादुतवापुरीषा
त् ॥ श्येनस्यंपक्षाहंरिणस्यंबाहूऽउंपस्तुत्यम्महिंजातन्तेंऽअर्व्वन्
॥ १२ ॥ यमेनंदुत्तम् ॥ यमेनंदुत्तान्त्रितऽएनमायुनगिन्द्रंऽएणम्प्र
थमोऽअद्ध्यंतिष्ठत् ॥ गन्धर्व्वोंऽअंस्यरशनामंगृभ्णात्सूराद्श्श्वंव्वसवो
निरंतष्ट ॥ १३ ॥ असियमः ॥ असिंयमोऽअस्यांदित्योऽअंर्व्वन्नसि
त्रितोगुह्येनव्व्रतेनं ॥ असिसोमेंनसमयाव्विपृंक्कआहुस्तेत्रीणिंदि

उ. अ. ॥२९॥ ॥६६॥

विबन्धनानि ॥ १४ ॥ त्रीणिंते ॥ त्रीणितऽआहुर्द्दिविबन्धंनानि
त्रीण्युप्प्सुत्रीण्यंतश्श्समुद्द्रे ॥ उतेवंमेव्वरुंणश्च्छन्त्स्यर्व्वन्न्यत्रांतऽआ
हुःपंरमञ्जनित्रंम् ॥१५॥ इमातेंव्वाजिन्नवमार्ज्जनानीमाशफानांर्ठ
सनितुर्न्निधानां ॥ अत्रांतेभुद्द्रारंशनाऽअंपश्यमृतस्ययाऽअंभिर
क्षन्तिगोपाः ॥ १६ ॥ आत्मानंन्ते ॥ आत्मानंन्तेमनंसारादंजा
नामवोदिवापतयंन्तम्पतङ्गम् ॥ शिरोंऽअपश्यन्पथिभिंःसुगेभिं
ररेणुभिर्ज्जेहंमानम्पतत्रि ॥ १७ ॥ अत्रांते । रूपमुंत्तममंपश्याजि

गीषमाणमिषऽआपदेगोः ॥ यदातेमर्त्तोऽअनुभोगमानडादिद्ग्र
सिष्ठऽओषधीरजीगः॥ १८॥ अनुत्वा ॥ अनुत्वारथोऽअनुमर्य्योऽ
अर्व्वन्ननुगावोनुभगः कनीनाम् ॥ अनुव्व्रातासस्तवसक्ख्यमीयुरनु
देवाममिरेव्वीर्य्यन्ते ॥ १९ ॥ हिरण्ण्यशृङ्गोयः ॥ हिरण्ण्यशृङ्गो
योऽअस्यपादामनोजवाऽअवरऽइन्द्रआसीत् ॥ देवाऽइदस्यहवि
रद्यमायन्न्योऽअर्व्वन्तम्प्रथमोऽअद्ध्यातिष्ठत् ॥ २० ॥ ईर्म्मान्तासः
सिलिकमद्ध्यमासः ॥ ईर्म्मान्तासःसिलिकमद्ध्यमासःसंशूरणा

सोदि॒व्यासो॒ऽअत्या॑ः ॥ ह॒ꣳसाऽइ॑वश्श्रेणि॒शोय॑तन्ते॒यदाक्षि॑षुर्दि॒
व्यमज्म॒मश्वा॑ः ॥ २१ ॥ तव॒शरी॑रम् ॥ तव॒शरी॑रम्पतयि॒ष्ण्वर्व्व॒
न्तव॑चि॒त्तंव्वात॑ऽइव॒ध्रजी॑मान् ॥ तव॒शृङ्गा॑णि॒विष्ठि॑तापुरु॒त्रार॑ण्येषु॒
जर्भु॑राणाचरन्ति ॥ २२ ॥ उप॒प्प्र ॥ उप॒प्प्रागा॒च्छस॑नंव्वा॒ज्यर्व्वा॑दे॒
व॒द्रीचा॒मन॑सा॒दीध्या॑नः ॥ अ॒जःपु॒रोनी॑यते॒नाभि॑र॒स्यानु॑प॒श्चात्क॒
वयो॑यन्तिरे॒भाः ॥ २३ ॥ उप॒प्प्र ॥ उप॒प्प्रागा॑त्पर॒मंय्यत्स॒धस्त्थ॒म
र्व्वाँ॒२ऽअच्छा॑पि॒तरं॑म्मा॒तरं॑ञ्च ॥ अ॒द्यादे॒वाञ्जुष्ट॑तमो॒हि॒गम्म्याऽऽअ

थाशास्तेदाशुषेवार्य्याणि ॥ २४ ॥ [१३ ॥ समिद्धोऽअद्य । मनुषो
दुरोणेदेवोदेवान्यजसिजातवेदः ॥ आचवहमित्रमहाश्चिकित्वा
न्त्वन्दूतःकविरसिप्रचेताः ॥ २५ ॥ तनूनपात्पथः ॥ तनूनपात्प
थऽऋतस्ययानान्मध्वासमञ्जन्त्स्वदयासुजिह्व ॥ मन्मानिधीभि
रुतयज्ञमृन्धन्देवत्राचकृणुह्यध्वरन्नः ॥ २६ ॥ नराशꣳसस्यमहि
मानम् ॥ नराशꣳसस्यमहिमानमेषामुपस्तोषामयजतस्ययज्ञैः ॥
येसुक्रतवःशुचयोधियन्धाःस्वदन्तिदेवाऽउभयानिहव्या ॥ २७॥

आजुह्वानऽईड्यः॥ आजुह्वानऽईड्योवन्द्यश्चायाह्यग्नेवसुभिः

सजोषाः॥ त्वन्देवानामसियह्वहोतासऽएतान्यक्षीषितोयजीया

न्॥ २८॥ प्राचीनम्बर्हिः। प्रदिशापृथिव्यावस्तोरस्यावृज्यतेऽ

अग्रेऽअह्नाम्॥ व्युप्रथतेवितरंवरीयोदेवेभ्योऽअदितयेस्योन

म्॥ २९॥ व्यचस्वतीरुर्विया। विश्रयन्ताम्पतिभ्योनजनयः

शुम्भमानाः॥ देवीर्द्वारोबृहतीर्विश्वमिन्वादेवेभ्योभवतसुप्रा

यणाः॥ ३०॥ आसुष्वयन्ती। यजतेऽउपाकेऽउषासानक्तासद

संहि. ॥ ६९ ॥

तान्नियोनौ ॥ दिव्ययेषोषंणेबृहतीसुरुक्मेऽअधिश्श्रयं॑शुक्रपिश उ. अ.
न्दधांने ॥ ३१ ॥ दैव्याहोतांरा । प्प्रथमासुवाचामिमांनायज्ञम्म ॥२९॥
नुंषोयजंध्यै ॥ प्रचोदयंन्ताविदथेंषुकारूप्प्राचीनञ्ज्योतिं÷प्प्रदि
शांदिशन्तां ॥ ३२ ॥ आनं÷ ॥ आनोंयज्ञम्भारंतीतूयंमेत्विडांम
नुष्ष्वदिहचेतयंन्ती ॥ तिस्रोदेवीर्बर्हिरेद॑स्योन॑सरंस्वतीस्वपं
सः॑सदन्तु ॥ ३३ ॥ यऽइमे । द्यावांपृथिवीजनिंत्रीरूपैरपिं॑शद्भु ॥ ६९ ॥
वंनानिविश्श्वां ॥ तमद्यहोंतरिषितोयजींयान्देवन्त्वष्टांरमिहयंक्षि

व्विद्वान् ॥ ३४ ॥ उपावंसृजत्मन्न्या । समुञ्जन्देवानाम्पाथंऽऋतु
थाहुवीᳬंषि ॥ व्वनस्प्पतिं÷शमिताद्देवोऽअग्निश्स्वदन्तुहृव्व्यम्मधु
नाघृतेनं ॥ ३५ ॥ सुद्योजातश् ॥ सुद्योजातोव्व्यमिमीतयुज्ञमुग्नि
र्द्देवानांमभवत्पुरोगाश् ॥ अस्यहोतुं÷प्प्रुदिश्यृतस्यंव्वाचिस्वाहांकृतᳬं
हुविरंदन्तुद्देवाश् ॥ ३६ ॥ ॥ [१२] केतुङ्कृण्वन् ॥ केतुङ्कृन्नंकेतवे
पेशोंमर्य्याऽअपेशसें ॥ समुषद्भिरजायथाः ॥ ३७ ॥ जीमूतंस्येव
भवति ॥ जीमूतंस्येवभवतिप्प्रतीकंव्यद्वम्मीयातिसमदांमुपस्त्थे ॥

अनाविद्धयातन्वाजयत्वꣳसत्वाव्वर्म्मणोमहिमापिपर्त्तु ॥ ३८ ॥
धन्वनागाः ॥ धन्वनागाधन्वनाजिञ्जयेमधन्वनातीव्राःसमदो
जयेम ॥ धनुःशत्रोरपकामङ्कृणोतिधन्वनासर्व्वाःप्प्रदिशोजयेम
॥ ३९ ॥ व्वक्ष्यन्तीवेत् ॥ व्वक्ष्यन्तीवेदागनीगन्तिकर्णम्प्रियꣳसखा
यम्परिषस्वजाना ॥ योषेवशिङ्क्तेव्वितताधिधन्वञ्ज्याइयꣳसमने
पारयन्ती ॥ ४० ॥ तेऽआचरन्ती ॥ तेऽआचरन्तीसमनेवयोषामा
तेवपुत्रम्बिभृतामुपस्थे ॥ अपशत्रून्विध्यताꣳसंविदानेऽआर्त्नीऽ

इमेव्विंष्प्पुरन्तीँऽअमित्त्रान् ॥ ४१ ॥ बह्वीनाम्पिता । बहुरंस्यपुत्र
श्चिश्चाकृणोतिसमंनावगत्य ॥ इषुधिःसङ्काःपृतनाश्चसर्व्वाःपृ
ष्ठेनिनंद्धोजयतिप्प्रसूंतः ॥ ४२ ॥ रथेतिष्ठंन् ॥ रथेतिष्ठन्नयतिव्वा
जिनंःपुरोयत्रंयत्रकामयंतेसुषारथिः ॥ अभीशूंनाम्महिमानंम्प
नायतमनंःपश्चादनुंयच्छन्तिरश्मयंः ॥ ४३ ॥ तीव्रान्घोषांन् ॥
तीव्रान्घोषान्कृण्वतेव्वृषंपाणयोश्वारथेंभिःसहव्वाजयंन्तः ॥ अव
क्रामंन्तःप्प्रपदैंरमित्त्रान्क्षिणन्तिशत्रूँ १ रनंपव्ययन्तः ॥ ४४ ॥

संहि.
॥७१॥

रथवाहंण॑ꣳ हुविः ॥ रथवाहंण॑ꣳ हुविरंस्यनामयत्रांयुधन्निहिंतम
स्यवर्म्मं ॥ तत्रारथमुपंशग्म॑ꣳ सदेमविश्वाहांवयꣳ सुमनस्यमांनाः
॥ ४५ ॥ स्वादुषꣳसदः पितरः ॥ स्वादुषꣳसदः पितरोंवयोधाः कृ
च्छ्रेश्रितः शक्तीवन्तोगभीराः ॥ चित्रसेनाऽइषुबलाऽअमृध्राः स
तोवीराऽउरवोंब्रातसाहाः ॥ ४६ ॥ ब्राह्मंणासः पितरः ॥ ब्राह्मं
णासः पितरः सोम्यांसः शिवेनोद्यावांपृथिवीऽअंनेहसां ॥ पूषानः
पातुदुरितादृंतावृधोरक्षामाकिंर्न्नोंऽअघशꣳसऽईशत ॥ ४७ ॥ सुप

उ. अ.
॥२९॥
॥७१॥

णर्णंव्वस्ते । मृगोऽअंस्यादन्तोगोभिर्ह्संनंद्धापततिप्प्रसूता ॥ यत्रान
रह्संञ्चविचद्द्रवन्तितत्रास्म्मब्भ्यमिषंव्वह्शर्म्मंयह्ंसन् ॥ ४८ ॥
ऋजींतेपरिं । वृङ्धिनोऽश्म्माभवतुनस्तनूः ॥ सोमोऽअधिंब्ब्रवीतुनो
दितिह्शर्म्मंयच्छतु ॥ ४९ ॥ आजंङ्घन्ति ॥ आजंङ्घन्तिसान्न्वेषा
ञ्जघनाँ२उपंजिग्घ्नते ॥ अश्श्वांजनिप्प्रचैतसोश्श्वान्त्समत्सुंचोदय
॥ ५० ॥ अहिंरिवभोगैः । पय्यैंतिबाहुञ्ज्यांहेतिम्पंरिबाधंमानह् ॥
हस्तग्घ्नोविश्श्वांव्वयुनांनिविद्द्वान्पुमान्पुमांसं सम्पंरिंपातुव्विश्श्वतंः

संहि. ॥ ५१ ॥ वनस्पते वीड्वङ्गः ॥ वनस्पते वीड्वङ्गो हि भूया अस्मत्स उ. अ.
॥७२॥ खा प्रतरणः सुवीरः ॥ गोभिः सन्नद्धो असि वीडयस्वास्थाता ते ज ॥२९॥
यतु जेत्वानि ॥ ५२ ॥ दिवः पृथिव्याः ॥ दिवः पृथिव्याः पर्योज
उद्भृतं वनस्पतिभ्यः पर्याभृतꣳ सहः ॥ अपामोज्मानं परि गो
भिरावृतमिन्द्रस्य वज्रꣳ हविषा रथं यज ॥५३॥ इन्द्रस्य वज्रः ॥
इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ॥ से ॥७२॥
मां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥५४॥ उप श्वा

सय । पृथिवीमुतद्याम्पुरुत्रातेमनुताविष्ठितञ्जगत् ॥ सदुन्दुभेस
जूरिन्द्रेणदेवैर्दूराद्दवीयोऽअपसेधशत्रून् ॥ ५५ ॥ आक्रन्दय ॥ आ
क्रन्दयबलमोजोनऽआधानिष्टनिहिदुरिताबाधमानः ॥ अपप्प्रो
थदुन्दुभेदुच्छुनाऽइतऽइन्द्रस्यमुष्टिरसिवीडयस्व ॥ ५६ ॥ आमूः॥
आमूरजप्प्रत्त्यावर्त्तयेमाःकेतुमद्दुन्दुभिर्वावदीति ॥ समश्वपर्ण्णा
श्चरन्तिनोनरोस्म्माकमिन्द्ररथिनोजयन्तु ॥ ५७ ॥ आग्नेयःकृ
ष्णग्ग्रीवः । सारस्वतीमेषीबभ्रुःसौम्म्यःपौष्णःश्यामःशिति

पृष्ठोबार्हस्पत्यःशिल्पोवैश्वदेवऽऐन्द्रोरुणोमारुतःकल्म्माषंऽऐ
न्द्राग्नःसंꣳहितोधोरामꣳसावित्रोवारुण ः कृष्णऽएकशितिपात्पे
त्वं÷ ॥ ५८ ॥ अग्नयेनीकवते ॥ अग्नयेनीकवतेरोहिताञ्जिरनड्वा
नधोरामौसावित्रौपौष्णौरजतनाभीवैश्वदेवौपिशङ्गौतूपरौमारु
तःकल्म्माषंऽआग्नेयःकृष्णोजꣳ सारस्वतीमेषीवारुणꣳपेत्वं÷ ॥
॥ ५९ ॥ अग्नयेगायत्राय । त्रिवृतेराथन्तरायाष्टाकपालऽइन्द्राय
त्रैष्टुभायपञ्चदशायबार्हतायैकादशकपालोविश्वेभ्योदेवेभ्यो

जागतेभ्यः सप्तदशेभ्योवैरूपेभ्योद्वादशकपालोमित्रावरु
णाभ्यामानुष्टुभाभ्यामेकविंशाभ्यांवैराजाभ्याम्पयस्यावृ
हस्पतयेपाङ्क्तायत्रिणवायशाक्करायंचरुः सवित्रऽऔष्णिहायत्र
यस्त्रिंशायरैवतायद्वादशकपालः प्राजापत्यश्चरुरदित्यैविष्णु
पत्न्यैचरुरग्नयेवैश्वानरायद्वादशकपालोनुमत्याऽ अष्टाकपालः
॥ ६० ॥ [२४] ॥ ४ ॥ इतिश्रीवाजसनेयसंहितायाएकोनत्रिंशोऽ
ध्यायः ॥ २९ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ देवसवि

तःषट्तपसेकौलालꣳषोडशद्धौद्वाविꣳशतिः॥ हरिःॐदेवंसवितꣳ ॥
देवंसवितꣳप्प्रसुंवयज्ज्ञप्प्रसुंवयज्ज्ञपंतिम्भगांय ॥ दिव्योगंन्धर्व्वꣳकें
तपूꣳकेतंन्नꣳपुनातुव्वाचस्प्पातिर्व्वांचंन्नꣳस्वदतु ॥ १ ॥ तत्संवितुꣳ ॥
तत्संवितुर्व्वरेंण्यम्भर्ग्गोंदेवस्यंधीमहि ॥ धियोयोनंꣳप्प्रचोदयांत् ॥
॥ २ ॥ व्विश्वांनिदेव । सवितर्दुरितानिपरांसुव ॥ यद्भद्रन्तन्नऽआ
सुंव ॥ ३ ॥ व्विभक्कारꣳहवामहे ॥ व्विभक्कारꣳहवामहेवसोंश्चि
त्रस्यराधंसꣳ ॥ सवितारंन्नृचक्षंसम् ॥ ४ ॥ ब्रह्मंणेब्राह्मणम् ॥

ब्रह्मणेब्राह्मणङ्क्षत्रायराजन्यम्मरुद्भ्योवैश्यन्तपसेशूद्रन्तमसेत
स्करन्नारकायवीरहणम्पाप्मनेक्लीबमाक्रयायाऽ अयोगूङ्कामायपुँ
श्चलूमतिक्रुष्टायमागधम् ॥ ५ ॥ नृत्तायसूतम् ॥ नृत्तायसूतङ्गी
तायशैलूषन्धर्म्मायसभाचरन्नरिष्ठायैभीमलन्नर्म्मायरेभꣳहसाय
कारिमानन्दायस्त्रीषखम्प्रमदेकुमारीपुत्रम्मेधायैरथकारन्धैर्य्या
यतक्षाणम् ॥ ६ ॥ [६] तपसेकौलालम् ॥ तपसेकौलालम्मायायै
कर्म्मारꣳरूपायमणिकारꣳशुभेवपꣳशरव्यायाऽइषुकारꣳहेत्यै

धनुष्कारङ्कर्म्मणेज्ज्याकारन्दिष्टायंरज्जुसर्जम्मृत्यवेमृगयुमन्तका
यश्श्वनिनम् ॥ ७ ॥ नदीभ्यःपौञ्जिष्ठम् ॥ नदीभ्यःपौञ्जिष्ठमृ
क्षीकांभ्योनैषादम्पुरुषव्याघ्रायंदुर्म्मदङ्गन्धर्वाप्सरोभ्योव्रात्यं
म्प्रयुग्भ्यऽउन्मत्तꣳ सर्प्पदेवजनेभ्योप्प्रतिपदमयेभ्यःकितव
मीर्य्यतायाऽ अकितवम्पिशाचेभ्योबिदलकारीय्यातुधानेभ्यः
कण्टकीकारीम् ॥ ८ ॥ सन्धयेजारम् ॥ सन्धयेजारङ्गेहायोपपतिमा
र्त्यैपरिवित्तन्निर्ऋत्यैपरिविविदानमराध्याऽ एदिधिषुःपतिन्निष्कृ

त्यै पेशस्क्कारीᳪं सञ्ज्ञानांयस्म्मरकारीम्प्रंकामोद्यायोपसदंव्वार्ण्णी
यानुरुधम्बलांयोपदाम् ॥९॥ उत्सादेब्भ्यः कुब्जम् ॥ उत्सादेब्भ्यः
कुब्जम्प्रमुदेव्वामनन्द्दाब्भ्यःस्स्त्रामᳪंस्वमायान्धमधर्म्मायबधिरम्प
वित्रांयभिषजम्प्रज्ञानांयनक्षत्रदर्शमांशिक्षायैप्प्रश्निनमुपशिक्षा
यांऽअभिप्प्रश्निनम्मर्य्यादांयैप्प्रश्नविवाकम् ॥ १० ॥ अर्म्मेब्भ्यो
हस्तिपम् ॥ अर्म्मेब्भ्योहस्तिपञ्जवायांश्वम्पुष्ट्यैगोपालंव्वीर्य्याया
विपालन्तेजसेजपालमिरांयैकीनाशंङ्कीलालांयसुराकारम्भद्द्रायं

गृहपꣳश्रेयंसेवित्तुधमाध्यक्ष्यायायानुक्षुत्तारम् ॥ ११ ॥ भायैदार्वा
हारम् ॥ भायैदार्वाहारम्प्रभायाऽअग्न्येघम्ब्रध्नस्यंव्विष्टपायाभिषे
क्तारंव्वर्षीष्ठायनाकायपरिवेष्टारन्देवलोकायपेशितारम्मनुष्यलो
कायंप्प्रकरितारꣳसर्वेभ्योलोकेभ्यंऽउपसेक्तारमवंऽऋत्यैव्वधायो
पमन्थितारम्मेधायवासꣳपल्पूलीम्प्रकामायरंजयित्रीम् ॥ १२ ॥
ऋतयैस्तेनहृदयम् ॥ ऋतयैस्तेनहृदयंव्वैरहत्यायपिशुनंव्विविक्यैक्ष
त्तारमौपद्रष्ट्यायायानुक्षत्तारम्बलायानुचरम्भूम्नेपरिष्कन्दम्प्रिया

यंप्प्रियवादिनमरिष्टयाऽअश्वसादꣳस्वर्ग्गायलोकायभागदुघंवर्षि
ष्ठायनाकायपरिवेष्टारम् ॥ १३ ॥ मन्न्यवेयस्तापम् ॥ मन्न्यवे
यस्तापङ्क्रोधायनिसरंय्योगायायोक्तारꣳ शोकायाभिसर्त्तारङ्क्षेमा
यविमोक्तारमुत्कूलनिकूलेभ्यंस्त्रिष्ठिनंव्वपुषेमानस्कृतꣳशीलाया
जनीकारीन्निर्ऋत्यैकोशकारीय्यमायासूम् ॥ १४ ॥ यमायेयम
सूम् ॥ यमायेयमसूमथर्व्वभ्योवतोकाꣳसंव्वत्सरायपर्य्यायिणी
म्परिवत्सरायाविजातामिदावत्सरायातीत्वरीमिद्वत्सरायातिष्क

द्वरींव्वत्सरायविजर्ज्जराꣳसंव्वत्सरायपलिक्क्नीमृभुभ्योजिनसन्धꣳ
साध्येभ्यश्चर्म्मम्नम् ॥ १५ ॥ सरोभ्योधैवरम् ॥ सरोभ्योधैवरमु
पस्थावराभ्योदाशंवैशन्ताभ्योबैन्दन्नड्वलाभ्यःशौष्कलम्पारा
यमार्ग्गारमवारायकैवर्त्तन्तीर्थेभ्यऽ आन्दंव्विषमेभ्योमैनालꣳ
स्वनेभ्यः पर्ण्णकङ्गुहाभ्यः किरातꣳ सानुभ्योजम्भकम्पर्व्वते
भ्यःकिम्पूरुषम् ॥ १६ ॥ बीभत्सायैपौल्कसम् ॥ बीभत्सायैपौ
ल्कसंव्वर्ण्णायहिरण्यकारन्तुलायैवाणिजम्पश्चादोषायग्ग्लावि

नं॑विश्वे᳚भ्योभू॒तेभ्यः॑ सि॒ध्मलम्भू॒त्यैजा॒गर॑णमभू॑त्यैस्वप्नमा
त्यैज॑नवा॒दिनं॑व्यृ॒द्धाऽअप॑गल्भꣳसꣳश॒रायं॑प्र॒च्छिदम् ॥ १७ ॥
अ॒क्ष॒रा॒जाय॑कित॒वम् ॥ अ॒क्ष॒रा॒जाय॑कित॒वङ्कृ॒ताया॑दिनव॒दर्शं॒त्रेता
यैक॒ल्पिनं॑द्वा॒परा॑याधिक॒ल्पिनं॑मास्क॒न्दाय॑सभास्था॒णुम्मृ॒त्यवे
गो॒व्यच्छ॒मन्त॑काय॒गोघा॒तङ्क्षु॒धेयोगा॒ङ्विकृ॒न्तन्त॒म्भिक्ष॑माणऽउप
ति॒ष्ठ॑ति॒दुष्कृ॒ताय॒चर॑काचार्य॒म्पाप्म॒नेसै॑ल॒गम् ॥ १८ ॥ प्र॒ति
श्रु॒त्का॑या॒ऽअर्त्त॑नम् ॥ प्र॒ति॒श्रु॒त्का॑या॒ऽअर्त्त॑नङ्घो॒षाय॑भ॒षमन्ता॑

यबहुवादिनंमनन्तायमूकꣳ शब्दांयाडम्बराघातम्महंसेवीणावाद ङ्क्रोशांयतूणवध्ध्ममर्म्मवरस्प्परायंशङ्खध्ध्मंवनायवनपमन्न्यतोरण्या यदावपम् ॥ १९ ॥ नर्म्मायंपुँश्चलूम् ॥ नर्म्मायंपुँश्चलूꣳहसायका रिंप्याद्दंसेशाबल्ह्याङ्ग्रामण्ण्यङ्गणकमभिक्रोशंकुन्तान्महंसेवीणा वादम्पाणिग्घ्नन्तूणवध्ध्मन्तान्नृत्तायानन्दायंतलवम् ॥ २० ॥ अग्न्येपीवानम् ॥ अग्नयेपीवानम्पृथिव्व्यैपीठसर्प्पिणंवायवेचाण्डा लमन्तरिक्षायवꣳ शनर्त्तिनंन्दिवेखलतिꣳसूर्य्यायहर्य्यक्षन्नक्षत्रे

भ्यः किर्म्मिरञ्चन्द्रमसे किलासमह्नेशुक्लम्पिङ्गाक्षᳬं रात्र्यैकृष्ण
म्पिङ्गाक्षम् ॥ २१ ॥ अथैतान् ॥ अथैतानष्टौविरूपानालंभतेति
दीर्ग्घञ्चातिह्रस्वञ्चातिस्थूलञ्चातिकृशञ्चातिशुक्लञ्चातिकृष्णञ्चा
तिकुल्वञ्चातिलोमशञ्च ॥ अशूद्राऽअब्राह्मणास्तेप्राजापत्याः ॥
मागधःपुंश्चलीकितवःक्लीबोशूद्राऽअब्राह्मणास्तेप्राजापत्याः ॥
।२२। [१६]इतिश्रीवाजसनेयसंहितायांत्रिंशत्तमोऽध्यायः ॥३०॥
श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ सहस्रशीर्षाषोडशाद्यःसं

भूतःषट्द्वौद्वाविᳬंशतिः । हरिःॐसहस्रशीर्षापुरुषः । सहस्राक्षः
सहस्रपात् ॥ सभूमिᳬंसर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरु
षऽएव ॥ पुरुषएवेदᳬंसर्वंयद्भूतंयच्चभाव्यम् ॥ उतामृतत्वस्ये
शानोयदन्नेनातिरोहति ॥ २ ॥ एतावानस्य । महिमातोज्ज्यायाँ
श्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥ ३ ॥
त्रिपादूर्ध्वः ॥ त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ॥ ततो
विष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥४॥ ततोविराट् ॥ ततोवि

राडंजायतव्विराजोऽअधिपूरुषः ॥ सजातोऽअत्यरिच्यतपश्चाद्भू
मिमथोपुरः ॥ ५ ॥ तस्माद्यज्ञात् ॥ तस्माद्यज्ञात्सर्वहुतःसम्भृत
म्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रेवायव्यानारण्याग्ग्राम्म्याश्चये ॥६॥
तस्म्माद्यज्ञात् ॥ तस्म्माद्यज्ञात्सर्वहुतऽऋचःसामानिजज्ञिरे ॥
छन्दाँसिजज्ञिरेतस्म्माद्यजुस्तस्म्मादजायत ॥ ७ ॥ तस्म्माद
श्वाः ॥ तस्म्मादश्वाऽअजायन्तयेकेचोभयादतः ॥ गावोहजज्ञिरे
तस्म्मात्तस्माज्जाताऽअजावयः ॥ ८ ॥ तंय्यज्ञम् ॥ तंय्यज्ञम्ब

हिंषिप्प्रौक्षन्न्पुरुंषञ्जातमंग्ग्रतः ॥ तेनंदेवाऽअंयजन्तसाद्ध्याऽऋषं
यश्च्चये ॥ ९ ॥ यत्पुरुषम् ॥ यत्पुरुंषंव्यदंधुःकतिधाव्यंकल्पयन् ॥
मुखङ्किमंस्यासीत्किम्बाहूकिमूरूपादांऽउच्यते ॥ १० ॥ ब्राह्मणो
स्य ॥ ब्राह्मणोस्यमुखंमासीद्बाहूराजन्न्यः कृत ॥ ऊरूतदंस्यय
द्वैश्यंः पद्भ्याᳬशूद्द्रोऽअंजायत ॥ ११ ॥ चन्द्दमामनंसः ॥ च
न्द्रमामनंसोजातश्च्चक्षोःसूर्य्योऽअजायत ॥ श्श्रोत्राद्वायुश्च्चप्प्रा
णश्च्चमुखांदुग्निरंजायत ॥ १२ ॥ नाब्भ्यांऽआसीत् ॥ नाब्भ्यांऽ

आसीदन्तरिक्षꣳशीर्ष्णोद्यौःसमवर्त्तत ॥ पद्भ्याम्भूमिर्दिशःश्रोत्रा
त्तथालोकाँ२ऽअकल्प्पयन् ॥ १३ ॥ यत्पुरुषेण । हविषादेवायज्ञ
मतन्न्वत ॥ व्वसन्तोस्यासीदाज्यङ्ग्रीष्म्मऽइध्मःशरद्धविः ॥ १४ ॥
सप्तास्यासन् ॥ सप्तास्यासन्न्परिधयस्त्रिःसप्तसमिधःकृताः ॥ देवा
यद्यज्ञन्तन्न्वानाऽअबध्नन्न्पुरुषम्पशुम् ॥ १५ ॥ यज्ञेनयज्ञम् ॥ यज्ञे
नयज्ञमयजन्तदेवास्तानिधर्म्माणिप्प्रथमान्न्यासन् ॥ तेहनाकम्म
हिमानःसचन्तयत्रपूर्वेसाध्याःसन्तिदेवाः ॥ १६ ॥ [१६] अद्भ्यः

सम्भृतः । पृथिव्यैरसाच्चविश्वकर्म्मणःसमवर्त्तताग्ग्रे ॥ तस्यत्त्वष्टा
विदधद्रूपमेतितान्मर्त्यस्यदेवत्वमाजानमग्ग्रे ॥ १७ ॥ वेदाहम् ॥
वेदाहमेतम्पुरुषम्महान्तमादित्यवर्ण्णन्तमसःपरस्तात् ॥ तमेव
विदित्वातिमृत्युमेतिनान्यःपन्थाविद्यतेयनाय ॥ १८ ॥ प्रजापति
श्चरति ॥ प्रजापतिश्चरतिगर्ब्भेअन्तरजायमानोबहुधाविजाय
ते ॥ तस्ययोनिम्परिपश्यन्तिधीरास्तस्मिन्हतस्थुर्ब्भुवनानिवि
श्वा ॥ १९ ॥ योदेवेब्भ्यः ॥ योदेवेब्भ्यऽआतपतियोदेवानाम्पु

रोहितं ॥ पूर्व्वोयोदेवेभ्योजातोनमोरुचायब्राह्मये ॥ २० ॥ रुच
म्ब्राह्मम् ॥ रुचम्ब्राह्मञ्जनयन्तोदेवाऽअग्ग्रेतदब्रुवन् ॥ यस्त्वैव
म्ब्राह्मणोव्विद्यात्तस्यदेवाऽअसन्वशे ॥ २१ ॥ श्रीश्च ॥ श्रीश्चते
लक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इ
ष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ॥२२॥ [६] ॥ २ ॥
इतिश्रीवाजसनेयसंहितायाएकत्रिंशोऽध्यायः ॥ ३१ ॥ श्रीवेदपु
रुषायनमः ॥ अनुवाकसूत्रम् ॥ तदेवसप्तवेनस्तन्नवद्वौषोडश ॥

हरिः ॐ तदेव ॥ तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः ॥ तदेव
शुक्रन्तद्ब्रह्म ता ऽआपः स प्रजापतिः ॥ १ ॥ सर्वे निमेषाः ॥ सर्वे नि
मेषा जज्ञिरे विद्युतः पुरुषादधि ॥ नैनमूर्द्ध्वन्न तिर्य्यञ्चन्न मध्ये परिज
ग्रभत् ॥ २ ॥ नतस्य ॥ प्रतिमा ऽअस्ति यस्य नाम महद्यशः ॥ हिर
ण्यगर्ब्भ ऽइत्येष मा मा हिꣳसीदित्येषा यस्मान्न जात ऽइत्येषः ॥
॥३॥ एषोह । देवः प्रदिशोनु सर्व्वाः पूर्व्वो ह जातः स ऽउगर्ब्भे ऽअन्तः ॥
स ऽएव जातः स जनिष्ष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्व्वतोमुखः ॥४॥

यस्म्माञ्जातम् ॥ यस्म्माञ्जातन्नपुराकिञ्चनैवयऽआबभूवभुवंना
निव्विश्श्वां ॥ प्रजापंतिःप्प्रजयांसꣳरराणस्त्रीणिज्ज्योतीꣳषिसच
तेसषोडशी ॥ ५ ॥ येनद्यौः ॥ येनद्यौरुग्ग्रापृथिवीचंदृढायेनस्व
स्तभितंय्येननाकंः ॥ योऽअन्तरिंक्षेरजंसोव्विमानःकस्म्मैदेवायं
हविषाव्विधेम ॥ ६ ॥ यङ्क्रन्दसी ॥ यङ्क्रन्दसीऽअवंसातस्तभानेऽ
अब्भ्यैक्षेताम्मनंसारेजंमाने ॥ यत्राधिसूरऽउदितोव्विभातिकस्म्मै
देवायंहविषाव्विधेम ॥ आपोहयद्बृहतीर्व्विश्श्वदापंः ॥ ७ ॥ [७]

संहि. ॥ ८३ ॥

व्वेनस्तत् ॥ व्वेनस्तत्पश्श्यन्निहितङ्गुहासद्यत्रव्विश्श्वम्भवत्येकनीडम् ॥ उ. अ.
तस्म्मिन्निदꣳसञ्चव्विचैतिसर्व्वꣳसऽओतꣳप्प्रोतश्श्चव्विभूꣳप्प्रजासु ॥ ॥३२॥
॥ ८ ॥ प्रतत् ॥ प्रतद्वोचेदमृतन्नुव्विद्वान्गन्धर्व्वोधामव्विभृतङ्गुहास
त् ॥ त्रीणिपदानिनिहितागुहास्ययस्तानिवेदसपितुश्पितासत् ॥
॥ ९ ॥ सनः ॥ सनोबन्धुर्ज्जनितासव्विधाताधामानिव्वेदभुवनानि
विश्वा ॥ यत्रदेवाऽअमृतमानशानास्तृतीयेधामन्नध्यैरयन्त ॥१०॥
परीत्यभूतानि । परीत्यलोकान्परीत्यसर्व्वाꣳप्प्रदिशोदिशश्च ॥ ॥ ८३ ॥

उपस्थायंप्प्रथमजामृतस्यात्त्मनात्त्मानंमभिसंव्विवेश ॥ ११ ॥
परिद्यावापृथिवी। सद्यऽइत्वापरिँल्लोकान्परिदिशः परिस्वः ॥ ऋत
स्यतन्तुंव्वितंतंव्विचृत्यतदंपश्यत्तदंभवत्तदासीत् ॥ १२॥ सदंसस्प
तिम् ॥ सदंसस्पतिमद्भुतम्प्रियमिन्द्रस्यकाम्म्यंम् ॥ सनिम्मेधाम
यासिषऽस्वाहा ॥ १३ ॥ याम्मेधाम् ॥ याम्मेधान्देवगणाः पित
रश्श्चोपासंते ॥ तयामामद्यमेधयाग्नेमेधाविनङ्कुरुस्वाहा ॥ १४ ॥
मेधाम्मे ॥ मेधाम्मेवरुणोददातुमेधामग्निःप्प्रजापतिः ॥ मेधामि

संहि. ॥८४॥

न्द्रश्चवायुश्चमेधान्धातादंदातुमेस्वाहा ॥ १५ ॥ इदम्मे ॥ इद
म्मेब्रह्मंचक्षत्रञ्चोभेश्श्रियंमश्नुताम् ॥ मयिदेवादंधतुश्श्रियमुत्त
मान्तस्यैतेस्वाहा ॥१६॥ [९] ॥२॥ इतिश्रीवाजसनेयसंहितायांद्वा
त्रिंशोऽध्यायः ॥ ३२ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥
अस्याजरासः सप्तदशापश्चितद्वादशविभ्राट्चतुर्दशप्रवावृजएका
दशप्रवायुंप्रवीरयापंचदशकावानस्त्रयोदशसप्तसप्तनवतिः ॥ हरिः
ॐ अस्याजरासः ॥ अस्याजरासोदमामरित्राऽअर्चद्धूमासोऽअग्न

उ. अ. ॥३३॥

॥८४॥

यंः पावकाः ॥ श्वितीचयंः श्वात्रासोभुरण्यवोवनर्षदोवायवोनसो

मांꣳ ॥ १ ॥ हरयोधूमकैतवꣳ ॥ हरयोधूमकैतवोवातंजूताऽउपद्य

वि ॥ यतंन्तेवृथगग्नयंः ॥ २ ॥ यजांनꣳ ॥ यजांनोमित्रावरुंणा

यजांदेवाँ२ऋतम्बृहत् ॥ अग्नेयक्षिस्वन्दमंम् ॥ ३ ॥ युक्ष्वाहि ।

देवहूतमाँ२अश्वाँ२अग्नेरथीरिव ॥ निहोतापूर्व्यःसंदꣳ ॥ ४ ॥ द्वेवि

रूपे । चरतःस्वर्थेऽअन्यान्यावत्समुपंधापयेते ॥ हरिरन्यस्याम्भ

वंतिस्वधावांञ्छुक्रोऽअन्यस्यान्ददृशेसुवर्च्चाःꣳ ॥५॥ शतम् १७००

संहि. ॥८५॥

अयमिह । प्प्रथमोधायिधातृभिर्होतायजिष्ठोऽअध्वरेष्वीड्यः ॥ उ. अ.
यमप्नवानोभृगवोविरुरुचुर्व्वनेषुचित्रंव्विभ्वंव्विशेविशे ॥ ६ ॥ त्रीणि ॥३३॥
शता । त्रीसहस्राण्यग्निन्त्रिᳪशच्चदेवानवचासपर्य्यन् ॥ औक्षन्घृ
तैरस्तृणन्बर्हिरस्म्माआदिद्धोतारन्न्यसादयन्त ॥ ७ ॥ मूर्द्धानन्दि
वः ॥ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्वानरमृतऽआजातमग्नि
म् ॥ कविᳪसम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ॥ ॥८५॥
॥८॥ अग्निर्वृत्राणि । जङ्घनद्द्रविणस्युर्विपन्यया ॥ समिद्धᳪशुक्रऽ

आहुतः ॥ ९ ॥ विश्वेभिःसोम्म्यम् ॥ विश्वेभिःसोम्म्यम्मद्ध्वग्नऽ
इन्द्रेणव्वायुना ॥ पिबामित्रस्यधामभिः ॥ १० ॥ आयत् ॥ आय
दिषेनृपतिन्तेजऽआनड्गुचिरेतोनिषिक्तन्द्यौरभीके ॥ अग्निश्शर्द्ध
मनवद्यंय्युवानᳫंस्वाद्ध्यञ्जनयत्सूदयच्च ॥ ११ ॥ अग्नेशर्द्ध । मह
तेसौभगायतवद्द्युम्म्नान्युत्तमानिसन्तु ॥ सञ्जास्प्पत्यᳫंसुयममा
कृणुष्ष्वशत्रूयतामभितिष्ठमहाᳫंसि ॥ १२ ॥ त्वाᳫंहि । मन्द्र
तममर्कशोकैर्व्ववृमहेमहिनश्श्रोषष्यग्ने ॥ इन्द्रन्नत्वाशवसादेवता

संहि॰ ॥८६॥

व्वायुम्पृणन्तिराधसान्नृतमाः ॥ १३ ॥ त्वेऽअंग्ने । स्वाहुतप्प्रियासः
सन्तुसूरयः ॥ यन्तारोयेमघवांनोजनानामूर्व्वान्दयन्तगोनाम् ॥
॥ १४ ॥ श्रुधिश्श्रुत्कर्ण्ण ॥ श्रुधिश्श्रुत्कर्ण्णव्वह्निहिभिर्द्देवैरंग्नेसयाव
भिः ॥ आसीदन्तुबर्हिषिमित्त्रोऽअंर्य्यमाप्प्रातर्य्यावाणोऽअद्ध्वर
म् ॥१५॥ व्विश्श्वेषामदितिः ॥ विश्श्वेषामदितिर्य्यज्ञियानांव्विश्श्वेषा
मतिथिर्म्मानुषाणाम् ॥ अग्निर्द्देवानामवंऽआवृणानःसुमृडीकोभ
वतुजातवेदाः ॥ १६ ॥ महोऽअग्नेः । संमिधानस्यशर्म्मण्यनागा

उ॰ अ॰ ॥२३॥

॥८६॥

मि॒त्रे॑व॒रु॑णे॒स्व॒स्तये॑ ॥ श्रेष्ठे॒स्याम॑सवि॒तुश्स॒वी॑मनि॒तद्दे॒वाना॒म॑वो॑ऽअ॒
द्या॒वृ॑णीमहे ॥ १७ ॥ [१७] आपा॑श्चि॒त ॥ आपा॑श्चि॒त्पि॒प्युस्त॒र्य्यो॒
नगावो॒नक्ष॒न्नृतञ्ज॑रि॒तार॑स्तऽइन्द्र ॥ या॒हि॒वा॒युर्न्न॑नि॒युतो॑नो॒ऽअच्छा॒
त्व॒ᳯहि॒धीभि॒र्द्द॑यसे॒वि॒वाजा॑न् ॥ १८ ॥ गाव॒ऽउप॑ ॥ गाव॒ऽउपा॑वता
व॒तम्म॒ही॒य॒ज्ञस्य॑र॒प्सुदा॑ ॥ उ॒भाकर्ण्णा॑हि॒र॒ण्यया॑ ॥१९॥ य॒दु॒द्य ।
सू॒र॒ऽउदि॒तेना॑गामि॒त्रो॒ऽअ॒र्य्य॒मा ॥ सु॒वाति॑सवि॒ताभग॑÷ ॥ २० ॥
आसु॒तेसि॑ञ्चत॒श्रि॒यᳯरोद॑स्योरभि॒श्रिय॑म् ॥ रसा॒दधीतवृ॒ष॒भम् ॥

तम्प्रत्नथायंव्वेनः ॥ २१ ॥ आतिष्ठन्तम्परि ॥ आतिष्ठन्तम्परिवि
श्वेऽअभूषञ्छ्रियोव्वसानश्चरतिस्वरोचिः ॥ महत्तद्वृष्णोऽअसुर
स्यनामाव्विश्वरूपोऽअमृतानितस्थौ ॥ २२ ॥ प्रवः ॥ प्रवोमहेम
न्दमानायान्धसोर्च्चाव्विश्वानरायव्विश्वाभुवे ॥ इन्द्रस्ययस्यसुम
खंसहोमहिश्रवोनृम्णञ्चरोदसीसपर्य्यतः ॥ २३ ॥ बृहन्नित् ॥
बृहन्निदिध्मऽएषाम्भूरिशस्तम्पृथुःस्वरुः ॥ येषामिन्द्रोयुवास
खा ॥२४॥ इन्द्रेहि ॥ इन्द्रेहिमत्स्यन्धसोव्विश्वेभिःसोमपर्व्वभिः ॥

म॒हाँ२ऽअ॑भि॒ष्टिरोज॑सा ॥ २५ ॥ इन्द्रौवृ॒त्रम् ॥ इन्द्रौवृ॒त्रमंवृणो॒
छर्द्धंनीति॒ᳬप्रमा॒यिनामामिना॒द्वर्प्पंणीतिᳬ ॥ अह॒न्व्य॒ᳬसमु॒शध॒
ग्वनेष्ष्वा॒विर्द्धेनां‌ऽअकृणोद्रा॒म्म्याणांम् ॥ २६ ॥ कुत॒स्त्वम् ॥ कुत॒
स्त्वमिन्द्र॒माहिंन॒ᳬसन्नेकौयासिसत्पते॒किन्तंऽइ॒त्था ॥ सम्पृंच्छसे
समरा॒णःशूंभा॒नैर्वो॒चेस्तन्नौहरिवो॒यत्तेंऽअ॒स्म्मे ॥ म॒हाँ२ऽइन्द्रो॒
यऽओजंसाक॒दा॒चनस्त॒रीरंसिक॒दा॒चनप्प्रयुंच्छसि ॥ २७ ॥ आत
त्तंऽइन्द्रा॒यव॑ः । पनन्ता॒भियऽऊ॒र्वङ्गोमंन्त॒न्तितृंत्सान् ॥ स॒कृ

त्स्वुंरुयेपुंरुपुत्राम्म्हीॐसुहस्रंधाराम्बृहृतीन्दुदुंक्षन् ॥ २८ ॥ इमा
न्ते ॥ इमान्तेधियम्प्रभंरेमुहोमुहीमुस्यस्तोत्रेधिषणायत्तंऽआन्
जे ॥ तमुंत्सवेचंप्प्रसुवेचंसासुहिमिन्द्रंन्देवासुःशवंसामदुन्ननु ॥
॥ २९ ॥ [१२] विभ्राड्वृहत् ॥ विभ्राड्वृहत्पिंबतुसोम्म्यम्मध्वायु
र्दधंद्युज्ञपंतावविंन्हुतम् ॥ वातंजूतोयोऽअंभिरक्षंतित्क्मनांप्प्रजाः
पुंपोषपुरुधाविराजति ॥ ३० ॥ उदुत्यम् ॥ उदुत्यञ्जातवेदसन्देवं
वंहन्तिकेतवंः ॥ दृशेविश्वांयसूर्य्यम् ॥ ३१ ॥ येनापावक ॥ येना

पावकुचक्षसाभुरण्यन्तुञ्जनाँ२ऽअनु ॥ त्वंव्वरुणपश्यसि ॥ ३२ ॥
दैव्यांवद्धर्य्यू ॥ दैव्यांवद्धर्य्यूऽआगंतुद्रथेनसूर्य्यत्वचा ॥ मद्ध्वां
युज्ञᳬसमञ्ञाथे ॥ तम्प्रुत्क्कथायंव्वेनाश्चित्रन्देुवानाम् ॥३३॥ आनः॥
आनुऽइडाभिर्व्विदथेसुशुस्तिव्विश्वानरᳬसवितादेवऽएतु ॥ अपिय
थांयुवानोमत्सथानोव्विश्वुञ्जगंदभिपित्वेमंनीषा॥३४॥ यदुद्य । क
च्चंव्वृत्रहन्नुदगाऽअभिसूर्य्य॥ सर्व्वन्तदिन्द्रतेव्वशे॥३५॥ तुरणिर्व्विश्व
दर्शतᳬ ॥ तुरणिर्व्विश्वदर्शतोज्ज्योतिष्कृदसिसूर्य्य ॥ व्विश्वमाभासि

रोचनम् ॥ ३६ ॥ तत्सूर्य्यस्य । देवत्वन्तन्महित्वम्मध्याकर्त्तोर्वि
ततं सञ्जभार ॥ यदेदयुक्तहरितः सधस्त्थादाद्रात्रीवासस्तनुतेसि
सस्मै ॥ ३७ ॥ तन्मित्रस्य ॥ तन्मित्रस्यव्वरुणस्याभिचक्षेसूर्य्यो
रूपङ्कृणुतेद्योरुपस्थे ॥ अनन्तमन्न्यद्रुशदस्यपाजः कृष्णमन्न्यद्ध
रितः सम्भरन्ति ॥३८॥ बण्णमहान् ॥ बण्णमहाँ२ऽअसिसूर्य्यबडा
दित्यमहाँ२ऽअसि ॥ महस्तेसतोमहिमापनस्यतेद्धादेवमहाँ२ऽअ
सि ॥ ३९ ॥ बट्सूर्य्यश्रवसामहाँ२ऽअसिसत्रादेवमहाँ२असि ॥ म

न्हादेवानांमसुर्य्यः पुरोहितोव्विभुज्ज्योतिरदाब्भ्यम् ॥ ४० ॥ श्रायं
न्तऽइवसूर्य्यं ॥ श्रायन्तऽइवसूर्य्यंव्विश्वेदिन्द्रस्यभक्षत ॥ व्वसूनि
जातेजनंमानऽओजसाप्प्रतिभागन्नदीधिम ॥ ४१ ॥ अद्यादेवाः ॥
अद्यादेवाऽउदितासूर्य्यस्यनिरꣳहसः पिपृतानिरंव्वद्यात् ॥ तन्नो
मित्रोव्वरुणोमामहन्तामदितिः सिन्धुः पृथिवीऽउतद्यौः ॥ ४२ ॥
आकृष्णेनं॥ आकृष्णेनरजसाव्वर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥
हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ ४३ ॥ [१४]

संहि. प्रवांवृजे । सुप्प्रयाबुर्हिरेषामाविश्प्पतींवुबीरिंटऽइयाते ॥ व्विशाम् अ. उ.
॥९०॥ क्क्षोरुषसंः पूर्व्वहूतौवायुश्पूषास्वुस्तयेंनियुत्वांन् ॥ ४४ ॥ इन्द्रवा ॥३३॥
यूबृहुस्प्पातिम् ॥ इन्द्रवायूबृहुस्प्पातिंम्मित्राग्निम्पूषणम्भगंम् ॥
आदित्यान्मारुंतङ्गुणम् ॥ ४५ ॥ व्वरुणंः प्रावि॒ता । भुंवन्मित्रोव्वि
श्वांभिरूतिभिंः ॥ करंतान्नंःसुराधंसंः ॥ ४६ ॥ अधिनंः ॥ अधिनऽ
इन्द्रैषांव्विष्णोंसजात्यानाम् ॥ इतामरुंतोऽअश्विना ॥ तम्प्रत्क्कथा ॥९०॥
यंव्वेनोयेदेंवासऽआनुऽइडाभिर्व्विश्वेंभिंः सोम्म्यम्म्मद्ध्वोमांसश्च्वर्ष

णीधृतं॑ ॥ ४७ ॥ अग्न॒ऽइन्द्र॒ । वरु॑णमित्र॒देवा॒ शर्द्ध॒ प्प्रयं॑न्त॒मारु॑
तो॒तव्विं॑ष्णो ॥ उ॒भानास॑त्यारु॒द्द्रोऽअ॑धग्ग्नाः॒पू॒षाभग॒ सर॑स्वतीजु
षन्त ॥४८॥ इ॒न्द्रा॒ग्ग्नीमि॒त्रावरु॑णा ॥ इ॒न्द्रा॒ग्ग्नीमि॒त्रावरु॒णादि॑तिँ
स्वः॒पृ॒थि॒वीन्द्याम्म॒रुत॒ पर्व्वं॑ताँ२अ॒पः ॥ हु॒वेव्विष्ष्णुं॑म्पू॒षण॒म्ब्रह्म॑
ण॒स्प्पति॒म्भग॒न्नुशꣳस॑ꣳसवि॒तार॑मू॒तये॑ ॥ ४९ ॥ अ॒स्म्मेरु॒द्द्राः ॥
अ॒स्म्मेरु॒द्द्रामे॒हना॒पर्व्वं॑तासोव्वृ॒त्रह॑त्ये॒भर॑हूतौस॒जोषाः॑ ॥ यःशꣳसं॑
तेस्तुव॒तेधायि॑प॒ज्ज्रऽइन्द्र॑ज्ज्येष्ठाऽअ॒स्म्माँ२अ॑वन्तुदे॒वाः ॥ ५० ॥

अर्वाञ्चौऽअद्य ॥ अर्वाञ्चौऽअद्याभवतायजत्राऽआवोहार्दिभयमा
नोव्ययेयम् ॥ त्राध्वन्नोदेवानिजुरोवृकस्यत्राध्वङ्कर्त्तादवपदोयज
त्राः ॥ ५१ ॥ विश्वेऽअद्य । मरुतोविश्वऽऊतीविश्वेभवन्त्वग्नयः
समिद्धाः ॥ विश्वेनोदेवाअवसागमन्तुविश्वमस्तुद्रविणंवाजोऽअ
स्मे ॥ ५२ ॥ विश्वेदेवाः । शृणुतेमꣳहवम्मेयेऽअन्तरिक्षेयऽउप
द्यविष्ठ ॥ येऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन्बर्हिषिमा ॥९१॥
दयध्वम् ॥ ५३ ॥ देवेभ्योहि । प्रथमंयज्ञियेभ्योमृतत्वꣳसुव

सिंभागमुत्तमम् ॥ आदिद्दामानंᳪसवितुर्व्वर्णुपेनूचीनाजीविता
मानुषेब्भ्यः ॥ ५४ ॥ [११] प्रवायुम् ॥ प्रवायुमच्छाबृहतीमनी
षाबृहद्रयिंविश्ववारᳪरथप्प्राम् ॥ द्युतद्यामानियुतःपत्यमानःकु
विःकविमियक्षसिप्प्रयुज्यो ॥ ५५ ॥ इन्द्रवायूऽइमे । सुताऽउप
प्प्रयोभिरागतम् ॥ इन्दवोवामुशन्तिहि ॥ ५६ ॥ मित्रᳪहुवे ।
पूतदक्षंवरुणञ्चरिशादसम् ॥ धियङ्घृताचीᳪसाधन्ता ॥५७॥ दस्रा
युवाकवः । सुतानासत्यावृक्तबर्हिषः ॥ आयातᳪरुद्रवर्त्तनी ॥ तम्प्र

त्कमायंव्वेनः ॥ ५८ ॥ व्विदद्यदिं ॥ व्विद्यदींसरमांरुग्णमद्रेर्म्माहि
पाथः पूर्व्यꣳसध्र्यक्कः ॥ अग्रन्नयत्सुपद्यक्षराणामच्छारवम्प्रथ
माजांनतीगांत् ॥ ५९ ॥ नहिस्प्पशंम् ॥ नहिस्प्पशमविंदन्नन्यम
स्म्माद्वैश्वानरात्पुरऽएतारमग्नेः ॥ एमेंनमवृधन्नमृताऽअमर्त्यंवै
श्वानरङ्क्षैत्रंजित्यायदेवाः ॥ ६० ॥ उग्राविंघनिनां ॥ उग्राव्विघ
निनांमृधंऽइन्द्राग्नींहंवामहे ॥ तानोंमृडातऽईदृशे ॥ ६१ ॥ उपा
स्म्मै । गायतानरः पवमानायेन्दवे ॥ अभिदेवाँ२ऽइयक्षते ॥ ६२॥

येत्वां । हिहत्यैमघवन्नवंर्द्धन्येशांम्बरेहंरिवोयेगविंष्टौ ॥ येत्वांनू
नमंनुमदंन्तिविप्राःपिबेंन्द्रसोमंसगंणोमरुद्भिः ॥ ६३ ॥ जनिं
ष्ठाऽउग्रःसहंसेतुरायंमन्द्रऽओजिंष्ठोबहुलाभिंमानः ॥ अवंर्द्धन्नि
न्द्रंम्मरुतंश्चिदत्रंमातायद्वीरन्दधनद्धनिंष्ठा ॥ ६४ ॥ आतु ॥ आतू
नंऽइन्द्रवृत्रहन्नस्म्माकंमर्द्धमागंहि ॥ महान्महीभिंरूतिभिंः ॥
॥ ६५ ॥ त्वामिंन्द्र ॥ त्वामिंन्द्रप्प्रतूंर्तिष्वभिविश्वांऽअसिस्पृधंः ॥
अशस्तिहाजंनिताविंश्वतूरंसित्वन्तूंर्य्यतरुष्यतः ॥ ६६ ॥ अनुंते ॥

संहि. ॥ ९३ ॥

अनु॑ ते॒ शुष्मं॑ तु॒रय॑न्तमीयतुः क्षो॒णी शिशुं॒ न मा॒तरा॑ ॥ विश्वा॑स्ते॒ स्पृ
धः॑ श्नथयन्त म॒न्यवे॑ वृ॒त्रं यदि॑न्द्र॒ तूर्व॑सि ॥ ६७ ॥ य॒ज्ञो दे॒वाना॑म् ॥
य॒ज्ञो दे॒वानां॒ प्रत्ये॑ति सु॒म्नमादि॑त्यासो॒ भव॑ता मृळ॒यन्तः॑ ॥ आ वो॒
र्वा॒ची सु॑म॒तिर्व॑वृत्याद॒ꣳहोश्चि॒द्या व॑रिवो॒वित्त॒रास॑त् ॥ ६८ ॥ अद॑
ब्धेभिः सवितः । पा॒युभि॒ष्ट्वꣳ शि॒वेभि॑र॒द्य परि॑ पाहि नो॒ गय॑म् ॥ हि
र॑ण्यजिह्वः सुवि॒ताय॒ नव्य॑से॒ रक्षा॒ माकि॑र्नो॑ऽअ॒घश॑ꣳसऽईशत ॥
॥ ६९ ॥ [१५] प्रवी॑र॒या । शुच॑यो दद्रि॒रे वा॒मध्व॒र्युभि॒र्मधु॑मन्तः सु

उ. अ. ॥ ३३ ॥ ॥ ९३ ॥

तासं÷ ॥ त्वंहंवायोनियुतौयाह्यच्छापिबासुतस्यान्धंसोमदाय ॥
॥ ७० ॥ गावऽउपं ॥ गावऽउपावताबतम्महीयज्ञस्यरप्सुदा ॥ उ
भाकर्ण्णाहिरण्ययां ॥ ७१ ॥ काव्ययोराजानेषु ॥ काव्ययोराजा
नेषुक्त्वादक्षंस्यदुरोणे ॥ रिशादंसासधस्त्थऽआ ॥ ७२ ॥ दैव्यां
वद्ध्वर्य्यू ॥ दैव्यावद्ध्वर्य्यूऽआगंतहरथेनसूर्य्यत्वचा ॥ मद्ध्वायज्ञꣳ
समंञ्जाथे ॥ तम्प्रत्क्कथायंव्वेनः ॥ ७३ ॥ तिरश्चीनोव्वितंतꣳ ॥ ति
रश्चीनोव्वितंतोरश्मिरेषामधःस्विदासी३ दुपरिस्विदासी३त् ॥

संहि. ॥९४॥

रेतोधाऽआसन्महिमानंऽआसन्त्स्वधाऽअवस्तात्प्रयंतिःपरस्तात् ॥ ७४ ॥ आरोदंसी । अपृणदास्वंर्म्महज्जातंय्यदेंनमपसोऽअधां रयन् ॥ सोऽअंद्ध्वरायपरिंणीयतेकविरत्योनवाजंसातयेचनोंहितः ॥ ७५ ॥ उष्क्केभिर्व्वृत्रहन्तंमा ॥ उष्क्केभिर्व्वृत्रहन्तंमायामंन्दाना चिदागिरा ॥ आङ्गूषैराविवांसतः ॥ ७६ ॥ उपंनः । सूनवोगिरंः शृण्वन्त्वमृतंस्यये ॥ सुमृडीकाभंवन्तुनः ॥ ७७॥ ब्रह्माणिमे । मतयःशᳩसुतासःशुष्म्मंऽइयर्त्तिप्प्रभृंतोमेऽअद्रिंः ॥ आशांसते

उ. अ. ॥३३॥

॥९४॥

प्पातिहर्य्यन्त्युष्क्मेमाहरीवहतस्तानोऽअच्छं ॥ ७८ ॥ अनुत्तमा
ते। मघवन्नकिर्न्नुनत्त्वावाँ२ऽअस्तिदेवताविदानः ॥ नजायमानो
नशंतेनजातोयानिकरिष्ष्याकृणुहिप्प्रवृद्ध ॥ ७९ ॥ तदित् ॥ तदि
दासभुवनेषुज्येष्ठंय्यतोजज्ञऽउग्रस्त्वेषनृम्म्णः ॥ सद्योजज्ञानोनि
रिणातिशत्रूननुयंविश्श्वेमदन्त्यूमाः ॥ ८० ॥ इमाऽउत्वा। पुरूव
सोगिरोवर्द्धन्तुयाममं ॥ पावकवर्ण्णाःशुचयोविपश्चितोभिस्तोमै
रनूषत ॥ ८१ ॥ यस्यायम् ॥ यस्यायंविश्श्वऽआर्य्योदासःशेवधि

पाऽअरिः ॥ तिरश्चिदर्य्यैरुशमेपवीरवितुभ्येत्सोऽअंज्यतेरयिः
॥ ८२ ॥ अयꣳसहस्रम् ॥ अयꣳसहस्रमृषिभिःसहस्कृतःसमुद्रऽ
इवपप्रथे ॥ सत्यःसोऽअंस्यमहिमागृणेशवोयज्ञेषुविप्रराज्ये ॥
॥ ८३ ॥ अदब्धेभिःसवितः । पायुभिष्ट्वꣳशिवेभिरद्यपरिपाहिनो
गयम् ॥ हिरण्यजिह्वःसुवितायनव्यसेरक्षामाकिर्नोऽअघशꣳसऽ
ईशत ॥ ८४ ॥ [१५] आनः ॥ आनोयज्ञन्दिविस्पृशंवायोयाहि
सुमन्मभिः ॥ अन्तःपवित्रऽउपरिश्रीणानोयꣳशुक्रोऽअंयामि

ते ॥ ८५ ॥ इन्द्रवायूसुसन्दृशा । सुहवेहहवामहे ॥ यथानःसर्व्वऽ
इज्जनोनमीवःसङ्गमेसुमनाऽअसत् ॥८६॥ ऋधगित्था । समर्त्यः
शशमेदेवतातये ॥ योनूनम्मित्रावरुणावभिष्टयऽआचक्रेहव्यदा
तये ॥८७॥ आयातम् ॥ आयातमुपभूषतम्मध्वः पिबतमश्विना ॥
दुग्धम्पयोवृषणाजेन्यावसूमानोमर्द्धिष्टमागतम् ॥ ८८ ॥ प्रैतु ॥
प्रैतुब्रह्मणस्पतिःप्रदेव्येतुसूनृता ॥ अच्छावीरन्नर्य्यम्पङ्क्तिराधस
न्देवायज्ञन्नयन्तुनः ॥ ८९ ॥ चन्द्रमाऽअप्सु ॥ चन्द्रमाऽअप्स्व

न्तरासुपर्णोधावतेदिवि ॥ रयिम्पिशङ्गम्बहुलम्पुरुस्पृहᳬहरिरे
तिकनिक्रदत् ॥ ९० ॥ देवन्देवंवः ॥ देवन्देवंवोवसेदेवन्देवमभि
ष्टये ॥ देवन्देवᳫहुवेमवाजसातयेगृणन्तोदेव्याधिया ॥ ९१ ॥ दि
विपृष्टः ॥ दिविपृष्टोऽअरोचताग्निर्वैश्वानरोबृहन् ॥ क्ष्मयावृधानऽ
ओजसाचनोहितोज्ज्योतिषाबाधतेतमः ॥ ९२ ॥ इन्द्राग्नीऽअपा
त् ॥ इन्द्राग्नीऽअपादियम्पूर्वागात्पद्वतीभ्यः ॥ हित्वीशिरोजि
ह्वयावावदच्चरत्त्रिᳬशत्पदान्यक्रमीत् ॥ ९३ ॥ देवासोहिष्मा ।

मनंवेसमंन्यवोविश्वेसाकꣳसरातयः ॥ तेनोऽअद्यतेऽअंपरन्तुचे
तुनोभवंन्तुवरिवोविदः ॥ ९४ ॥ अपांधमत् ॥ अपांधमदभिशंस्ती
रशस्तिहाथेन्द्रोद्युम्न्याभंवत् ॥ देवास्तंऽइन्द्रसख्यायंयेमिरेबृ
हंद्भानोमरुद्गण ॥ ९५ ॥ प्रवः ॥ प्रवऽइन्द्रांयबृहतेमरुतोब्रह्मा
र्चत ॥ वृत्रꣳहंनतिवृत्रहाशतक्रंतुर्वज्रेणशतपर्वणा ॥ ९६ ॥ अस्ये
त् ॥ अस्येदिन्द्रोवावृधेवृष्ण्यꣳशवोमदेसुतस्यविष्णवि ॥ अद्या
तमंस्यमहिमानमायवोनुष्टुवन्तिपूर्वथा ॥ इमाऽउंत्वायस्यायम्

यꣳसहस्रंमूर्द्धऽऊपुणं॑ ॥ ९७ ॥ [१३] इतिश्रीवाजसनेयसंहिता
यात्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्र
म् ॥ यज्जाग्रतःपंचनद्यःसोमोधेनुमाकृष्णेनपूषंतवदशकानतदष्टौ
षडष्टापंचाशत् ॥ हरिः ॐयज्जाग्ग्रंतꣳ ॥ यज्जाग्ग्रंतोदूरमुदैतिदै
वन्तदुंसुप्तस्यतथैवैति ॥ दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मेमनं॑
शिवसंङ्कल्प्पमस्तु ॥ १ ॥ येनकर्म्माणि ॥ येनकर्म्माण्ण्यपसोम
नीषिणोयज्ञेकृण्वन्तिविदथेपुधीराꣳ ॥ यदपूर्व्वंय्यक्षमन्तःप्प्रजा

नान्तन्मेमनःशिवसङ्कल्पमस्तु ॥ २ ॥ यत्प्रज्ञानम् ॥ यत्प्रज्ञा
नमुतचेतोधृतिश्चयज्ज्योतिरन्तरमृतम्प्रजासु ॥ यस्मान्नऽऋते
किञ्चनकर्म्मक्रियतेतन्मेमनःशिवसङ्कल्पमस्तु ॥ ३ ॥ येनेदम् ॥
येनेदम्भूतम्भुवनम्भविष्यत्परिगृहीतममृतेनसर्व्वम् ॥ येनयज्ञ
स्तायतेसप्तहोतातन्मेमनःशिवसङ्कल्पमस्तु ॥ ४ ॥ यस्मिन्नृ
चः ॥ यस्मिन्नृचःसामयजूꣳषियस्मिन्प्रतिष्ठितारथनाभावि
वाराः ॥ यस्मिंश्चित्तꣳसर्व्वमोतम्प्रजानान्तन्मेमनःशिवसङ्कल्प

मस्तु ॥ ५ ॥ सुषारथिरश्वांनिव ॥ सुषारथिरश्वांनिवयन्मंनुष्या
न्नेनीयतेभीशुंभिर्व्वाजिनंऽइव ॥ हृत्प्रतिंष्ठुन्यदंजिरञ्जविंष्ठन्तन्मे
मनंःशिवसंङ्कल्पमस्तु ॥ ६ ॥ पितुन्न । स्तोषम्महोधर्म्माणन्तविं
षीम् ॥ यस्यंत्रितोव्योजंसावृत्रंविपर्वमर्दयंत् ॥ ७ ॥ अन्विदत् ॥
अन्विदंनुमतेत्वम्मन्यांसैशञ्चंनस्कृधि ॥ क्रत्वेदक्षांयनोहिनुप्रणऽ
आयूंषिपितारिषः ॥ ८ ॥ शतम् १८०० अनुंनः ॥ अनुंनोद्यानुंम
तिर्य्यज्ञन्देवेषुंमन्यताम् ॥ अग्निश्चंहव्यवाहंनोभवंतन्दाशुषेम

यं÷ ॥ ९ ॥ सिनीवालिपृथुष्टुके ॥ सिनीवालिपृथुष्टुकेयादेवानाम
सिस्वसां ॥ जुषस्वहव्यमाहुतम्प्रजान्देविदिदिड्ढिनः ॥ १० ॥ [१]
पञ्चनद्यः ॥ पञ्चनद्यःसरस्वतीमपियन्तिसस्रोतसः ॥ सरस्वतीतु
पञ्चधासोदेशेभवत्सरित् ॥ ११ ॥ त्वमग्ने । प्रथमोऽअङ्गिराऽऋ
षिर्देवोदेवानामभवःशिवःसखा ॥ तवव्रतेकवयोविद्मनापसोजा
यन्तमरुतोभ्राजदृष्टयः ॥ १२ ॥ त्वन्नः ॥ त्वन्नोऽअग्नेतवदेवपा
युभिर्म्मघोनोरक्षतन्वश्चवन्द्य ॥ त्रातातोकस्यतनयेगवामस्यनि

संहि.
॥ ९९ ॥

मेषुहरक्षमाणस्तवंव्रते ॥ १३ ॥ उत्तानायामवं। भराचिकित्वान्स
द्यःप्रवीताव्वृषणञ्जजान ॥ अरुषस्तूपोरुशदस्यपाजऽइडायास्पु
त्रोव्वयुनेजनिष्ट ॥ १४ ॥ इडायास्त्वा। पदेव्वयन्नाभापृथिव्याऽअ
धि ॥ जातवेदोनिधीमह्यग्नेहव्यायवोढवे ॥१५॥ प्रमंन्महे। शव
सानायशूमाङ्गूषङ्गिर्व्वणसेऽअङ्गिरस्वत् ॥ सुवृक्तिभिस्तुवतऽऋ
ग्मियायाचमार्कन्नरेविश्श्रुताय ॥ १६ ॥ प्रवं÷ ॥ प्रवोमहेमहिन
मोभरध्वमाङ्गूष्यꣳशवसानायसाम ॥ येनानःपूर्व्वेपितरं÷पदज्ञाऽ

उ. अ.
॥ ३४ ॥
॥ ९९ ॥

अर्च्चन्तोऽअङ्गिरसोगाऽअविन्दन् ॥ १७॥ इच्छन्तित्वा । सोम्म्या
सꣳसखायꣳसुन्न्वन्तिसोमन्दधतिप्प्रयाꣳसि ॥ तितिक्षन्तेऽअभि
शस्तिञ्जनानामिन्द्रत्त्वदाकश्चनहिप्प्रकेतः ॥ १८॥ नतै । दूरेप
रमाचिद्रजाꣳस्यातुप्प्रयाहिहरिवोहरिब्भ्याम् ॥ स्त्थिरायव्वृष्ण्णेस
वनाकृतेमायुक्ताग्ग्रावाणः समिधानेऽअग्नौ ॥ १९॥ अषाढꣳयुत्सु
पृतनासुपप्प्रिꣳस्वर्षामप्प्सांव्वृजनस्यगोपाम् ॥ भरेषुजाꣳसुक्षि
तिꣳसुश्श्रवसञ्जयन्तन्त्वामनुमदेमसोम ॥ २० ॥ [१०] सोमो

धेनुम् ॥ सोमोधेनुꣳसोमोऽअर्वन्तमाशुꣳसोमोवीरङ्कर्म्मण्यन्द
दाति ॥ सादन्यंविदत्थ्यꣳसभेयम्पितृश्रवणंय्योददाशदस्मै ॥
॥ २१ ॥ त्वमिमाः ॥ त्वमिमाऽओषधीःसोमविश्वास्त्वमपोऽअ
जनयस्त्वङ्गाः ॥ त्वमाततन्थोर्व्वन्तरिक्षन्त्वञ्ज्योतिषाव्वितमोव्वव
र्त्थ ॥ २२ ॥ देवेननः ॥ देवेनंनोमनसादेवसोमरायोभागꣳसहसा
वन्नभियुद्ध्य ॥ मात्वातनदीशिषेव्वीर्य्यस्योभयेभ्यःप्रचिकित्सा
गविष्टौ ॥२३॥ अष्टौव्वि ॥ अष्टौव्व्यख्यत्ककुभःपृथिव्यास्त्रीधन्व

योजनासप्तासिन्धूंन् । हिरण्ण्याक्षश्संविताद्देवऽआगाद्दधद्रत्नां
दाशुषेव्वार्य्यांणि ॥ २४ ॥ हिरंण्ण्यपाणिःसविता । व्विचंर्षणिरुभे
द्यावांपृथिवीऽअन्तरींयते ॥ अपामींवाम्बाधंतेव्वेतिसूर्य्यंमभिकृ
ष्ष्णेनरजंसाद्यामृंणोति ॥ २५ ॥ हिरंण्ण्यहस्तोऽअसुंरः । सुनीथश्
सुंमृडीकश्स्ववांयात्वर्व्वाङ् ॥ अपसेधंन्रक्षसोंयातुधानानस्त्थांद्देवश्
प्प्रंतिदोषङ्गृंणानश् ॥ २६ ॥ येते ॥ येतेपन्थांःसवितःपूर्व्यासोंरेण
वःसुकृंताऽअन्तारिंक्षे ॥ तेभिंर्न्नोंऽअद्यपथिभिंःसुगेभीरक्षांचनोऽ

संहि. ॥१०१॥

अधिचब्रूहिदेव ॥ २७ ॥ उभापिबतम् ॥ उभापिबतमश्विनोभा
नःशर्म्मयच्छतम् ॥ अविद्रियाभिरूतिभिः ॥ २८ ॥ अप्नस्वती
मश्विना ॥ अप्नस्वतीमश्विनावाचमस्मेकृतन्नोदस्रावृषणामनी
षाम् ॥ अद्यूत्येवसेनिह्वयेवांवृधेचनोभवतंवाजसातौ ॥ २९ ॥ द्यु
भिरक्तुभिः ॥ द्युभिरक्तुभिःपरिपातमस्मानरिष्टेभिरश्विनासौ
भगेभिः ॥ तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीऽ
उतद्यौः ॥ ३० ॥ [१०] आकृष्णेन । रजसावर्त्तमानोनिवेशयन्न

उ. अ. ॥३४॥ ॥१०१॥

मृतम्मर्त्यैञ्च ॥ हिरण्ण्ययेनसवितारथेनादेवोयांतिभुवनानिपश्यं
न् ॥ ३१ ॥ आरांत्रि । पार्थिवꣳरजः पितुरंप्प्रायिधामंभिः ॥ दिवः
सदांꣳसिबृहतीविवितिष्ठसऽआत्त्वेषंवर्त्ततेतमः ॥ ३२ ॥ उषस्तत् ॥
उषस्ताच्चित्रमाभंरास्म्मभ्यंवाजिनीवति ॥ येनंतोकञ्चतनंयञ्चधा
मंहे ॥ ३३ ॥ प्रातरग्निम् ॥ प्रातरग्निम्प्रातरिन्द्रंꣳहवामहेप्प्रातर्म्मि
त्रावरुंणाप्प्रातरश्विनां ॥ प्रातर्भगंम्पूषणम्ब्रह्मणस्प्पतिम्प्रातः
सोमंमुतरुद्रꣳहुवेम ॥ ३४ ॥ प्रातर्ज्जितम्भगंम् ॥ प्रातर्ज्जितम्भगं

मुग्रꣳहुवेमव्वयम्पुत्रमदितेर्य्योविधर्त्ता ॥ आद्ध्रश्चिद्यम्मन्न्यमान
स्तुरश्चिद्राजाचिद्यम्भगम्भक्षीत्याह ॥ ३५ ॥ भगप्प्रणेतः ॥ भग
प्प्रणेतर्भगसत्यराधोभगेमान्धियमुदवाददन्नः ॥ भगप्प्रनोजन
यगोभिरश्वैर्भगप्प्रनृभिर्न्नृवन्तः स्याम ॥ ३६ ॥ उतेदानीम् ॥ उते
दानीम्भगवन्तः स्यामोतप्प्रपित्वऽउतमद्ध्येऽअन्हाम् ॥ उतोदिता
मघवन्त्सूर्य्यस्यव्वयन्देवानाꣳसुमतौस्याम ॥ ३७ ॥ भगऽएव ।
भगवाँ२ऽअस्तुदेवास्तेनव्वयम्भगवन्तः स्याम ॥ तन्त्वाभगसर्व्वऽइ

ज्जोहवीतिसनोभगपुरऽएताभवेह ॥ ३८ ॥ समध्वरायं ॥ समध्वरा
योषसोनमन्तदधिक्राविवशुचयेपदाय ॥ अर्व्वाचीनंव्वसुविदुम्भग
न्नोरथमिवाश्वावाजिनऽआवहन्तु ॥ ३९ ॥ अश्वावतीर्ग्गोमतीः ॥
अश्वावतीर्ग्गोमतीर्न्नऽउषासोवीरवतीःसदमुच्छन्तुभद्राः ॥ घृत
न्दुहानाव्विश्वतःप्रपीतायूयंपातस्वस्तिभिःसदानः ॥४०॥[१०॥]
पूषन्तवं । व्व्रतेव्वयन्नरिष्येमकदाचन ॥ स्तोतारस्तऽइहस्म्मसि ॥
॥ ४१ ॥ पथस्प्पथःपरिपतिम् ॥ पथस्प्पथःपरिपतिंव्वचस्याकामे

नकृतोऽअभ्यानडुर्क्कम् ॥ सनोरासच्छुरुधंश्चन्द्राग्ग्राधियंन्धि
यꣳसीषधातिप्प्रपूषा ॥ ४२ ॥ त्रीणिपदाविचंक्रमेविष्णुंग्गोपाऽ
अदाभ्यः ॥ अतोधर्म्माणिधारयंन् ॥ ४३ ॥ तद्विप्प्रासः ॥ तद्वि
प्प्रासोविपन्न्यवोजागृवाꣳसःसमिन्धते ॥ विष्णोर्य्यत्परमम्पद
म् ॥ ४४ ॥ घृतवंतीभुवनानाम् ॥ घृतवंतीभुवंनानामभिश्श्रियो
र्वीपृथ्वीमधुदुघेसुपेशसा ॥ द्यावापृथिवीव्वरुणस्यधर्म्मणाविष्कं
भितेअजरेभूरिरेतसा ॥ ४५ ॥ येनः सपत्नाऽअपतेभवन्त्विन्द्रा

ग्निभ्यामवंबाधामहेतान् ॥ वसंवोरुद्राऽआंदित्याऽउंपरिस्पृशं
म्मोग्ग्रञ्चेत्तांरमाधिराजमंक्रन् ॥ ४६ ॥ आनांसत्या । त्रिभिरेंका
दशैरिहदेवेभिंर्य्यातम्मधुपेयंमाश्विना ॥ प्रायुस्तारिष्टन्नीरपांꣳसि
मृक्षतꣳसेधंतन्द्वेषोभवंतꣳसचाभुवां ॥ ४७ ॥ एषवं÷ ॥ एषवस्तो
मोमरुतऽइयङ्गीर्म्मांदार्य्यस्यंमान्यस्यंकारोः ॥ एषयासिंष्ठतन्वे
वयाविद्यामेषंवृजनंञ्जीरदांनुम् ॥४८॥ सहस्तोमाꣳसहच्छंन्दसꣳ॥
सहस्तोमाꣳसहच्छंन्दसऽआवृतं÷सहप्प्रंमाऽऋषंयꣳसप्तदैव्यांꣳ ॥

पूर्व्वेषाम्पन्थामनुदृश्यधीराऽअन्वालेभिरेरत्थ्योनरश्म्मीन् ॥४९॥
आयुष्यंवर्च्चस्यम् ॥ आयुष्यंवर्च्चस्यꣳरायस्पोषमौद्भिदम् ॥
इदꣳहिरण्यंवर्च्चस्वज्जैत्रायाविशतादुमाम् ॥ ५० ॥ नतत् ॥ नत
द्रक्षांꣳसिनपिशाचास्तरन्तिदेवानामोजः प्प्रथमजꣳ ह्येतत् ॥
योबिभर्त्तिदाक्षायणꣳ हिरण्यꣳसदेवेषुकृणुतेदीर्ग्घमायुः समनु
ष्येषुकृणुतेदीर्ग्घमायुः ॥५१॥ यदाबध्नन् ॥ यदाबध्नन्दाक्षा
यणाहिरण्यꣳशतानीकायसुमनस्यमानाः ॥ तन्मऽआबध्नामि

शतशारदायायुष्मान्जरदष्टिर्य्यथासम् ॥ ५२ ॥ उतनः ॥ उत
नोहिर्बुध्न्यः शृणोत्वजऽएकपात्पृथिवीसमुद्रः ॥ विश्वेदेवाऽऋ
तावृधोहुवानाः स्तुतामन्त्राः कविशस्ताऽअवन्तु ॥ ५३ ॥ इमागि
रः ॥ इमागिरऽआदित्येभ्योघृतस्नूः सनाद्राजभ्योजुह्वाजुहो
मि ॥ शृणोतुमित्रोऽअर्य्यमाभगोनस्तुविजातोवरुणोदक्षोऽअं
शः ॥ ५४ ॥ सप्तऽऋषयः ॥ सप्तऽऋषयः प्रतिहिताः शरीरेस
प्तरक्षन्तिसदमप्रमादम् ॥ सप्तापः स्वपतोलोकमीयुस्तत्रजागृ

तोऽअस्वप्नजौसत्रसदौचदेवौ ॥ ५५ ॥ उत्तिष्ठब्रह्मणस्पतेदेवय
न्तस्त्वेमहे ॥ उपप्रयन्तुमरुतःसुदानवऽइन्द्रप्राशूर्भवासचा
॥५६॥ प्रनूनम्॥ प्रनूनम्ब्रह्मणस्पतिर्म्मन्त्रंवदत्युक्त्थम्॥यस्मि
न्निन्द्रोवरुणोमित्रोऽअर्य्यमादेवाऽओकांसिचक्रिरे ॥ ५७ ॥
ब्रह्मणस्पते ॥ ब्रह्मणस्पतेत्वमस्ययन्तासूक्तस्यबोधितनंयञ्जि
न्व ॥ विश्वन्तद्भद्रंय्यदवन्तिदेवाबृहद्वदेमविदथेसुवीराः ॥ यऽ
इमाविश्वाविश्वकर्म्मायोनःपितान्नपतेन्नस्यनोदेहि ॥ ५८ ॥

इतिश्रीवाजसनेयसंहितायांचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ श्रीवेद
पुरुषायनमः ॥ अनुवाकसूत्रम् ॥ अपेतोदशापाघंद्वादशद्वौद्वाविꣳ
शतिः ॥ हरिःॐ अपेतः ॥ अपेतोयन्तुपणयोसुम्नादेवपीयवंः ॥
अस्यलोकꣳसुतावंतꣳ ॥ द्युभिरहोभिरक्तुभिर्व्यक्तꣳयमोदंदात्वव
सानंमस्मै ॥ १ ॥ सवितातें ॥ सवितातेशरीरेभ्यꣳपृथिव्याँल्लोक
मिच्छतु ॥ तस्मैयुज्यन्तामुस्त्रियाꣳ ॥ २ ॥ वायुःपुंनातु । सवि
तापुंनात्वग्नेर्भ्राजंसासूर्य्यस्यवर्च्चसा ॥ विमुंच्यन्तामुस्त्रियाꣳ ॥

॥ ३ ॥ अ॒श्व॒त्थेव॑ः ॥ अ॒श्व॒त्थेवो॑नि॒षद॑नम्प॒र्णेवो॑व॒सति॑ष्कृ॒ता ॥ गो॒भाज॒ऽइत्किला॑सथ॒यत्स॒नव॑थ॒पूरु॑षम् ॥ ४ ॥ स॒वि॒ता॒ते॒ । शरी॑रा णिमा॒तुरु॒पस्त्थ॒ऽआव॑पतु ॥ तस्म्मै॑पृथिवि॒शम्भ॑व ॥५॥ प्र॒जाप॑तौ त्वा । दे॒वता॑या॒मुपो॑दकेलो॒केनिद॑धाम्म्यसौ ॥ अप॑नः॒शोशु॑चद॒घ म् ॥ ६ ॥ पर॑म्मृत्यो ॥ पर॑म्मृत्यो॒ऽअनु॒परे॑हि॒पन्था॑स्यस्ते॒ऽअन्य॒ऽ इत॒रोदे॒व॒याना॑त् चक्षु॑ष्म्मतेशृण्व॒तेते॑ब्रवीमि॒मान॑ःप्र॒जाᳪरी॑ ॥ रिषो॒मोतवी॒रान् ॥ ७ ॥ शंवा॑तः॒ । शᳪहि॑ते॒घृणि॑ःशन्ते॑भव॒न्त्वि

ष्टकाः ॥ शन्तेभवन्त्वग्नयःपार्त्थिवासोमात्वाभिशूशुचन् ॥ ८ ॥
कल्प्पन्तान्ते । दिशस्तुब्भ्यमापः शिवतमास्तुब्भ्यम्भवन्तुसिन्धं
वः ॥ अन्तरिक्षꣳशिवन्तुब्भ्यङ्कल्प्पन्तान्तेदिशःसर्व्वाः ॥ ९ ॥ अ
श्म्मन्न्वतीरीयतेसꣳरभद्ध्वमुत्तिष्ठतप्प्रतरतासखायः ॥ अत्राजही
मोशिवायेऽअसञ्छिवान्न्वयमुत्तरेमाभिव्वाजान् ॥ १० ॥ अपाघ
म् ॥ अपाघमपकिल्बिषमपकृत्यामपोरपः ॥ अपामार्गत्वमस्म्म
दपदुःष्वप्न्यꣳसुव ॥ ११ ॥ सुमित्रियानः ॥ सुमित्रियानऽआप

ओषधयःसन्तुदुर्म्मित्रियास्तस्म्मैसन्तुयोस्म्मान्द्वेष्टियञ्चव्वयन्द्वि
ष्म्मः ॥ १२ ॥ अनड्वाहमन्वारभामहेसौरभेयꣳस्वस्तये ॥ सनऽ
इन्द्रऽइवदेवेब्भ्योवह्निःसन्तारणोभव ॥१३॥ उद्वयम् ॥ उद्वयन्त
मसस्प्परिस्वःपश्श्यन्तऽउत्तरम् ॥ देवन्देवत्त्रासूर्य्यमगन्म्मज्ज्यो
तिरुत्तमम् ॥ १४ ॥ इमञ्जीवेब्भ्यः । परिधिन्दधामिमैषान्नुगाद
परोऽअर्त्थमेतम् ॥ शतञ्जीवन्तुशरदःपुरूचीरन्तर्म्मृत्युन्दधता
म्पर्व्वतेन ॥ १५ ॥ अग्नऽआयूꣳषि । पवसऽआसुवोर्ज्जमिषञ्चनः ॥

आ॒रेबा॑धस्वदु॒च्छुना॑म् ॥ १६ ॥ आयु॑ष्म्मानग्ने । ह॒विषा॑व्वृधा॒नोघृ॒
तप्प्र॑तीकोघृ॒तयो॑निरे॑धि ॥ घृ॒तम्पी॒त्वामधु॒चा॒रु॒गव्व्यं॑म्पि॒तेव॑पु॒त्रम॒
भिर॑क्षतादि॒मान्त्स्वाहा॑ ॥ १७ ॥ परी॒मे । गाम॑नेषत॒पर्य्य॒ग्निम॑हृ
षत ॥ दे॒वेष्व॑क्रत॒श्रवः॒कऽइ॒माँ२ऽआद॑धर्षति ॥ १८ ॥ क्र॒व्याद॑
म॒ग्निम् ॥ क्र॒व्याद॑म॒ग्निम्प्रहि॑णोमिदू॒रंय्य॒म॒राज्ज्यंग्गच्छतुरिप्प्रवा॒
हः ॥ इ॒हैवायमित॑रोजा॒तवे॑दादे॒वेभ्यो॑ह॒व्यंव्व॑हतु॒प्प्रजा॒नन् ॥ १९ ॥
व॒हंव्व॒पाम् ॥ व॒हंव्व॒पाञ्जा॑तवेदः॒पि॒तृभ्यो॒यत्रै॑ना॒न्वेत्थ॒निहि॑ता॒न्प

राके ॥ मेदंसऽकुल्याऽउपतान्त्स्रंवन्तुसत्याऽ ऐंषामाशिषऽसन्नं
मंताꣳस्वाहा ॥ २० ॥ स्योनापृथिवि । नोभवानृक्षरानिवेशनी ॥
यच्छानऽशर्म्मसप्प्रथाः ॥ अपनऽशोशुचदघम् ॥ २१ ॥ अस्मा
त्त्वम् ॥ अस्मात्त्वमधिजातोसित्त्वदयञ्जायतांपुनः ॥ असौस्व
र्गायलोकायस्वाहा ॥ २२ ॥ इतिश्रीवाजसनेयसंहितायांपञ्चत्रिं
शोऽध्यायः ॥ ३५ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ ऋ
चंवाचꣳषोडशद्यौःशान्तिरष्टौद्वौचतुर्विंꣳशतिः ॥ हरिःॐऋचं

व्वाच्चंम् ॥ ऋचंव्वाचम्प्रपंद्येमनोयजुःप्प्रपंद्येसामंप्प्राणम्प्रपंद्येचक्षुः
श्रोत्रम्प्रपंद्ये ॥ व्वागोजंःसहौजोमयिंप्प्राणापानौ ॥ १ ॥ यन्मे ।
छिद्रञ्चक्षुंषोहृदंयस्यमनंसोव्वातिंतृण्णम्बृहस्प्पतिंर्म्मेतद्दंधातु ॥
शन्नोंभवतुभुवंनस्ययस्प्पतिंः ॥२॥ भूर्ब्भुवंः ॥ भूर्ब्भुवःस्वःतत्सं
वितुर्व्वरेण्यम्भर्गोंदेवस्यंधीमहि॥धियोयोनंःप्प्रचोदयांत्॥३॥कया
नः ॥ कयांनश्चित्रऽआभुवदूतीसदावृंधःसखा ॥ कयाशचिंष्ठयावृ
ता ॥४॥ कस्त्वां । सत्योमदांनाम्मर्‌हिंष्ठोमत्सदन्धंसः॥ दृढाचिं

संहि. ॥१०९॥

दुारुजेवसु ॥५॥ अभीषुण॑ । सखीनामविताजरितॄणाम् ॥ शतम्भ
वास्यूतिभिः ॥ ६ ॥ कयात्वम् ॥ कयात्वन्नऽऊत्याभिप्रमन्दसेवृ
षन्॥कयांस्तोतृभ्यऽआभर॥७॥इन्द्रोविश्वस्यराजति । शन्नोऽअ
स्तुद्विपदेशञ्चतुष्प्पदे॥८॥शन्नोमित्रःशंवरुणःशन्नोभवत्वर्य्यमा ॥
शन्नऽइन्द्रोबृहस्प्पतिःशन्नोविष्णुरुरुक्रमः॥९॥शन्नोवातः । पव
ताᳪंशन्नस्तपतुसूर्य्यः ॥ शन्नःकनिक्रदद्देवःपर्ज्जन्योऽअभिवर्षतु
॥ १० ॥ अहानिशम् ॥ अहानिशम्भवन्तुनःशᳪंरात्रीःप्प्रतिधीय

उ. अ. ॥३६॥

॥१०९॥

ताम्॥ शन्नऽइन्द्राग्नीभवतामवोभिः॑शन्नऽइन्द्रावरुणारातहव्या ॥
शन्नऽइन्द्रापूषणावाजसातौशमिन्द्रासोमासुविताय शंय्योः ॥
॥११॥ शन्नः ॥ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंय्यो
रभिस्रवन्तुनः ॥१२॥ स्योनापृथिवि । नोभवानृक्षरानिवेशनी ॥
यच्छानःशर्म्मसप्रथाः ॥ १३ ॥ आपोहि । ष्ठामयोभुवस्तानऽ
ऊर्ज्जेदधातन ॥ महेरणायचक्षसे ॥ १४ ॥ योवः । शिवतमोरस
स्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ १५ ॥ तस्म्माऽअरं

म् ॥ तस्म्माऽअरंङ्गमामवोयस्यक्षयांयजिन्वंथ ॥ आपोंजनयंथा
चनः ॥ १६ ॥ [१६] द्यौःशान्तिः ॥ द्यौःशान्तिरन्तरिंक्षꣳशा
न्तिःपृथिवीशान्तिरापःशान्तिरोषंधयःशान्तिः ॥ वनस्पतंयः
शान्तिर्विश्वैदेवाःशान्तिर्ब्रह्मशान्तिः सर्वꣳशातिःशान्तिरेवशा
न्तिःसामाशान्तिरेधि ॥ १७ ॥ दृतेदृꣳहंमामित्रस्यंमाचक्षुंषास
र्वाणिभूतानिसमीक्षन्ताम् ॥ मित्रस्याहञ्चक्षुंषासर्वाणिभूतानिस
मीक्षे ॥ मित्रस्यचक्षुंषासमीक्षामहे ॥ १८ ॥ दृतेदृꣳहंमा ॥ ज्यो

त्क्कैसुन्दृशिंजीव्यासुञ्ज्योत्क्कैसुन्दृशिंजीव्यासम् ॥ १९ ॥ नम॑स्ते
हर॑से॒शोचिषे॒नम॑स्ते॒ऽअस्त्व॒र्चिषे॑ ॥ अ॒न्याँस्तेऽअ॒स्म्मत्त॑पन्तु॒हे॒त
यं॑÷पाव॒कोऽअ॒स्म्मभ्य॑ᳬ॑शि॒वोभ॑व ॥ २० ॥ नम॑स्ते । अस्तु॒वि॒द्यु
ते॒नम॑स्तेस्तनयि॒त्नवे॑ ॥ नम॑स्तेभगवन्नस्तु॒यत॑ᳬस्व॒÷स॒मीह॑से ॥२१॥
यतो॑यतᳬस॒मीह॑से॒ततो॑नो॒ऽअभ॑यङ्कुरु ॥ शन्न॑÷कुरु॒प्प्र॒जाभ्यो॒भ॑य
न्नᳬप॒शुभ्य॑÷ ॥२२॥ सु॒मि॒त्त्रि॒यान॒÷॥ सु॒मि॒त्त्रि॒यान॒ऽआप॒ऽओष॑ध
यᳬसन्तु॒दुर्म्मि॒त्त्रि॒यास्तस्म्मै॑सन्तु॒यो॒स्म्मान्द्द्वेष्टि॒यञ्च॑व॒यन्द्द्वि॒ष्म्मः

॥ २३ ॥ तच्चक्षुः ॥ तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येम शरदः शतञ्जीवेम शरदः शतᳬं शृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात् ॥ २४ ॥

[८] इतिश्रीवाजसनेयसंहितायां षट्त्रिंशोऽध्यायः ॥ ३६ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ देवस्यत्वादशयमायत्वैकादश द्वावेकविᳬंशतिः ॥ हरिः ॐ देवस्यत्वा । सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् ॥ आददेनारिरसि ॥१॥ युञ्जतेमनः ॥

युञ्जतेमनंऽउतयुंञ्जतेधियोविप्प्राविप्प्रंस्यबृहतोविंपश्चितंः ॥ वि
होत्राँदधेव्वयुनाविदेकऽइन्महीदेवस्यंसवितुःपरिंष्टुतिः ॥२॥ देवी
द्यावापृथिवी । मखस्यंवामद्यशिरोंराध्यासन्देवयजंनेपृथिव्व्याः ॥
मखायंत्वामखस्यंत्वाशीर्ष्णे ॥ ३ ॥ देव्व्योंवम्म्र्यः ॥ देव्व्योंवम्म्र्यो
भूतस्यंप्प्रथमजामखस्यंवोद्यशिरोंराध्यासन्देवयजंनेपृथिव्व्याः ॥
मखायंत्वामखस्यंत्वाशीर्ष्णे ॥ ४ ॥ शतम् १९०० ॥ इयत्यग्ग्रें ॥
इयत्यग्ग्रंऽआसीन्मखस्यंतेद्यशिरोंराध्यासन्देवयजंनेपृथिव्व्याः ॥

मुखायंत्वामुखस्यंत्वाशीर्ष्णे ॥ ५ ॥ इन्द्रस्यौजः ॥ इन्द्रस्यौजं
स्त्थमुखस्यंवोद्यशिरोराध्यासन्देवयजंनेपृथिव्याः ॥ मुखायंत्वा
मुखस्यंत्वाशीर्ष्णे ॥ मुखायंत्वामुखस्यंत्वाशीर्ष्णे ॥ मुखायंत्वा
मुखस्यंत्वाशीर्ष्णे ॥ ६ ॥ प्रैतु । ब्रह्मणस्प्पतिःप्प्रदेव्येतुसूनृता ॥
अच्छांवीरन्नर्य्यम्पङ्क्तिरांधसन्देवायज्ञन्नंयन्तुनः ॥ मुखायंत्वामु
खस्यंत्वाशीर्ष्णे ॥ मुखायंत्वामुखस्यंत्वाशीर्ष्णे ॥ मुखायंत्वामु
खस्यंत्वाशीर्ष्णे ॥ ७ ॥ मुखस्युशिरः ॥ मुखस्युशिरोसि ॥ मुखा

यंत्वामुखस्यंत्वाशीषर्णौ ॥ मुखस्यशिरोंसि ॥ मुखायंत्वामुखस्यं
त्वाशीषर्णौ ॥ मुखस्यशिरोंसि ॥ मुखायंत्वामुखस्यंत्वाशीषर्णौ ॥
मुखायंत्वामुखस्यंत्वाशीषर्णौ ॥ मुखायंत्वामुखस्यंत्वाशीषर्णौ ॥
मुखायंत्वामुखस्यंत्वाशीषर्णौ ॥ ८ ॥ अश्वंस्यत्वा । वृष्णंः शक्का
धूंपयामिदेवयजंनेपृथिव्याः ॥ मुखायंत्वामुखस्यंत्वाशीषर्णौ ॥
अश्वंस्यत्वावृष्णंःशक्काधूंपयामिदेवयजंनेपृथिव्याः ॥ मुखायं
त्वामुखस्यंत्वाशीषर्णौ ॥ अश्वंस्यत्वावृष्णंःशक्काधूंपयामिदेवय

संहि. ॥११३॥

जंनेपृथिव्याः ॥ मुखायंत्वामुखस्यंत्वाशीष्ष्णें ॥ मुखायंत्वामुख
स्यंत्वाशीष्ष्णें ॥ मुखायंत्वामुखस्यंत्वाशीष्ष्णें ॥ मुखायंत्वामुख
स्यंत्वाशीष्ष्णें ॥ ९ ॥ ऋजवैत्वा । साधवैत्वासुक्षित्यैत्वा ॥ मुखा
यंत्वामुखस्यंत्वाशीष्ष्णें ॥ मुखायंत्वामुखस्यंत्वाशीष्ष्णें ॥ मुखा
यंत्वामुखस्यंत्वाशीष्ष्णें ॥ १० ॥ [१०] यमायंत्वा । मुखायंत्वा
सूर्य्यस्यत्वातपंसे ॥ देवस्त्वांसवितामद्ध्वांनक्तुपृथिव्याःसꣳस्पृशं
स्पाहि ॥ अर्च्चिरंसिशोचिरंसितपोसि ॥ ११ ॥ अनाधृष्टापुरस्तां

उ. अ. ॥३७॥ ॥११३॥

त् ॥ अनाधृष्टापुरस्तादग्नेराधिपत्यऽआयुर्म्मेदाः पुत्रवतीदक्षिण
तऽइन्द्रस्याधिपत्येप्रजाम्मेदाः सुखदापश्चाद्देवस्यसवितुराधिप
त्येचक्षुर्म्मेदाऽआश्रुतिरुत्तरतोधातुराधिपत्येरायस्पोषम्मेदाः ॥
विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्यऽ ओजोमेदाविश्वाभ्योमाना
ष्ट्राभ्यस्पाहिमनोरश्वासि ॥ १२ ॥ स्वाहामरुद्भिः । परिश्रीय
स्वादिवःसथंस्पृशस्पाहि ॥ मधुमधुमधु ॥ १३ ॥ गर्ब्भोदेवानाम् ॥
गर्ब्भोदेवानाम्पितामतीनाम्पतिःप्रजानाम् ॥ सन्देवोदेवेनस

संहि.
॥११४॥

वि॒त्रागंतस॑ᳫं सू॒र्य्यैणरोचते ॥ १४ ॥ सम॒ग्निः ॥ सम॒ग्निर॒ग्निनांगत॒
सन्दैवेनसवि॒त्रास॑ᳫं सू॒र्य्यैणारोचिष्ट ॥ स्वाह॒ासम॒ग्निस्तपंसागतस
न्दैव्येनसवि॒त्रास॑ᳫंसू॒र्य्यैणारूरुचत ॥१५॥ धु॒र्त्तादि॒वः ॥ धु॒र्त्तादि॒
वोविभांति॒तपंसस्पृथि॒व्यान्धु॒र्त्तादे॒वोदे॒वाना॒मम॑र्त्यस्तपो॒जाः ॥ वा
चंम॒स्म्मेनियंच्छदे॒वा॒युवंम् ॥ १६ ॥ अपंश्यय॒ज्ञो॒पाम् ॥ अपंश्यय॒ज्ञो॒
पामनिंपद्यमान॒माच॒परांचप॒थिभि॒श्चरंन्तम् ॥ ससध्रीची॒ᳫंसवि
षूंची॒र्व्वसांन॒ऽआवंरीवर्त्ति॒भुवंनेष्ष्वन्तः ॥१७॥ विश्वांसाम्भुवाम् ॥

ए. अ.
॥ ३७ ॥
॥११४॥

विश्वांसाम्भुवाम्पते॒व्विश्वंस्यमनसस्प्पते॒व्विश्वंस्यव्वचसस्प्पते॒सर्वंस्यव्व
चसस्प्पते ॥ दे॒वश्श्रुत्वन्दे॑वघर्म्मदे॒वोदे॒वान्पा॒ह्यत्र॒प्प्राची॒रनुंवान्दे॒
ववीतये ॥ मधु॒मान्द्धींभ्या॒म्मधु॒माधूंचीभ्याम् ॥ १८ ॥ हृ॒दे
त्वा॒मनंसेत्वादि॒वेत्वा॒सूर्य्यायत्वा ॥ ऊ॒र्द्ध्वोऽअंद्ध्व॒रन्दि॒विदे॒वेपुंधे
हि ॥ १९ ॥ पि॒तानंः ॥ पि॒तानोसिपि॒तानोबोधि॒नमंस्तेऽअस्तु॒मा
मांहिꣳसीः ॥ त्वष्टृंमन्तस्त्वासपेमपु॒त्रान्प॒शून्मयिंधेहि॒प्प्र॒जाम्
स्म्मासुंधेह्यरिष्ट्टाहꣳसु॒हपंत्याभूयासम् ॥ २० ॥ अहंःकेतु॒ना ।

जुषताᳪंसुज्ज्योतिर्ज्ज्योतिषाᳪंस्वाहा ॥ रात्रिः केतुनाजुषताᳪंसु
ज्ज्योतिर्ज्ज्योतिषाᳪंस्वाहा ॥ २१ ॥ [११] इतिश्रीवाजसनेयसंहिता
यासप्तत्रिंशोऽध्यायः ॥ ३७ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥
देवस्यत्वाष्टौयमायत्वाक्षत्रस्यत्वादशकौत्रयोष्टाविᳪंशतिः ॥ हरिः
ॐ देवस्यत्वा । देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ता
भ्याम् ॥ आददेदित्यैरास्नासि ॥ १ ॥ इडऽएहि ॥ इडएह्यदितऽ
एहिसरस्वत्येहि ॥ असावेह्यसावेह्यसावेहि ॥ २ ॥ अदित्यैरास्नासी

न्द्राण्याऽउष्णीषं॑ ॥ पूषासिघर्म्मायदीष्व ॥३॥ अश्विभ्यांम्पि
न्वस्वसरस्वत्यैपिन्वस्वेन्द्रांयपिन्वस्व ॥ स्वाहेन्द्रंवत्स्वाहेन्द्रंवत्स्वा
हेन्द्रंवत् ॥४॥ यस्ते । स्तनं॑शशयोयोमंयोभूर्यौरत्नधावंसुविद्धं॑
सुदत्रं॑ ॥ येनविश्वापुष्यंसिवार्य्याणिसरस्वातितमिहधातवेकः ॥
उर्वन्तरिक्षमन्वेमि ॥ ५ ॥ गायत्रञ्छन्दं॑ ॥ गायत्रञ्छन्दोसि
त्रैष्टुभञ्छन्दोसिद्यावांपृथिवीभ्यांत्वापरिंगृह्णाम्म्यन्तरिक्षेणोपं
यच्छामि ॥ इन्द्राश्विनामधुंनःसारघस्यंघर्म्मम्पातव्वसंवोयजत

वाट् ॥ स्वाहा सूर्य्यस्य रश्मये वृष्टिवनये ॥ ६ ॥ समुद्राय त्वा । वा
ताय स्वाहा सरिराय त्वा वाताय स्वाहा ॥ अनाधृष्याय त्वा वाताय
स्वाहा प्रतिधृष्याय त्वा वाताय स्वाहा ॥ अवस्यवे त्वा वाताय स्वा
हा शिमिदाय त्वा वाताय स्वाहा ॥ ७ ॥ इन्द्राय त्वा । वसुमते रुद्रव
ते स्वाहेन्द्राय त्वादित्यवते स्वाहेन्द्राय त्वाभिमातिघ्ने स्वाहा ॥ सवि
त्रे त्वाऽ ऋभुमते विभुमते वाजवते स्वाहा बृहस्पतये त्वा विश्वदेव्या
वते स्वाहा ॥ ८ ॥ [८] यमाय त्वाङ्गिरस्वते पितृमते स्वाहा ॥ स्वाहा

घर्म्मायस्वाहाघर्म्मःपित्रे ॥ ९ ॥ विश्वाऽआशाः ॥ विश्वाऽआशा
दक्षिणसद्विश्वान्देवानयाडिह ॥ स्वाहाकृतस्यघर्म्मस्यमधोःपिब
तमश्विना ॥ १० ॥ दिविधाः ॥ दिविधाऽइमंयज्ञमिमंयज्ञन्दि
विधाः ॥ स्वाहाग्नयेयज्ञियायशंयजुर्भ्यः ॥ ११ ॥ अश्विनाघ
र्म्मम् ॥ अश्विनाघर्म्मम्पातꣳहार्द्दानमहर्द्दिवाभिरूतिभिः ॥ तन्त्रा
यिणेनमोद्यावापृथिवीभ्याम् ॥ १२ ॥ अपातामश्विना । घर्म्म
मनुद्यावापृथिवीऽअमꣳसाताम् ॥ इहैवरातयःसन्तु ॥ १३ ॥ इषे

पिन्वस्व ॥ इषेपिन्वस्वोर्जेपिन्वस्वब्रह्मणेपिन्वस्वक्षत्रायपिन्वस्व
द्यावापृथिवीभ्याम्पिन्वस्व ॥ धर्म्मासिसुधर्म्मामेन्यस्म्मेनृम्णानि
धारयब्रह्मधारयक्षत्रन्धारयविशन्धारय ॥ १४ ॥ स्वाहापूष्णे
शरसेस्वाहाग्ग्रावभ्यःस्वाहाप्प्रतिरवेभ्यः ॥ स्वाहापितृभ्यऽऊ
र्द्ध्वबर्हिभ्योघर्म्मपावभ्यःस्वाहाद्यावापृथिवीभ्याᳪस्वाहाविश्वे
भ्योदेवेभ्यः ॥ १५ ॥ स्वाहारुद्राय । रुद्रहूतयेस्वाहासञ्ज्योति
षाज्ज्योतिः ॥ अहःकेतुनाजुषताᳪसुज्ज्योतिर्ज्योतिषास्वाहा ॥

रात्रिं॑ केतुना॑जुषता॒ᳪं॑सु॒ज्ज्योति॒ज्ज्यो॑तिषा॒स्वाहा॑ ॥ मधु॑हु॒तमि
न्द्र॑तमेऽ अ॒ग्नाव॒श्याम॑ तेदेव घर्म्म॒नम॑स्तेऽ अस्तु॒मामा॑हिᳪ॑सीः ॥
॥ १६ ॥ अ॒भी॒मम् ॥ अ॒भी॒मम्म॑हि॒मादिवं॒विप्प्रो॑बभूवस॒प्प्रथाः॑ ॥
उ॒तश्श्रव॑साप॒ृथि॒वीᳪं॑सᳪं॑सीद॑स्वम॒हाँ २ अ॑सि॒रोच॑स्वदे॒ववी॑तमः ॥
विधू॒मम॑ग्नेऽअरु॒षम्मि॑येद्ध्यसृ॒जप्प्र॑शस्तद॒र्श॒तम् ॥ १७ ॥ याते॑
घर्म्म॑दि॒व्याशु॒ग्ग्यागा॑य॒त्र्याᳪं॑हवि॒र्द्धाने॑ ॥ सात॒ऽआप्प्या॑यता॒न्नि
ष्ट्या॑यता॒न्तस्यै॑ते॒स्वाहा॑ ॥ याते॑घर्म्मा॒न्तरि॑क्षे॒शु॒ग्ग्यात्रि॒ष्टुब्भ्या

सं ५४

ग्नीध्रे ॥ सातऽआप्प्यायतान्निष्ट्यायतान्तस्यैतेस्वाहा ॥ यातेघर्म्म
पृथिव्याᳬंशुग्ग्याजगत्याᳬंसदस्या ॥ सातऽआप्प्यायतान्निष्ट्या
यतान्तस्यैतेस्वाहा ॥ १८ ॥ [१०] क्षत्रस्यत्वा । परस्पायब्ब्रह्मण
स्तन्वम्पाहि ॥ विशस्त्वाधर्म्मणाव्वयमनुक्रामामसुवितायनव्यसे
॥ १९ ॥ चतुः स्त्रक्तिर्न्नाभिः ॥ चतुः स्त्रक्तिर्न्नाभिर्ऋतस्यसप्प्रथाः
सनोविश्वायुः सप्प्रथाः सनः सर्व्वायुः सप्प्रथाः ॥ अपद्वेषोऽअपह्व
रोन्न्यव्व्रतस्यसश्चिम ॥ २० ॥ घर्म्मैतत् ॥ घर्म्मैतत्तेपुरीषन्तेनव्व

द्धंस्वचाचंप्प्यायस्व ॥ व्वर्द्धिषीमहिंचव्वयमाचंप्प्यासिषीमहि ॥
॥ २१ ॥ अचिंक्रदद्वृषाहरिर्म्महान्मित्रोनदर्शतः ॥ सꣳसूर्य्येणदि
द्युतदुदधिर्न्निधीः ॥ २२ ॥ सुमित्रियानः ॥ सुमित्रियानऽआपऽ
ओषंधयःसन्तुदुर्म्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चव्वयन्द्वि
ष्म्मः ॥ २३ ॥ उद्वयम् ॥ उद्वयन्तमंसस्प्परिस्वःपश्यंन्तऽउत्तर
म् ॥ देवन्देवत्त्रासूर्य्यमगन्म्मज्योतिरुत्तमम् ॥ २४ ॥ एधोसि ॥
एधोस्येधिषीमहिसमिदसितेजोसितेजोमयिधेहि ॥ २५ ॥ याव

तीद्यावांपृथिवी । यावंच्चसुप्तसिन्धंवोवितस्त्थुरे ॥ तावंन्तमिन्द्र
तेग्ग्रहंमूर्ज्जागृंह्णाम्म्यक्षितम्मयिगृह्णाम्म्याक्षितम् ॥ २६ ॥ मयित्य
त् ॥ मयित्यदिंन्द्रियम्बृहन्मयिदक्षोमयिक्रतुंः ॥ घर्म्मस्त्रिशुग्ग्वि
रांजतिव्विराजाज्ज्योतिंषासहब्रह्मंणातेजंसासह ॥ २७ ॥ पयंसो
रेतंः ॥ पयंसोरेतऽआभृंतन्तस्यदोहंमशीमह्युत्तंरामुत्तराᳪंसमा
म् ॥ त्विषंः संवृक्क्त्वेदक्षंस्यतेसुषुम्मणस्यंतेसुषुम्मणाग्निहुतः ॥ इन्द्र
पीतस्यप्प्रजापंतिभक्षितस्यमधुंमतऽ उपंहूतऽउपंहूतस्यभक्षया

मि ॥२८॥ [१० ॥ इतिश्रीवाजसनेयसंहितायाअष्टत्रिंशोऽध्यायः
॥ ३८ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ स्वाहाप्राणेभ्यः
षडुग्रश्चसप्तद्यौत्रयोदश ॥ हरिः ॐ स्वाहांप्प्राणेभ्यः ॥ स्वाहांप्प्रा
णेभ्यःसाधिपतिकेभ्यः ॥ पृथिव्यैस्वाहाग्नयेस्वाहान्तरिक्षाय
स्वाहांव्वायवेस्वाहां ॥ दिवेस्वाहासूर्य्यायस्वाहां ॥ १ ॥ दिग्भ्यःस्वा
हां । चन्द्रायस्वाहानक्षत्रेभ्यःस्वाहाद्भ्यःस्वाहाव्वरुणायस्वाहां ॥
नाभ्यैस्वाहांपूतायस्वाहां ॥ २ ॥ व्वाचेस्वाहां । प्प्राणायस्वाहांप्प्रा

णायस्वाहा ॥ चक्षुषेस्वाहाचक्षुषेस्वाहाश्श्रोत्रायस्वाहाश्श्रोत्राय
स्वाहा ॥ ३ ॥ मनसꣳकामम् ॥ मनसꣳकाममाकूतिंव्वाचःसत्यम
शीय ॥ पशूनाꣳरूपमन्नस्यरसोयशꣳश्रीःश्रयताम्मयिस्वाहा ॥
॥ ४ ॥ प्रजापतिꣳसम्भ्रियमाणꣳसम्म्राट्सम्भृतोव्वैश्वदेवःसꣳसन्नो
घर्म्मःप्रवृक्तस्तेजऽउद्यतऽआश्विनः पयस्यानीयमानेपौष्णोव्वि
ष्यन्दमानेमारुतःक्लथन् ॥ मैत्रःशरसिसन्ताय्यमानेव्वायव्योह्रि
यमाणऽआग्नेयोहूयमानोव्वाग्घुतः ॥ ५ ॥ सविताप्प्रथमे । हन्नग्नि

द्वितीयेंव्वायुस्तृतीयंऽआदित्यश्चतुर्थेचन्द्रमाः पञ्चमऽऋतुःषष्ठेम
रुतः सप्तमेबृहस्पतिरष्टमेमित्रोनवमेवरुणोदशमऽइन्द्रऽएका
दशेविश्वेदेवाद्वादशे ॥ ६ ॥ उग्रश्च । भीमश्चध्वान्तश्चधुनिश्च ॥
सासह्वाँश्चाभियुग्वाचंव्विक्षिपः स्वाहा ॥ ७ ॥ अग्निँ हृदयेन ॥
अग्निँ हृदयेनाशनिँ हृदयाग्ग्रेणपशुपतिङ्कृत्स्नहृदयेनभवंय्य
क्ना ॥ शर्वम्मतस्नाभ्यामीशानम्मन्न्युनामहादेवमन्तः पर्शव्ये
नोग्ग्रन्देवंव्वनिष्ठुनांव्वसिष्ठहनुः शिङ्गीनिकोश्याभ्याम् ॥ ८ ॥

उग्रंल्लोहितेनमित्रꣳसौव्व्रत्येनरुद्रन्दौर्व्व्रत्येनेन्द्रम्प्रक्रीडेनमरुतो
बलेनसाध्यान्प्रमुदा ॥ भवस्यकण्ठ्यꣳरुद्रस्यान्तःपार्श्व्यम्महा
देवस्ययकृच्छर्व्वस्यवनिष्ठुःपशुपतेःपुरीतत् ॥ ९ ॥ लोमंब्भ्यःस्वा
हा । लोमंब्भ्यःस्वाहात्वचेस्वाहात्वचेस्वाहालोहितायस्वाहालोहि
तायस्वाहामेदोब्भ्यः स्वाहामेदोब्भ्यःस्वाहामाꣳसेब्भ्यःस्वाहा
माꣳसेब्भ्यःस्वाहास्नावंब्भ्यःस्वाहास्नावंब्भ्यःस्वाहास्त्थब्भ्यः
स्वाहास्त्थब्भ्यःस्वाहामज्जब्भ्यः स्वाहामज्जब्भ्यःस्वाहा ॥ रेतं

सेस्वाहापायवेस्वाहा ॥ १० ॥ आयासायस्वाहा । प्प्रायासायस्वाहा
संय्यासायस्वाहाव्वियासायस्वाहोद्यासायस्वाहा ॥ शुचेस्वाहाशोचं
तेस्वाहाशोचंमानायस्वाहाशोकायस्वाहा ॥ ११ ॥ तपसेस्वाहा । त
प्प्यंतेस्वाहातप्प्यंमानायस्वाहातप्प्तायस्वाहाघर्म्मायस्वाहा ॥ नि
ष्कृत्यैस्वाहाप्प्रायश्चित्यैस्वाहाभेषजायस्वाहा ॥१२॥ यमायस्वा
हा ॥ यमायस्वाहान्तकायस्वाहामृत्यवेस्वाहा ॥ ब्रह्मणेस्वाहाब्रह्मह
त्यायैस्वाहाव्विश्वेभ्योदेवेभ्यःस्वाहाद्यावापृथिवीभ्यांᳬस्वाहा

॥१३॥ इतिश्रीवाजसनेयसंहितायांएकोनचत्वारिंशतितमोऽध्या
यः ॥ ३९ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ ईशावास्यम
ष्टावंधंतमोनवद्वैसप्तदश ॥ हरिःॐ ईशावास्यम् ॥ ईशावास्यमि
दꣳसर्व्वंय्यत्किञ्चजगंत्याञ्जगंत् ॥ तेनंत्यक्तेनंभुञ्जीथामागृधꣳक
स्यंस्विद्धनंम् ॥ १ ॥ कुर्वन्नेव ॥ कुर्वन्नेवेहकर्म्माणिजिजीविषेच्छतꣳ
समाः ॥ एवन्त्वयिनान्यथेतोस्तिनकर्म्मलिप्प्यतेनरे ॥ २ ॥ असु
र्य्यानाम् । तेलोकाऽअन्धेनतमसावृताः ॥ ताँस्तेप्रेत्यापिगच्छ

न्तियेकेचात्महनोजनाः ॥ ३ ॥ अनेयदेकम् ॥ अनेयदेकम्मनं
सोजवीयोनैनंद्देवाऽआंप्नुवन्पूर्व्वमर्शत् ॥ तद्धावंतोन्यानत्यैतिति
ष्ठत्तस्मिन्नपोमांतरिश्वांदधाति ॥ ४ ॥ तदेजति । तन्नैजंतितद्दूरेत
द्वंन्तिके ॥ तदन्तरंस्यसर्व्वस्यतदुसर्व्वस्यास्यबाह्यतः ॥५॥ यस्तु ॥ य
स्तुसर्व्वाणिभूतान्यात्मन्न्येवानुपश्यंति ॥ सर्वभूतेषुंचात्मानन्ततो
नविचिंकित्सति ॥ ६ ॥ यस्मिन्त्सर्व्वाणिभूतान्यात्मैवाभूंद्विजान
तः ॥ तत्रकोमोहःकः शोकंऽएकत्त्वमंनुपश्यंतः ॥७॥ सपरिं॥सप

र्य्यगाच्छुक्रमकायमव्रणमस्नाविरꣳशुद्धमपापविद्धम् ॥ कविर्म्म
नीषीपरिभूः स्वयम्भूर्य्याथातत्थ्यतोर्थान्व्यदधाच्छाश्वतीभ्यः
समाभ्यः ॥ ८ ॥ अन्धन्तमः । प्रविशन्तियेसम्भूतिमुपासते ॥
ततोभूयइवतेतमोयउसम्भूत्याꣳरताः ॥ ९ ॥ अन्यदेव ॥ अ
न्यदेवाहुःसम्भवादन्यदाहुरसम्भवात् ॥ इतिशुश्रुमधीराणांये
नस्तद्विचचक्षिरे ॥ १० ॥ सम्भूतिञ्च । विनाशञ्चयस्तद्वेदोभयꣳ
सह ॥ विनाशेनमृत्युन्तीर्त्त्वासम्भूत्यामृतमश्नुते ॥ ११ ॥ अन्ध

न्तमः । ष्प्रविशंतियेविंद्यामुपासंते ॥ ततोभूयंऽइवतेतमोयऽउवि
द्यायांॅरताः ॥ १२ ॥ अन्यदेव ॥ अन्यदेवाहुर्व्विंद्यायांऽअन्यदा
हुरविंद्यायाः ॥ इतिशुश्रुमधीरांणाय्येनस्तद्विंचचक्षिरे ॥ १३ ॥
व्विद्याञ्च ॥ व्विद्याञ्चाविंद्याञ्चयस्तद्वेदोभयंॅसह ॥ अविंद्ययामृत्यु
न्तीर्त्वाविद्ययामृतंमश्नुते ॥ १४ ॥ व्वायुरनिंलम् ॥ व्वायुरनिंलम्
मृतमथेदम्भस्मांन्तᳩशरीरम् ॥ ॐ३क्रतोस्मर ॥ क्लिबेस्मर ॥
कृतंॅस्मर ॥ १५ ॥ अग्नेनयं ॥ सुपथांरायेऽअस्म्मान्विश्वांनिदे

वव्युनानिविद्वान् ॥ युयोध्यस्मज्जुहुराणमेनोभूयिष्ठान्तेनमउक्तिम्विधेम ॥१६॥ हिरण्मयेनपात्रेण । सत्यस्यापिहितम्मुखम् ॥ योसावादित्येपुरुषःसोसावहम् ॥ १७ ॥ ॐ३ ॥ खम्ब्रह्म ॥ १८ ॥

इतिश्रीवाजसनेयसंहितायांचत्वारिंशत्तमोऽध्यायः ॥ ४० ॥

॥ श्रीवेदपुरुषार्पणमस्तु ॥ ॥ दशाध्यायेसमाख्यातानुवाकाः सर्व संख्यया ॥ शतंदशानुवाकाश्चनवान्येचमनीषिभिः ॥ १ ॥ सप्तष ष्टिश्चितोज्ञेयासौत्रेद्वाविंशतिस्तथा ॥ अश्वएकोनपंचाशत्पंचत्रिं

शत्खिलेस्मृताः ॥ २ ॥ शुक्रियेषुतुविज्ञेयाएकादशमनीषिभिः ॥
एकीकृत्यसमाख्यातंत्रिशतंत्र्यधिकंमतं ॥ ३ ॥ इतिश्रीवाजसने
यसंहितायामनुवाकःसमाप्तः ॥ ॥ ॥ ॥ ॥ ॥

इदं पुस्तकं मोहमय्यां निर्णयसागरयंत्रालयाधिपतिना स्वकीये मुद्रणालये
मुद्रापितम् ॥ तच्च न्यग्रोध [वलसाड] पुरनिवासिना शुक्ल-
कल्याणजीतनुजवल्लभरामेण संशोधितम् ॥
संवत् १९७१ शकाब्दाः १८३७

सन्मूलो यजुराख्यवेदविटपी जीयात् स माध्यंदिनीशाखा यत्र युगेंदुकांडसहिता यत्रास्थिता संहिता ॥
यत्राभ्राद्धिलता विभांति सरशैलार्केंदुभिर्ऋकृद्दलैः पंचाब्धीपुनभोंकवर्णमधुपैः खाग्न्यर्कगुंगुंजितैः ॥ १ ॥

इति श्रीवाजसनेयसंहिताउत्तरविंशतिः समाप्ता ॥

अथ याज्ञवल्क्यशिक्षा-प्रतिज्ञासूत्र-सर्वानुक्रम अनुवाकसूत्रप्रारम्भः ॥

॥ अथ याज्ञवल्क्यशिक्षाप्रारम्भः ॥

श्रीगणेशाय नमः ॥ ॥ अथातस्त्रैस्वर्यलक्षणं व्याख्यास्यामः ॥ उदात्तश्चानुदात्तश्च स्वरितश्च तथैव च ॥ लक्षणं वर्णयिष्यामि दैवतं स्थानमेव च ॥ १ ॥ शुक्लमुच्चं विजानीयान्नीचं लोहितमुच्यते ॥ श्यामं तु स्वरितं विंद्यादग्निमुच्चस्य दैवतम् ॥ २ ॥ नीचे सोमं विजानीयात्स्वरिते सविता भवेत् ॥ उदात्तं ब्राह्मणं विंद्यान्नीचं क्षत्रियमुच्यते ॥ ३ ॥ वैश्यं तु स्वरितं विंद्याद्भारद्वाजमुदात्तकम् ॥

नीचं गौतममित्याहुर्गार्ग्यं च स्वरितं विदुः ॥ ४ ॥ विंद्यादुदात्तं गायत्रं नीचं त्रैष्टुभमुच्यते ॥ जागतं स्वरितं विंद्यादत एवं नियो गतः ॥ ५ ॥ गांधर्ववेदे ये प्रोक्ताः सप्त षड्जादयः स्वराः ॥ त एव वेदे विज्ञेयास्त्रय उच्चादयः स्वराः ॥६॥ उच्चौ निषादगांधारौ नीचौ ऋषभधैवतौ ॥ शेषास्तु स्वरिता ज्ञेयाः षड्जमध्यमपंचमाः ॥ ॥ ७ ॥ षड्जो वेदे शिखंडिः स्यादृषभः स्यादजामुखे ॥ गवा रंभं ति गांधारं क्रौंचाश्चैव तु मध्यमम् ॥ ८ ॥ कौकिलः पंचमो ज्ञेयो

निषादं तु वदेद्गजः ॥ आश्वश्च धैवतो ज्ञेयः स्वराः सप्त विधीयते
॥ ९ ॥ निमेषमात्रः कालः स्याद्विद्युत्कालस्तथापरे ॥ अक्षरात्तुल्य
योगाच्च मतिः स्यात्सोमशर्मणः ॥ १० ॥ सूर्यरश्मिप्रतीकाशात्क
णिका यत्र दृश्यते ॥ अणवस्य तु सा मात्रा मात्रा च चतुराणवा
॥ ११ ॥ मानसे चाणवं विंद्यात्कंठे विंद्याद्विराणवम् ॥ त्रिराणवं
तु जिह्वाग्रे निःसृतं मात्रिकं विदुः ॥१२॥ अवग्रहे तु कालः स्या
दर्धमात्रा विधीयते ॥ पदयोरंतरे काल एकमात्रा विधीयते ॥

॥ १३ ॥ ऋचोर्द्धे तु द्विमात्रः स्यात्त्रिमात्रः स्याद्दगंतके ॥ रिक्तं तु
पाणिमुत्क्षिप्य द्वेमात्रे धारयेद्बुधः ॥१४॥ एकमात्रो भवेद्ध्रस्वो द्वि
मात्रो दीर्घ उच्यते ॥ त्रिमात्रस्तु प्लुतो ज्ञेयो व्यंजनं चार्द्धमात्रकम्
॥ १५ ॥ विवृतौ चावसाने च ऋचोर्द्धे च तथापरे ॥ पदे च पादसं
स्थाने शून्यहस्तं विधीयते ॥ १६ ॥ प्रणवं तु प्लुतं कुर्याद्व्याहृतीर्मा
तृका विदुः ॥ चापस्तु वदते मात्रां द्विमात्रां वायसोऽब्रवीत् ॥१७॥
शिखी वदति त्रिमात्रा मात्राणामिति संस्थितिः ॥ वर्णो जातिश्च

मात्रा च गोत्रं छंदश्च दैवतम् ॥ १८ ॥ एतत्सर्वं समाख्यातं याज्ञ
वल्क्येन धीमता ॥ हस्तौ तु संयतौ धार्यौ जानुभ्यामुपरि स्थितौ
॥ १९ ॥ गुरोरनुमतं कुर्यात्पठन्नान्यमतिर्भवेत् ॥ ऊरुभागे तृतीये
तु करं विन्यस्य दक्षिणं ॥ २० ॥ प्रसन्नमानसो भूत्वा किंचिन्निम्न
मधोमुखं ॥ प्रणवं प्राक् प्रयुंजीत व्याहृतीस्तदनंतरं॥ २१ ॥ सावि
त्रींचानुपूर्व्येण ततो वेदान् समारभेत् ॥ कूर्मोऽङ्गानीव संहृत्य चेष्टां
दृष्टिं दृढं मनः ॥२२॥ स्वस्थः प्रशांतो निर्भीतो वर्णानुच्चारयेद्बुधः॥

नाभ्याहन्यान्न निर्हन्यान्न गायेन्नैव कंपयेत् ॥ २३ ॥ यथैवोच्चार
येद्वर्णांस्तथैवैतान्समापयेत् ॥ निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनु
चिंतयेत् ॥२४॥ सममुच्चारयेद्वर्णान्हस्तेन च मुखेन च॥ स्वरश्चैव
तु हस्तश्च द्वावेतौ युगपद्भवेत् ॥ २५॥ हस्तभ्रष्टः स्वरभ्रष्टो न वेद
फलमश्नुते ॥ न करालो न लंबोष्ठो नाव्यक्तो नानुनासिकः॥ गद्गदो
बद्धजिह्वश्च न वर्णान्वक्तुमर्हति ॥ २६ ॥ प्रकृतिर्यस्य कल्याणी दं
तोष्ठौ यस्य शोभनौ ॥ प्रगल्भश्च विनीतश्च स वर्णान्वक्तुमर्हति

॥ २७ ॥ शंकितं भीतमुद्धृष्टमव्यक्तमनुनासिकं ॥ काकस्वरं मूर्द्धि
गतं तथा स्थानविवर्जितं ॥ २८ ॥ विस्वरं विरसं चैव विश्लिष्टं विष
माहतं ॥ व्याकुलं तालुहीनं च पाठदोषाश्चतुर्दश ॥ २९ ॥ संहिता
सारबहुलः पदसंज्ञासमाकुलः ॥ क्रमसंधिसमाकीर्णो दुस्तरो मंत्र
सागरः ॥ ३० ॥ ऋक्संहितां त्रिरभ्यस्य यजुषां वा समाहितः ॥ साम्नां
वा सरहस्यां च सर्वपापैः प्रमुच्यते ॥ ३१ ॥ संहिता नयते सूर्यं पदं
च शशिनः पदं ॥ क्रमश्च नयते सूक्ष्मं यत्तत्पदमनामयं ॥ ३२ ॥

कालिंदी संहिता ज्ञेया पदयुक्ता सरस्वती ॥ क्रमेणावर्त्तयेद्गंगा शंभोर्वाणी तु नान्यथा ॥३३॥ यथा महाऱ्हदं प्राप्य क्षिप्तो लोष्ठो विनश्यति ॥ एवं दुश्चरितं सर्वं वेदे त्रिवृति मज्जति ॥ ३४ ॥ आम्रपालाशबिल्वानामपामार्गशिरीषयोः ॥ वाग्यतः प्रातरुत्थाय भक्षयेद्दंतधावनं ॥ ३५ ॥ खदिरश्च कदंबश्च करवीरकरंजकौ ॥ एते कंटकिनः पुण्याः क्षीरिणस्तु यशस्विनः ॥ ३६ ॥ तेनास्यकरणे सूक्ष्मं माधुर्यं चैव जायते ॥ त्रिफला लवणाक्तेन भक्षयेच्छिष्य

कः सदा॥ क्षीणमेधाजनन्येषा स्वरवर्णकरी तथा ॥ ३७ ॥ हस्त
हीनं तु योऽधीते मंत्रं वेदविदो विदुः ॥ न साधयति यजूꣳषि भुक्त
मव्यंजनं यथा ॥३८॥ हस्तहीनंतु योऽधीते स्वरवर्णविवर्जितं ॥ ऋ
ग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥ ३९ ॥ ऋचो यजूꣳषि
सामानि हस्तहीनानि यः पठेत् ॥ अनृचो ब्राह्मणस्तावद्यावत्स्वारं
न विंदति ॥ ४० ॥ ज्ञातव्यश्च तथैवार्थो वेदानां कर्मसिद्धये ॥ पठ
न्मात्रापपाठात्तु पंके गौरिव सीदति ॥ ४१ ॥ स्वरवर्णप्रयुंजानो ह

स्तेनाधीतमाचरन् ॥ ऋग्यजुःसामभिः पूतो ब्रह्मलोकमवाप्नुयात्
॥ ४२ ॥ न कुर्वीत पदं दीर्घं न कुर्वीत विलंबितं ॥ पदस्य ग्रहमो
क्षौ च यथा शीघ्रगतिर्हयः ॥ ४३ ॥ आगमं कुरु यत्नेन कारणं
हि तदात्मकम् ॥ आस्येन च शयं कुर्यात्पठन्नान्यमतिर्भवेत् ॥
॥ ४४ ॥ न चास्य मुष्टिबंधी स्यान्नचात्युत्तममाचरेत् ॥ चुलुर्नौका
स्फुटोदंडी स्वतिको मुष्टिराकृतिः ॥ एते वै हस्तदोषाः स्युः परशु
श्चैव सप्तमः ॥ ४५ ॥ यथा वाणी तथा पाणी रिक्तं तु परिवर्जये

त् ॥ यत्र यत्र स्थिता वाणी पाणिस्तत्रैव तिष्ठति ॥ ४६ ॥ यथा
धनुष्यावितते शरे क्षिप्ते पुनर्गुणः ॥ स्वस्थानं प्रतिपद्येत तद्वद्धस्त
गतः स्वरः ॥ ४७ ॥ उत्तानं सोन्नतं किंचित्सुव्यक्तांगुलिरंजितं ॥
स्वरविद्धं करं कुर्यात्प्रादेशोद्देशगामिनं ॥ ४८ ॥ अंगुष्ठस्योत्तरे पर्वे
तर्जन्योपरि यद्भवेत् ॥ प्रादेशस्य तु सोद्देशस्तन्मात्रं चालयेत्करं
॥ ४९ ॥ मनुष्यतीर्थोच्चं कृत्वा पितृतीर्थोदकं व्रजेत् ॥ नामितं कर
पृष्ठे तु सुव्यक्तांगुलिमोक्षणं ॥५०॥ स्वरिते त्र्यंगुलं विंद्यान्निपाते

तु षडंगुलं ॥ उत्थाने तु नवांगुल्यमेतत्स्वरस्य लक्षणं ॥ ५१ ॥
अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम् ॥ शिष्याणामुपदे
शार्थं कुर्याद्वृत्तिं विलंबितां ॥ ५२ ॥ ऐंद्री तु मध्यमा वृत्तिः प्रा
जापत्या विलंबिता ॥ अग्निमारुतयोर्वृत्तिः सर्वशास्त्रेषु निंदिता
॥५३॥ मुष्ट्याकृतिर्मकारे तु नस्वारे तु नकाग्रतः ॥ अनुस्वारेंऽगुष्ठ
क्षेप ऊष्मांतेंऽगुलिमोक्षणं ॥ ५४ ॥ उदात्तं भुवि पातेन प्रचयं नो
ग्र एव च ॥ शेषं षडंगुलं विंद्यान्निचितं तु विधीयते ॥ ५५ ॥ षडं

गुलं तु जात्यस्य हस्तस्यानुपथस्य च ॥ तच्चतुर्भागमात्रं तु हस्त
स्तेनैव वर्तयेत् ॥ ५६ ॥ ककारांते टकारांते ङणे चांगुलिनामयेत् ॥
पंचांगुल्यमकोर च तकारे कुंडलाकृतिः ॥५७॥ऊर्ध्वक्षेपाच्च योष्मा
च अधः क्षेपाच्च यो भवेत् ॥ एकैकामुत्सृजेद्धीरः स्वरिते तूभयं
क्षिपेत् ॥ ५८ ॥ अंगुष्ठाकुंचनं लघ्वौ अनुस्वारे त्वपाꣳरसं ॥ दीर्घे
रंगे च तर्जन्याः प्रसारः परिकीर्तितः ॥ ५९ ॥ तर्जन्यंगुष्ठयोः स्प
र्शेप्युदात्तं प्रतिविद्यते ॥ नीचं तु मध्यमं कुर्याच्छेषं नीचतरं क

मात् ॥ ६० ॥ स्वरितं यद्भवेत्किंचिद्धकारसहसंयुतं ॥ ऊष्माणं तद्वि
जानीयान्निक्षिपेदुभयोरपि ॥ ६१ ॥ स्वरितसंज्ञे च निक्षिप्ते संयो
गो यत्र दृश्यते ॥ द्विमात्रिके भवेदेकमात्रिके तूभयं क्षिपेत् ॥
॥ ६२ ॥ जात्ये च स्वरिते चैव वकारो यत्र दृश्यते ॥ कर्तव्यस्तू
भयोः क्षेपो वायव्य इति दर्शनम् ॥ ६३ ॥ शृंगवद्वाथ वत्सस्य कु
मारीकुचयुगमवत् ॥ उभक्षेपस्वरो यत्र स विसर्ग उदाहृतः ॥६४॥
विसर्गांतस्वरो यत्र स्वरीतो यत्र दृश्यते ॥दीर्घश्चैव तुकारश्च तत्रोभ

क्षेप उच्यते ॥ ६५ ॥ त्रिविधस्तु भवेदूष्मा प्रचिता बलकातरा ॥
स्वरिते प्रचितां विद्यान्निपाते बलकां विदुः ॥ ६६ ॥ उत्थाने तु
तथा तारा एताभिस्त्रिभिरूष्मभिः ॥ मात्रामात्रा विदित्वा तु
ततः क्षेपं प्रयोजयेत् ॥ ६७ ॥ अक्षरं भजते काचित्काचिद्वृत्ते
प्रतिष्ठितं ॥ समाने जातिका काचित्काचिदूष्माप्रदायिका ॥६८॥
यथा बालस्य सर्पस्य उच्छ्वासो लघुचेतसः ॥ एवमूष्मा प्रयोक्तव्यो
हकारः परिवर्जितः ॥ ६९ ॥ विवृतिं प्रत्यया ऊष्मा प्रवदंति म

नीषिणः ॥ तामेव प्रतिषेधंति यथा आईऊएइति निदर्शनं ॥७०॥
अष्टौ स्वरान्प्रवक्ष्यामि तेषामेव तु लक्षणं ॥ जात्योभिनिहितक्षै
प्रः प्रश्लिष्टश्च तथापरः ॥ ७१ ॥ पादवृत्तस्तथा भाव्य इतिस्वराः ॥
एकपदे नीचपूर्वः सयवोजात्यः ॥ एकपदइत्याह ॥ ७२ ॥ नीच
पूर्वः सयकारवकारौ वा जात्यः स्वरितो भवति ॥ यथाजात्यं मनु
ष्यानिति सुध्येति चम्वीव धान्यम् कन्या इव स्वः वीर्यं एवꣳह्या
ह यानि चान्यानीदृग्लक्षणानि पदानि भवंति ॥ एओ आभ्यामु

दात्ताभ्यामकारोरिफितश्च यः ॥ अकारो यत्र लुप्येत तं चाभिनि
हितं विदुः ॥७३॥ यथा कुक्कुटः-असि कुक्कुटोसि ॥ वेदः-असि वे
दोसि॥ भागः-असि भागोसि ॥ मारुतः-असि मारुतोसि ॥ श्वात्रः-
असि श्वात्रोसि ॥ तेअप्सरसाम्-तेप्सरसाम् ॥ ते-अवंतु तेवंतु ॥
कः-असि कोसि ॥ सः-अहं सोहं ॥ एवꣳहि यानि चान्यानि ईदृग्ल
क्षणानि पदानि भवंति ॥ इउवर्णौ यदोदात्तावादद्येते यवौ क्वचि
त् ॥ अनुदात्ते पदे नित्यं विंद्यात्क्षैप्रस्य लक्षणम् ॥ ७४ ॥ यथा

त्रि-अंबकम् त्र्यंबकं ॥ द्रु-अन्नः द्रुन्नः ॥ वीडु-अंगः वीड्वंगः ॥ वाजी-
अर्वन् वाज्यर्वन् ॥ एवंव्याहयानि० ॥ इकारोयत्र दृश्येत इका
रेणैव संयुतः ॥ उदात्तश्चानुदात्तेन प्रश्लिष्टो भवति स्वरः ॥ ७५ ॥
अभि-इन्धताम् अभीन्धताम् ॥ अभि-इमं अभीमं ॥ वि-इहि वी
हि ॥ स्रुचि-इव स्रुचीव ॥ चम्वी-इव चम्वीवेति ॥ एवंव्याहयानि
चान्यानि० ॥ उदात्तपूर्वं यत्किंचिच्छंदसि स्वरितं पदं ॥ एष सर्वं
बहुस्वारस्तैरोव्यंजन उच्यते ॥ ७६ ॥ इडे रंते हव्ये काम्ये चंद्रे

ज्योते अदिति सरस्वती महि व्विश्रुतीति भवंति ॥ एवठंह्याह
यानि० भवंति ॥ अवग्रहात्परो यस्तु स्वरितः स्यादनंतरं ॥ तैरो
विरामं तं विंद्यादुदात्तो यद्यवग्रहः ॥ ७७ ॥ यथा गोमदितिगो-
मत् ॥ गोपताविवितिगो-पतौ ॥ प्रप्रेतिप्र-प्र ॥ विततेतिवि-तता ॥
समिद्धइतिसम्-इद्धः ॥ एवठंह्याहयानि० भवंति ॥ स्वरेति स्व
रिते चैव विवृतिर्यत्र दृश्यते ॥ पादवृत्तो भवेत्स्वारः श्वित्रआदि
त्येति निदर्शनं ॥ श्वित्रः-आदित्यानां श्वित्र आदित्यानां ॥ पुत्रः-

ईंधे-पुत्रईंधे ॥ दात्रे-एधि दात्रएधि ॥ कः-ईम् कईम् ॥ ताः-अस्य ताअस्य ॥ एवꣳह्याहयानि० ॥ उदात्ताक्षरयोर्मध्ये भवेन्नीचस्त्व वग्रहः ॥ तथा भाव्यं भवेत्कंपंस्तनूनप्त्रेति निदर्शनम् ॥ ७८ ॥ यथातनूनप्त्रइति-तनूनप्त्रे ॥ तनूनपादिति तनू-नपात् ॥ तनून पातमिति तनू-नपातम् ॥ एवꣳह्याहयानि पदानि लक्षणानि भवंति ॥ इत्यष्टपदसमाम्नाये वैशेषिके याज्ञवल्क्यवचनानां प दानां पाठः समाप्तः ॥ ॥ माध्यंदिनविरोधि स्यात्तथा भाव्यस्तु

य: स्मृत: ॥ स्वरो नैवात्र दृश्येत भिन्नोदात्तानुदात्तकौ ॥ १ ॥
स्वरा: स्पर्शान्त:स्थोष्माण: ॥ कंठ्यजिह्वामूलीयतालव्यमूर्धन्य
दंत्यओष्ठ्ययमा विसर्जनीयनिपाताद्याश्च किंवर्णदैवत्यलिंगा:
स्वरा: शुक्ला: नानादैवत्या: ॥ स्पर्शा: कृष्णा: ॥ कपिला अंतस्था: ॥
ऊष्माणोऽरुणा:॥ नीला यमा: ॥ हरिता नासिक्या: ॥ पीतोनुऽस्वा
र: ॥ रक्तो जिह्वामूलीय:॥ पीतउपध्मानीय:॥ श्वेतो विसर्जनीय:॥
शबलो रंग:॥ नीलोऽनुनासिक्य:॥ इत्यंतर्मध्यमयोर्नासिक्यं विद्या

त् ॥ द्विरुदात्ताख्या इति स्मृतः ॥ उदमनुदनिपाते आद्ये चोप
सर्गे नामाख्याते चोपसर्गनिपाताश्चेति किं दैवत्याः ॥ अक्षराणां
च के पुरुषाः ॥ काः स्त्रियः ॥ कानि नपुंसकानि इत्यत्र ब्रूमः ॥
कंठ्या आग्नेयाः अकारादयः ॥ जिह्वामूलीया नैर्ऋत्याः कका
रादयः ॥ तालव्याः सौम्याः चकारादयः ॥ वायव्या मूर्धन्याष्ट
कारादयः ॥ रौद्रा दंत्याः तकारादयः ॥ औष्ठ्या आश्विन्याः पका
रादयः ॥ शेषा वैश्वदेवाः ॥ अं इत्येवमादयः ॥ स्वरास्तु ब्राह्मणा

ज्ञेया वर्गाणां प्रथमाश्च ये ॥ द्वितीयाश्च तृतीयाश्च चतुर्थाश्चापि
भूमिपाः ॥ २ ॥ वर्गाणां पंचमा वैश्या अंतस्थाश्च तथैव च ॥
ऊष्माणश्च हकारश्च शूद्रा एव प्रकीर्तिताः ॥ ३ ॥ शुक्लवर्णानि
नामानि आख्याता रोहिता मताः ॥ कपिंजलास्तूपसर्गाः कृष्णा
श्चैव निपातकाः ॥ ४ ॥ भार्गवगोत्राणि नामानि भारद्वाजा आ
ख्याताः ॥ वासिष्ठा उपसर्गास्तु निपाताः काश्यपाः स्मृताः ॥
पीतवर्णश्चोपसर्गो निपातः कृष्णवर्णकः ॥ सर्वं तु सौम्यमाख्यातं

नाम वायव्यं दृश्यते ॥ आग्नेयस्तूपसर्गः स्यान्निपातो वारुणः स्मृ
तः ॥ ५ ॥ प्रथमाश्च तथातस्थाः स्त्रीलिंगाः परिकीर्तिताः ॥ शेषा
क्षराणि षंढानि प्राहुर्लिंगविवेचकाः ॥ ६ ॥ नाम्नामिंद्रो देवता
वरुणः उपसर्गाणामादित्यः सर्वस्याक्षरगणस्य स्वरा विसर्जनीयो
यमाश्च पुँल्लिंगाः ॥ ङञणनमा यरलवाः स्त्रीलिंगाः ॥ शेषाण्यक्ष
राणि नपुंसकलिंगानीति ॥ संधिश्चतुर्विधोभवतीति ॥ लोपागमौ
वर्णविकारः प्रकृतिभावश्चेति ॥ तद्यथा-तत्र लोपो भवति अय

क्ष्माः-मा अयक्ष्मामा ॥ शततेजाः-वायुः शततेजावायुः ॥ ति
ग्मतेजाः-द्विषतः तिग्मतेजाद्विषतः ॥ इतिलोपः ॥ आगमोभव
ति-यथा प्रत्यक्सोमः प्रत्यङ् सोमः ॥ प्राक्सोमः प्राङ्सोमः ॥
अस्मान् सीते अस्मान्त्सीते ॥ त्रीन् समुद्रान् त्रीन्त्समुद्रान् ॥
इतिआगमः ॥ विकारोभवति आ-इदम् एदम् ॥ आ-इमे एमे ॥
आ-इष्टयः एष्टयः ॥ प्र-इषितः प्रेषितः ॥ इतिविकारः ॥ प्रकृति
भावः यथा-आशुः शिशानः ॥ सुज्ञानःप्रथमम् ॥ अदितिः षो

डशाक्षरेण ॥ देवोवःसविता ॥ इतिप्रकृतिभावः ॥ आकाशस्था
यथा विद्युत्स्फुटितं मणिसूत्रवत् ॥ एषच्छेदोविवृत्तीनां यथा बा
लेषु कर्तरि ॥ ७ ॥ द्वयोस्तु स्वरयोर्मध्ये संधिर्यत्र न दृश्यते ॥
विवृतिस्तत्र विज्ञेया यईशेति निदर्शनम् ॥ ८ ॥ पिपीलिका पा
कवती तथा वत्सानुसारिणी ॥ वत्सानुसंसृता चैव चतस्रस्तु वि
वृत्तयः ॥ ९ ॥ पंचरंगाः प्रवर्तंते घातनिर्घातवज्रिणः ॥ अहरप्रह
रोज्ञेय अइउऋओइति निदर्शनं ॥ १० ॥ पिपीलिका आद्यंतदी

र्घा नाभ्याआसीदिति निदर्शनम् ॥ पाकवत्युभयोर्न्हस्वा विनइ
न्द्रेति निदर्शनम् ॥ ११ ॥ अंते च वत्सानुसृजता तानेत्यसौ आ
वोढमश्विनेति नि० ॥ वत्सानुसारिणी चादौ दीर्घा ताअस्येति नि०
॥ १२ ॥ करिणी कुर्विणी चैव हरिणी हारिणीति च ॥ तथा हंस
पदा नाम पंचैताः स्वरभक्तयः ॥ १३ ॥ करिणी रहयोर्योगे कु
र्विणी लहकारयोः ॥ हरिणी रषयोर्योगे हारितं ऋषकारयोः ॥
॥ १४ ॥ या तु हंसपदा नाम सा तु रेफषकारयोः ॥ हरिणी ह

रयोर्विंद्यात्कुर्विंणी लहकारयोः ॥ १५ ॥ देवंबर्हिरिति करिणी
उपह्वरेति कुर्विंणी ॥ हरिणीं अरेषसइत्याहुर्हारिणी शतवल्हेति
च ॥ १६ ॥ वर्षोवर्षीयतेसीति तथा हंसपदेति च ॥ स्वरभक्तिं
प्रयुंजानस्त्रीन्दोषान्परिवर्जयेत् ॥ १७ ॥ इकारं चाप्युकारं च
ग्रस्तदोषं तथैव च ॥ एतल्लक्षणमाख्यातं याज्ञवल्क्येन धीमता
॥ १८ ॥ सम्यक् पाठस्य सिद्ध्यर्थं शिष्याणां हितकाम्यया ॥ अर्ध
मात्रास्वरंकिंचित्पृथङ्न्यूनमिवोच्चरन् ॥ ऋकारे च हकारे च ह्रत्कं

ठमनसानि च ॥ १९ ॥ नैतत्स्वरितपूर्वांगे नापरागे कथंचन ॥
न स्वरे न च मात्रायां कथं स्वारो विधीयते ॥ २० ॥ परांगस्य
तु यत्पूर्वं पूर्वांगस्य तु यत्परं ॥ उभयार्द्धार्द्धसंयोगे स्वारं कुर्याद्विच
क्षणः ॥ २१ ॥ संयोगे तु परं स्वार्थं परं संयोगनायकम् ॥ संयुक्तस्य
तु वर्णस्य न स्वार्थं पूर्वमक्षरम् ॥ २२ ॥ उदात्तादनुदात्ते तु वा
मायाभ्रुव आरभेत् ॥ उदात्तात्स्वरितोदात्तौ क्रमाद्दक्षिणतो न्य
सेत् ॥ २३ ॥ स्वरितादनुदात्ता ये प्रचयास्तान्प्रचक्षते ॥ एकस्व

रंरापि चातानाहुस्तत्वार्थचिंतकाः ॥ २४ ॥ प्रचयो यत्र दृश्येत
तत्र हन्यात्स्वरं बुधः ॥ स्वरितः केवलो यत्र मृदुस्तत्र निपातयेत्
॥ २५ ॥ दुर्बलस्य यथा राष्ट्रं हरते बलवान्नृपः ॥ एवं व्यंजनमासा
द्य अकारो हरते स्वरम् ॥ २६ ॥ उच्चादुच्चतरं नास्ति नीचान्नीच
तरं तथा ॥ अक्षरात्तुल्ययोगाच्च नीचे नीचगतानि च ॥ २७ ॥
स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च ॥ स्वरप्रधानैस्तैः स्वा
र्यं व्यंजनं तेन सस्वरम् ॥ २८ ॥ व्यंजनान्यनुवर्तंते यत्र तिष्ठ

ति सस्वरः ॥ स्वरप्रधानं त्रैस्वर्यं आचार्याः प्रवदंति हि ॥ २९ ॥
मणिवद्व्यंजनं विद्यात्सूत्रवच्च स्वरं विदुः ॥ आचार्याः सममिच्छं
ति पदच्छेदं तु पंडिताः ॥ ३० ॥ स्त्रियो मधुरमिच्छंति विकृष्ट
मितरे जनाः ॥ उदात्तं नानुवर्त्तंते नीचन्नस्वरितं तथा ॥ ३१ ॥
विस्वरं तं विजानीयाद्दीर्घह्रस्वविवर्जितम् ॥ हरिवरुणवरेण्येषु
धारपुरुषेषु च ॥ स्वरिते रेफवैश्वानरो नकारः शेषाकारः स्वरिता
नकाराः ॥ ३२ ॥ द्वौ वरुणौ च स्वरितौ ॥ उदुत्तमं वरुणधारयेवरे

रुधारा उरुधारा च होइते ॥ मात्रिकं वा द्विमात्रं वा स्वरितं यदि
हाक्षरम् ॥ तस्यादितोर्द्धमात्रा वै शेषं च परतोभवेत् ॥ ३३ ॥ न
कारांते पदे पूर्वे श्मश्रुभिः परतः स्थिते ॥ छकारं न प्रयुंजीत ञश
संधिं समुच्चरेत् ॥ ३४ ॥ ओकारं प्लुतविज्ञेयं प्लुतमग्नाद्वितीयकं ॥
लाजीं छाचीं तृतीयं च विवेशेति चतुर्थकं ॥ ३५ ॥ अधः स्विदा
सीत्पंचमं चोपरिस्विदासीच्च षष्ठकं ॥ सप्तमं तु भ्रुवोः स्मार अष्टमं
नैव विद्यते ॥ ३६ ॥ उच्चस्थानगते हस्ते स्वरितं नोपपद्यते ॥ अध

स्थातु यदागच्छेत्स्वरितं न तदाभवेत् ॥ कचटतपा दृश्यंते संधि
स्थानेषु नित्यशः ॥ स्ववर्गेणैव संयुक्ता मोक्षं तत्र न कारयेत् ॥ तका
रांते पदे पूर्वे सकारेपरतः स्थिते ॥ प्रत्यारंभं न कुर्वीत पापाविति
निदर्शनम् ॥ ककारांते पदे पूर्वे सकारे परतः स्थिते ॥ खसवर्णं
विजानीयात् भिखक्सेति निदर्शनम् ॥ तकरांते पदे पूर्वे चवर्गे
परतः स्थिते ॥ मोक्षं तत्र च कुर्वीत यच्च पापौ निदर्शनं ॥ ङका
रांते पदे पूर्वे सकारे परतः स्थिते ॥ कसवर्णं विजानीयात्प्राङ्गो

मेति निदर्शनम् ॥ टकारांते पदे पूर्वे सकारे परतः स्थिते ॥ टसवर्णं विजानीयात्संम्राट् संभृतेतिनिदर्शनम् ॥ तकारांते पदे पूर्वे सकारे परतः स्थिते ॥ छसवर्णं विजानीयात् तत्सवितुरिति निदर्शनम् ॥ नकारांते पदे पूर्वे सकारे परतः स्थिते ॥ तसवर्णं विजानीयात्री न्त्समुद्रेति निदर्शनम् ॥ पकारांते पदे पूर्वे शकारे परतः स्थिते ॥ छसवर्णं विजानीयादनुष्टुप्छारदीति निदर्शनम् ॥ मकारांते पदे पूर्वे सवर्णे परतः स्थिते ॥ मसवर्णं विजानीयादिमम्मेति निदर्श

नम् ॥ वर्णे तु मात्रिके पूर्वे अनुस्वारो द्विमात्रकः ॥ द्विमात्रे मात्रि
को ज्ञेयः संयोगाद्यस्य यो भवेत् ॥ अनुस्वारो द्विमात्रः स्याद्दवर्ण
व्यंजनादिगः ॥ ह्रस्वाद्वा यदि वा दीर्घाद्देवानाꣳहृदयेभ्य इति ॥
अनुस्वारस्योपरिष्टात्संवृतं यत्र दृश्यते ॥ दीर्घं तं तु विजानीया
च्छ्रोताग्रावाणेति निदर्शनम् ॥ अनुस्वारस्योपरिष्टात्संयोगो यत्र
दृश्यते ॥ ह्रस्वं तं तु विजानीयात्सहस्थेति निदर्शनम् ॥ अनुस्वा
रश्च यो दीर्घादक्षराद्यो भवेत्परः ॥ स तु ह्रस्वइति ज्ञेयो मंत्रेष्वेव

विभाषया ॥ ओभावश्च विवृत्तिश्च शषसा रेफ एव च ॥ जिह्वा
मूलमुपध्मा च गतिरष्टविधोष्मणः ॥ यथा भावप्रसंधानमुकारा
दिपरं पदम् ॥ स्वरांतं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः ॥ उभा
वादुत्थितश्चोष्मा तां तु केलिं विनिर्दिशेत् ॥ विवृत्तं प्रति या ऊ
ष्मा विज्ञेया विकटानना ॥ लीढातिलीढविद्युच्च शषसेषु प्रकीर्ति
ताः ॥ जिह्वामूले च रेफे च विज्ञेया विठकाशठा ॥ उपध्मानीय
सहिता पुष्पिणीं तां विनिर्दिशेत् ॥ अन्यत्र यो भवेदूष्मा सुलभां

तां विनिर्दिशेत् ॥ पादाद्यंतं पदाद्यंतं तथावग्रहकालिकं ॥ ईषत्स्पृ
ष्टं विजानीयात्तस्मिन्काले तु कारयेत् ॥ पादादौ च पदादौ च
संयोगावग्रहेषु च ॥ यः शब्द इति विज्ञेयो योन्यः सय इति स्मृ
तः ॥ उपसर्गपरो यस्तु पदादिरपि दृश्यते ॥ ईषत्स्पृष्टं यथा विद्यु
त्पदच्छंदात्परं भवेत् ॥ त्वदर्थवाचिनौ वोवां वावैयदि निपातजौ ॥
आदेराजविकल्पार्था ईषत्स्पृष्टा इति स्मृताः ॥ विभाषयामेकारः
स्यात्तथा नेतैःपदात्परः ॥ भवंतेत्यपि पूर्वैव तथा च सपदादपि ॥

यदेव लक्षणं यस्य वकारस्यापि तद्भवेत् ॥ यत्र यत्र विशेषः स्या
दिदानीं स स कथ्यते ॥ वकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूत्तरः ॥
आदौ गुरुर्लघुर्मध्ये पदांते तु लघूत्तरः ॥ उपांशु त्वरितं चैव योधीते
हृदि संज्ञकः ॥ अपिरूपसहस्रेषु सदेहेषु प्रवर्तते ॥ पंचविद्यां न
गृह्णंति जडास्तब्धाश्च ये नराः ॥ आलस्याश्चैव रोगाश्च येषां च
विस्मृतं मनः ॥ अहिरिव गुणाद्भीतः संमानान्नरकादिव ॥ राक्ष
सीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति ॥ न भोजनविलंबी स्या

न्न च नारीनिबंधनः ॥ सुदूरमपि विद्यार्थीव्रजेद्गरुडहंसवत् ॥ यथा खनन्खनित्रेण नरोवार्यधिगच्छति ॥ तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥ सुखार्थी चेत्त्यजेद्विद्यां विद्यार्थी चेत्त्यजेत्सुखम् ॥ सुखिनस्तु कुतो विद्या सुखं विद्यार्थिनः कुतः ॥ गुणिता शतशो विद्या सहस्रावर्तिता पुनः ॥ आगमिष्यति जिह्वाग्रे स्थलनिम्नमिवोदकम् ॥ शतेन गुणिता विद्या सहस्रेण च तिष्ठति ॥ शतानां च सहस्रेण प्रत्यंचदवतिष्ठति ॥ जलमभ्यासयोगेन शिलायाः कुरु

ते क्षयं ॥ कर्कार्णामृदुतस्तस्य किमभ्यासान्न साध्यते ॥ गुरुशुश्रू
षया विद्या पुष्कलेन धनेन वा ॥ अथवा विद्यया विद्या चतुर्थं
नोपलभ्यते ॥ शुश्रूषारहिता विद्या ह्यल्पमेधागुणैःसह ॥ वंध्या च
यौवनी तस्या न विद्या फलिनी भवेत् ॥ हयानामिव जात्याना
मर्धमात्रार्द्धशायिनाम् ॥ न हि विद्यार्थिना निद्रा चिरं नेत्रेषु ति
ष्ठति ॥ यथा ॥ पिपीलिकाभिः पांसुभिर्वल्मीकं क्रियते महत् ॥
न तत्र बलसामर्थ्यमुद्यमस्तत्र कारणम् ॥ अंजनस्य क्षयं दृष्ट्वा व

ल्मीकस्य तु संचयं ॥ अवंध्यं दिवसं कुर्याद्दानाध्ययनकर्मसु ॥
अन्नव्यंजनयोर्भागस्तृतीयमुदकस्य च ॥ वायोः संचारणार्थाय
चतुर्थमुपकल्पयेत् ॥ हकारं पंचमैर्युक्तमंतस्थैश्चापि संयुतं ॥ औ
रसं तं विजानीयात्कंठ्यमाहुरसंयुतं ॥ हकारो यत्र पूर्वस्थो अंत
स्थाद्यो भवेत्परः ॥ पदकाले वियुज्येत संहितायां स औरसः ॥ मेघ
दुंदुभिनिर्घोषो ज्ञायते पयसो ह्रदात् ॥ एवं नादं प्रयोक्तव्यं सिंहस्य
रुदितं यथा ॥ मासे भाद्रपदे मेघाः शब्दं कुर्वंति यादृशम् ॥ एवं

गह्वरमासाद्य शुकं दुदुहेति दर्शनं ॥ शेषाणां वानरा युद्धमुत्पतं
ति पतंति च ॥ एवं वर्णाः प्रयोक्तव्या इहेहैषान्निदर्शनम् ॥ यथा
पुत्रवती स्नेहाच्चुंबते निजमौरसम् ॥ एवं वर्णाः प्रयोक्तव्या युञ्जा
नेति निदर्शनं ॥ दुर्दरो जयदेशे च प्रफतेपुर्नयाप्यया ॥ एवं वर्णाः
प्रयोक्तव्या अपां फेनेति निदर्शनम् ॥ यथा भारभराक्रांता निश्व
संति नरा भुवि ॥ एवं वर्णाः प्रयोक्तव्या अद्भ्यः संभृत इत्यपि ॥
कुक्कुटः कामलुब्धश्च ककारद्वयमुच्चरेत् ॥ एवं वर्णाः प्रयोक्तव्याः

कुक्कुटोसीति दर्शनम् ॥ वडवा च हयं दृष्ट्वा योनिं विकुरुते यथा ॥
एवं वर्णाः प्रयोक्तव्याः सदुंदुभेति दर्शनम् ॥ रंगे चैव समुत्पन्नेनोग्र
सेत्पूर्वमक्षरम् ॥ स्वरं दीर्घं प्रयुंजीत पश्चान्नासिक्यमाचरेत् ॥ यथा
सौराष्ट्रिका नारी अराँ इत्यभिभाषते ॥ एवं रंगः प्रवक्तव्यो ङकार
परिवर्जितः ॥ द्विमात्रिको मात्रिको वा नासामूलं समाश्रितः ॥
अंते प्रयुंजते रंगः पंचमैः सानुनासिकः ॥ यथा सौराष्ट्रिका नारी
अराँ इत्यभिभाषते ॥ एवं रंगं विजानीयात् ङकारपरिवर्जितम् ॥

अनंतरं मकारस्य यो रंगस्तत्र रंज्यते ॥ सर्वांनुनासिकं विंद्यादेषा मध्योपधानिका ॥ यरलवशषसहरज्यंते चोपधानिका ॥ गवाँते रंगते यस्तु सर्वैः सर्वांनुनासिका ॥ नासादुत्पद्यते रंगः कांस्येन समनिःस्वनः ॥ मृदुश्चैव द्विमात्रः स्याद्दृष्टिमान्स्यान्निदर्शनम् ॥ यथा व्याघ्री हरेत्पुत्रान्दंष्ट्राभिर्न च पीडयेत् ॥ भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ॥ मधुरं च नचाव्यक्तं व्यक्तं चापि न पीडितम् ॥ स नाथस्यैकदेशस्य न वर्णाः शंकरं गताः ॥ यथा सुमत्त

नागेंद्रः पदात्पदं निधापयेत् ॥ एवं पदं पदाद्यंतं दर्शनीयं पृथक् पृथक् ॥ गीती शीघ्री शिरःकंपी यथालिखितपाठकः ॥ अनर्थज्ञोऽल्पकंठश्च षडेते पाठकाधमाः ॥ माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ॥ धैर्यं लयसमत्वं च षडेते पाठका गुणाः ॥ चतुरक्षरषट्कं च निवर्तेत पुनः पुनः ॥ आवर्तते पदं यच्च द्वित्रिराम्रेडितं हि तत् ॥ यथा धाम्ने धाम्नेति यजुषे यजुषेति निदर्शनम् ॥ हीयते वर्धते चापि पदं यत्र कृशोदरम् ॥ उपचारः स विज्ञेय उभे

सुश्चंद्रेति निदर्शनम् ॥ ॥ अथ सप्तविधाः संयोगपिंडाः ॥ ॥ अयः
पिंडो दारुपिंड ऊर्णापिंडो ज्वालापिंडो मृत्पिंडो वायुपिंडो व
ज्रपिंडश्चेति ॥ यमान्विद्यादयः पिंडान्सांतस्थं दारुपिंडवत् ॥
अंतस्थं यमवर्जं तु ऊर्णापिंडं विनिर्दिशेत् ॥ अंतस्थं यमसंयोगे
विशेषो नोपलभ्यते ॥ अशरीरं यमं विंद्यादंतस्थः पिंडनायकम् ॥
ज्वालापिंडान्सनासिक्यान्सानुस्वारांस्तु मृन्मयान् ॥ सोपध्मा
वायुपिंडाश्च जिह्वामूले तु वज्रिणः ॥ अयःपिंडोनाम यथा ॥

अग्नीः पक्वीः नातनच्मि ॥ दारुपिंडोनामयथा ॥ अश्वः सूर्यः वि
श्वाजतीतिभवति ॥ तत्रऊर्णापिंडोनामयथा ॥ अस्मिन् इत्यस्मि
न् अमुष्मिन् इतिभवति ॥ तत्रज्वालापिंडोनामयथा ॥ ब्रह्मा
वह्निः गृह्णामीति भवति ॥ तत्र मृत्पिंडोनामयथा ॥ साꣳस्थासꣳ
स्कर्त्तार सꣳस्वर्तइति ॥ तत्र वायुपिंडोनामयथा ॥ देवसवितः। यु
ञ्जानःप्रथमम्। प्रादिवःककुत्सुप्तामितिभवति ॥ तत्रवज्रापिंडोनाम
यथा ॥ इष्कृतिःनिष्कृतिः॥ ऋक्सामइति भवति ॥ प्रथममेव षका

रेण सकारेणैव संयुतं ॥ एतत्स्वरं समासाद्य अग्निष्वात्तान्निदर्श
नम् ॥ प्रथमेन ठकारेण थकारेणैव संयुतम् ॥ एतत्स्वरं समासाद्य
अधिष्ठाननिदर्शनम् ॥ प्रथममेव णकारेण नकारेणैव संयुतम् ॥
एतत्स्वरं समासाद्य त्रिणवत्रयस्त्रिंङ्शाविति निदर्शनम् ॥ प्रथम
मेव रंगेण नकारेणैव संयुतम् ॥ एतद्रञ्जितमासाद्य वृष्टिमानिति
निदर्शनम् ॥ एते ककारादयो मकारपर्यवसानाः कृष्णा व्याख्या
ताः शनैश्चरदैवत्याः ॥ चत्वार्यन्तस्था यरलवाः कपिलवर्णाः

अग्निर्दैवत्याः ॥ चत्वार्यूष्माणः शषसहा अरुणवर्णाः आदित्यदै
वत्याः ॥ त्रयस्त्रिंशद्व्यंजनानि स्पर्शा अंतस्था ऊष्माणश्चेति च
तुर्विधं करणम् ॥ स्पृष्टमस्पृष्टं संवृतं विवृतं चेति ॥ संवृतो घोषा वि
वृता अघोषाः ॥ विंशतिर्घोषास्ते गजडदबा घझढधभा ङञण
नमाः यरलवाश्चेति ॥ त्रयोदश अघोषास्ते कचटतपाः खछठथ
फाः शषसाश्चेति ॥ अष्टौ वर्णस्थानानि भवंति ॥ उरः कंठ्यमूर्ध
न्यतालुदंत्यजिह्वामूलयमानुनासिक्याश्चेति ॥ द्वौ औरस्यौ ह

हा इति । अआआ ३ त्रयः कंठ्याः ॥ ऋषट्मूर्द्धन्याः टठडढ
णष ॥ इति ॥ दश तालव्याः चछजझञयशइईई ३ इति ॥
अष्ट दंत्याः ॥ तथदधनलॢलसाः ॥ एकादश ओष्ठ्याः ॥ पफब
भमाउऊऊ ३ ॡउपध्माचेत्यादयः ॥ एकोदंतमूलीयोरेफः ॥
जिह्वामूलीयाः पंच कुंखुंगुंघुंङुंइति ॥ क्मख्मग्मघ्मकुंखुंगुंघुंइति
यमाश्चत्वारः ॥ रुक्मेति प्रथमोज्ञेयः सक्इत्यपरो भवेत् ॥ तृती
यः सद्मइत्याहुः उपध्मेति चतुर्थकः ॥ प्रथमौ चौष्ठनासि

क्यौ द्वितीयः कंठ्यदंत्यश्च नासामूलमुपाश्रितः ॥ तृतीयः कंठ्य जिह्वाग्रे नासायामेव निर्दिशेत् ॥ चतुर्थो हृदि नासिक्यः कंठे चाभिहिता यमाः ॥ आपंचमैश्चैकपादः संयुक्तं पंचमाक्षरम् ॥ यमास्तत्रनिवर्तन्ते श्मशानादिव बांधवाः ॥ यत्किंचिद्वाङ्मयंलोके सर्वमत्र प्रतिष्ठितम् ॥ सर्वमत्र प्रतिष्ठितमिति ॥ ऋवर्णेतितपरे सादावनुस्वारो द्विमात्रकः ॥ संयोगेपरभूतेषु ह्रस्व एवोच्यते बुधैः ॥ इति श्रीयाज्ञवल्क्यशिक्षासमाप्ता ॥ ॥ ॥ ॥

॥ अथ प्रतिज्ञासूत्रम् ॥

॥ श्रीगणेशायनमः ॥ अथप्रतिज्ञामन्त्रब्राह्मणयोर्वेद नामधेयं तस्मिञ्छुक्ले याजुषाम्नाये माध्यन्दिनीयके मन्त्रे स्वरप्रक्रिया ह्यघनुदात्तो मूर्ध्न्युदात्तः श्रुतिमूले स्वरितः एवं जात्यादयोभिहि ता ब्राह्मणेतूदात्तानुदात्तौ भाषिकस्वारौतानस्वराणि छन्दोवत्सू त्राणि ॥ १ ॥ अथान्तस्थानामाद्यस्य पदादिस्थस्यान्यहलसंयुक्त स्य संयुक्तस्यापिरेफोष्मान्त्याभ्यामृकारेण चाविशेषेणादिमध्या

वसानेषूच्चारणे जकारोच्चारणं द्विर्भावेप्येवमथापरांतस्थस्यायुक्ता
न्यहलसंयुक्तस्योष्मऽऋकारैरेकारसहितोच्चारणमेवं तृतीयांतस्थ
स्य क्वचिद्दकारस्य तु संयुक्तासंयुक्तस्याविशेषेण सर्वत्रैवमथान्त्य
स्यान्तस्थानां पदादिमध्यन्तस्थस्य त्रिविधं गुरुमध्यमलघुवृ
त्तिभिरुच्चारणमथोमूर्द्धन्योष्मणोऽसंयुक्तस्यटुमृते संयुक्तस्यचख
कारोच्चारणमध्ययनादिकर्मस्वर्थवेलायां प्रकृत्या ॥ २ ॥ अथानु
स्वारस्य ङ्इत्यादेशः शषसहरेफेषु तस्य त्रैविध्यमाख्यातम् ॥

ह्रस्वदीर्घगुरुभेदैर्दीर्घात्परो ह्रस्वोह्रस्वात्परोदीर्घोगुरौ परे गुरुः परसवर्णेपत्प्रकृत्या चान्यत्र विसर्गेष्वीपद्विरामःपदाद्यस्य संयुक्ताकारस्येषद्दीर्घता च भवतीषद्दीर्घता च भवतीति ॥ ३ ॥ इति कात्यायनपरिशिष्टप्रतिज्ञासूत्रं समाप्तम् ॥ ॥ ॥ ॥ ॥

॥ अथ सर्वानुक्रमसूत्रम् ॥

श्रीगणेशायनमः ॥ ॐमंडलं दक्षिणमक्षिहृदयं चाधिष्ठितं येन शुक्लानि यजूंषि भगवान्याज्ञवल्क्योयतः प्राप तं विवस्वंतं

त्रयीमयमर्चिष्मंतमभिध्यायमाध्यंदिनीये वाजसनेयके यजुर्वे
दाम्नाये सर्वे सखिले सशुक्रियऋषिदैवतछंदाꣳस्यनुक्रमिष्यामो
यजुषामनियताक्षरत्वादेकेषां छंदोन विद्यते द्रष्टारो ऋषयः स्म
र्तारः परमेष्ठ्यादयोदेवता मंत्रांतर्भूताध्यादिकाहविर्भाजः स्तुति
भाजोवानः शाखोखाशम्योपवेषकपालेध्मोलूखलादयश्च प्रति
माभूताश्छंदाꣳसिगायत्र्यादीन्येतान्यविदित्वा योऽधीतेऽनुब्रूते
जपति जुहोति यजते याजयते तस्य ब्रह्म निर्वीर्यं यातयामं भ

वत्यथातराश्वगर्त्तंवापद्यते स्थाणुं वर्च्छति प्रमीयते वा पापीयान्भ
वत्यथ विज्ञायैतानि योऽधीते तस्य वीर्यवदथ योऽर्थवित्तस्य वी
र्यवत्तरं भवति जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते ॥ १ ॥ इषेत्वादि
खं ब्रह्मांतं विवस्वानपश्यत्ततः प्रतिकर्मविभागेन ब्राह्मणानुसारे
ण ऋषयो वेदितव्याः परमेष्ठी प्राजापत्यो दर्शपूर्णमासमंत्राणामृ
षिर्देवा वा प्राजापत्या इषेत्वाशाखानुष्टुब्विनियोगः कल्पकारो
क्त एवमूर्ज्जेत्वा वायवो वायव्यं देवोव ऐंद्रं यजमानस्य शाखाव

सोर्वायव्यं द्यौर्मातरिश्वन उखा वसोर्वायव्यं देवस्त्वापयः काम-
धुक्षः प्रश्नः सा विश्वायुस्त्रीणि गव्यानींद्रस्यैद्रं विष्णोः पयः ॥ २ ॥
यो अग्न इदमाग्नेये कस्त्वा प्राजापत्यं कर्मणे स्रुक्शूर्पं प्रत्युष्टं
द्वे राक्षसे उरुब्रह्मरक्षोघ्नं सर्वत्र धूरसिधूर्देवानां विष्णुस्त्वानऽउ
रुहविष्याऽअपहतꣳरक्षोयच्छंताꣳहविष्या देवस्यत्वा सावित्रꣳस
र्वत्राग्नेये लिंगोक्ते भूताय त्वा हविः स्वः सूर्यो दृꣳहंतां गृहाः पृथि
व्यास्त्वा हव्यं पवित्रे लिंगोक्तꣳसवितुर्देवीः प्रोक्षिता आपान्यग्न

ये लिंगोक्ते दैव्याय पात्राणि ॥ ३ ॥ शर्मास्यदित्याः कृष्णाजिन
मवधूतꣳ राक्षसमद्रिर्ग्रावोलूखले अग्नेर्हविर्बृंहत्स इमम्मौसले हवि
ष्कृदधिदैवतं वागधियज्ञं पत्नी कुक्कुटो वाग्वर्षवृद्धꣳशूर्पं प्रतित्वा
हविः परापूतमपहतꣳराक्षसे वायुर्वोदेवो वस्तंडुलाधृष्टिरुपवेषोपा
ग्न आदेवयजनमाग्नेये ध्रुवमसिषण्णां कपालान्यग्ने ब्रह्माग्नेयं धि
षणासि दार्षदंदिवः शम्या धिषणौपलं धान्यमसि षण्णाꣳहविर्म
हीनामाज्यम् ॥ ४ ॥ संवपामि हविः समाप आपं जनयत्त्यै त्वे

दꣳहविरिपेत्वाज्यं घर्म्मोसि षण्णांपुरोडाशस्त्रिताय त्रयाणां त्रितो
द्वितः क्रमेणादद इंद्रस्य स्फ्यः पृथिवी वेदिर्व्रजं पुरीषं वर्षंतु वेदि
र्बंधानसावित्रमपाररुमररो आसुरेद्रप्सस्ते वेदिर्गायत्रेण त्रीणि वै
ष्णवानि सूक्ष्मा त्रयाणां वेदिः पुराघशꣳसोपश्यच्चांद्रमसी त्रिष्टु
भं प्रोक्षणीः प्रैषोद्विषतः आभिचारिकमनिशितः स्रुवो निशिता
स्रुगदित्यै विष्णोर्यौक्रमूर्जे त्रयाणामाज्यꣳसवितुरार्षं तेजोसिधा
माज्यं ॥ ५ ॥ इति॰ संहितायां प्रथमोऽध्यायः ॥ कृष्णोसीध्मो वे

दिर्बर्हिर्लिंगोक्ते अदित्या आपं विष्णोः प्रास्तरमूर्णम्रदसं वेदिर्भु
वपतये त्रीण्याग्नेयानि गंधर्वस्त्रयाणां परिधयो वीतिहोत्रं व्विश्वा
वसुराग्नेयीं गायत्रीॅंसमिदाग्नेयङ्ग्सूर्यस्त्वालिंगोक्तङ्ग्सवितुर्विंधृ
तीऊर्णम्रदसमात्वाप्रास्तरे घृताच्यासि त्रयाणां जुहूपभृद्ध्रुवाः क
मेण प्रियेण हविर्ध्रुवा असदन्पाहि मां वैष्णवे अग्नेवाजजिदा
ग्नेयं नमोदैवॅंस्वधापित्र्यङ्ग्सुयमे स्त्रुचावंघ्रिणा वैष्णवं वसुमती
माग्नेयमितऐंद्रङ्ग्संज्योतिषाज्यं मयीदमाशीःप्रतिग्रहणमुपहूता

स. नु. ॥३१॥

द्यावापृथिव्यम् ॥ ६ ॥ ब्रह्मत्वंप्रतिष्ठांतं बृहस्पतिरांगिरसोपश्य
दग्नेष्ट्वा प्राशित्रमेतंते वैश्वदेवमेषा तेनुष्टुबाग्नेय्यग्नेवाजजिदाग्नेय
मग्नीषोमयोश्चत्वारि लिंगोक्तानि वसुभ्यस्त्रयाणां परिधयः संज्ञा
नाथाव्यंतु प्रास्तरे मरुता कपिर्बृहतीं प्रास्तरीमंत्यः पाद आग्नेयो
यंपरिधिं देवलआग्नेयीं त्रिष्टुभं विराड्रूपा यजुरंतामग्नेः प्रियं स
जुःसꣳस्रवभागाः सोमसूक्ष्मोवैश्वदेवीं त्रिष्टुभं यजुरंताꣳस्वाहा
वाड्यजुर्घृताचीस्रुचोयज्ञनमः शूर्पं यवमान्कपिरुद्दालवां धाना

सू. अ. २ ॥३१॥

तर्वांनिति पंचार्षैयोयज्ञोदेवताग्नेदब्धायोगार्हपत्योग्नये दक्षिणा
ग्निः सरस्वत्यै लिङ्गोक्तं वेदोसि वेदो देवामनसस्पतिर्वातदेवत्या
विराजꣳसंबर्हिर्लिंगोक्ता त्रिष्टुब्विराड्रूपा कस्त्वा प्राजापत्यꣳरक्ष
साꣳराक्षसम् ॥ ७ ॥ अथयाजमानꣳसंवर्च्चसा त्वाष्ट्री त्रिष्टुब्दि
विविष्णुस्त्रीणि वैष्णवान्यस्माद्धागोस्यैभूमिरगन्म दैवꣳसंज्योति
षा हवनीयः स्वयंभूः सूर्यस्य सौरे अग्ने गृहपतेगार्हपत्यः सूर्य्यस्य
सौरमग्न इदमाग्नेये ॥ ८ ॥ पितृयज्ञः प्रजापतेरार्षमग्नये सोमा

य द्वेदैवेस्वाहा कारयश्रुतेरपहता असुरं ये रूपाणि कव्यवाहनोग्नि
स्त्रिष्टुबत्रामीमदंत पित्र्यै नमोवः षड्लिंगोक्तानि परे पित्र्यै आध
त्त पित्र्यागायत्र्यूर्ज्जमापिविराट् ॥ ९ ॥ इति०संहितायां द्वितीयो
ऽध्यायः ॥ अग्न्याधेयं प्रजापतेरार्षम् देवानामग्नेर्गंधर्वाणां वा स
मिधाग्नेय्यश्चतस्रो गायत्र्यः समिधाविरूप आंगिरसः सुसमिद्धा
य वसुश्रुतस्तंत्वा भरद्वाजो भूर्भुवःस्वास्तिस्रो महाव्याहृतयोग्निवा
युसूर्यदेवत्याः क्रमेण द्यौरिव यजमानाशीर्लिंगोक्तदेवतायंगौः सा

र्पराज्यस्तृचो गायत्र्योग्निःपरावररूपेण देवता ॥ १० ॥ अग्निहो
त्रं प्रजापतेरार्षम् अग्निर्ज्योतिः सप्तलिंगोक्तदेवता गायत्र्य आ
द्याः पंचैकपदा अग्निर्वर्चोद्वे तक्षापश्यत्पराजीवलश्चैकिः ॥ ११ ॥
यजमानाभ्युपस्थानं बृहद्देवानामार्षम् उपप्रयंत इत्यनुवाक आ
द्ये द्वे आग्नेय्यौ गायत्र्यावुपवत्यागोतमो राहूगणो मूर्द्धन्वत्या वि
रूप उभावां भरद्वाज ऐंद्राग्नीं त्रिष्टुभमयंते देवश्रवादेववातश्चभा
रतावाग्नेयीमनुष्टुभमयमिहवामदेवोजगतीमस्यप्रत्नामवत्सारोग

स. नु. ॥३३॥

व्या वाग्नेयीं वा पयोदेवत्या वा गायत्रीं तनूपाआग्नेयानींधाना सू. अ.
आग्नेयीं महापंक्तिरुत्यवसाना ॥ १२॥ चित्रावसोरात्रिदेवत्यमृषयो ३
पश्यन्त्संत्वमाग्नेयमंधस्थरेवतीः संहितेति त्रीणि गव्यान्युप
त्वाग्नेयं तृचं गायत्रं मधुच्छंदा वैश्वामित्रोग्नेत्वं चतस्रो द्विपदा
आग्नेयीर्बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुरेकैकश इडेकाम्यागव्ये सो
मानं ब्रह्मणस्पत्यं तृचं गायत्रं ब्रह्मणस्पतिर्मेधातिथिर्वामहित्री ॥३३॥
णाऽंसत्यधृतिर्वारुणिरादित्यदैवतं तृचं गायत्रं पथि स्वस्त्ययनं

कदाचनैंद्रीं पथ्याबृहतीं मधुच्छंदास्तत्सवितुर्विश्वामित्रः सावित्रीं
गायत्री परिते वामदेवआग्नेयीमनिरुक्तां गायत्रीं ॥१३॥ क्षुल्लको
पस्थानमासुरेरार्षम् भूर्भुवः स्वः प्रवत्स्यदुपस्थानमागतोपस्थानं
चादित्यस्यार्षं नर्यगार्हपत्यःशंॐ स्याहवनीयोथर्वदक्षिणाग्निराग
न्माहवनीयोनुष्टुबयमग्निर्न्यंकुसारिणीबृहती गार्हपत्योयमग्निर
न्वाहार्यपचनोनुष्टुब्गृहामा त्रिष्टुब्विराड्रूपा येषामानुष्टुबुपहूता
महापंक्तिर्त्र्यवसानास्तिस्रोपिवास्तवीः शंयुर्बार्हस्पत्यः ॥ १४ ॥

स. नु.
॥ ३४ ॥

चातुर्मास्यानि प्रजापतेरार्षम् प्रघासिनोमारुती गायत्री यद्राम
मारुत्यनुष्टुबनिरुक्ता मोषूणोगस्त्यऐंद्रामारुतीं विराजमकंननि
रुक्ताग्नेय्यनुष्टबवभृथयज्ञदैवतं पूर्णादर्विद्वे और्णवाभऐंद्यावनुष्टु
भावक्षंद्वे गोतमऐंद्यौ पंक्ती मनोनुमानसं तृचं बंधुर्गायत्रं वय१६
सौमीं गायत्रीं बंधुरेष ते द्वे रौद्रे अवरुद्र१६रौद्यावेकापंक्तिरपरा
ककुप् त्र्यंबकं द्वे अनुष्टुभौ पूर्वस्या वसिष्ठएतस्तारपंक्तिस्त्र्यायुषं
नारायणउष्णिहं यजमानाशीर्षं१६शिवोनाम क्षौरं निवर्त्तयामि

सू. अ.
३
॥ ३४ ॥

लिंगोक्तदैवतमाशीःप्रायम् ॥ १५ ॥ इति० संहितायांतृतीयोऽ
ध्यायः ॥ अग्निष्टोमःप्रजापतेरार्षम् एदंद्वे अत्यष्टीत्यवसाने आ
द्यावर्द्धर्चौ देवयजनदेवत्याविमाआपओषधे कुशतरुणꣳस्वधिते
क्षौरमापोऽअस्मानापंदीक्षातपसोर्वासोमहीनां नवनीतं वृत्रस्या
जनं चित्पतिर्द्वे प्राजापत्ये देवोमा सावित्रमावोदैव्यनुष्टुब्वासीस्वा
हायज्ञं चतुर्णां यज्ञआकूत्यै चतुर्णामौद्गृभणानामग्निरापोदेवी
लिंगोक्तदेवताविराट् ॥ १६ ॥ विश्वोदेवस्य स्वस्त्यात्रेयः सावित्री

मनुष्टुभमृक्सामयोः कृष्णाजिने शर्मासि कृष्णाजिनमूर्गस्यांगिरो
भिर्दृष्टंमैखलꣳसोमस्यनीर्विष्णोर्वासइंद्रस्य सुसस्याः कृष्णविषा
णोच्छ्र्यस्वदंडोव्रतंयज्ञोदैवींधीयेंदेवावाक्प्राणोदानौ चक्षुःश्रोत्र
मध्यात्ममग्निर्मित्रावरुणावादित्योविश्वेदेवा अधिदैवतꣳधात्रा
आपोजगतीयंतेलोष्टमपोमूत्रंपृथिव्या लोष्टमग्नेत्वमाग्नेय्यनुष्टुप्पु
नर्मन आग्नेयं त्वमग्ने वत्सआग्नेयीं गायत्रीꣳरास्वेयत्सौम्यमे
षातेहिरण्याज्यदैवतं जूरसिवाग्दैवतꣳशुक्रमासिहिरण्यं चिदसि

गौःसोमक्रयणी वाग्रूपाध्यारोपकल्पनया ॥ १७ ॥ वस्व्यस्यनुष्टु
प्बृहतीसोमक्रयण्यास्तुतिरदित्या आज्यमस्मेषण्णा लिंगोक्ता
देवताःसमख्येपत्न्याशीरास्तारपंक्तिरेषतेलिंगोक्तदेवतमास्माको
सिसौम्यमभित्यꣳसावित्र्यष्टिः प्रजाभ्यस्त्वाप्रजास्त्वा शुक्रंत्वा
सौम्यानि सग्मेस्मेलिंगोक्तेतपसोर्द्धंजार्द्धंसोमोमित्रो न इंद्रस्य सौ
म्येस्वानादीनिधिष्ण्यानामानिपरिमाग्नेयीपुरस्ताद्बृहती प्रतिपंथा
मनुष्टुप्पथिदेवत्यादित्याः कृष्णाजिनमदित्यै सौम्यमस्तभ्नात्रि

स. नु.
॥३६॥

ष्टुभौवारुण्यौ सूर्यस्यानुष्टुप्कृष्णाजिनमुस्त्रावूर्ध्वबृहत्यानडुही भ
द्रोमेसौम्यं नमोमित्रस्याभितपनः सूर्यः सौरीं जगतीं वरुणस्य
पंचवारुणानि याते सौमींत्रिष्टुभंगौतमः ॥ १८ ॥ इति०संहिता
यांचतुर्थोऽध्यायः ॥ अग्नेस्तनूरसिपंच वैष्णवान्यग्नेः शकलं वृष
णादर्भतरुणैकेउर्वश्यसित्रयाणां लिंगोक्ता देवता गायत्रेण त्रीण्या
ग्नेयानि भवतंनः पंक्तिरग्नावग्निर्विराडेतयोर्निर्मथ्याहवनीयाव
ग्नीदेवते आपतये वायव्यमनाधृष्टमाज्यमग्नेव्रतपा आग्नेयमंहृशू

सू. अ.
५
॥३६॥

रꣳशुः प्रकृतिश्चतुरवसानासौम्यंत्योर्द्धर्चौ लिंगोक्तदेवतोयातेत्री
ण्याग्नेयानि तप्तायनीचत्वारि पार्थिवानि विदेदाग्नेयमग्नेअंगिरो
स्यामनुत्वालिंगोक्तानि सिꣳह्यसि त्रयाणां वेदिरिंद्रघोषश्चतुर्णामु
त्तरवेदिरिदमहमापꣳसिꣳह्यसि पंचानां वाग्भूतेभ्यः स्रुग्ध्रुवोसि
परिधयस्त्रयाणामग्नेःसंभारागुग्गुल्वादयः ॥ १९ ॥ युञ्जतेश्यावा
श्वः सावित्रीं जगतीमिदंविष्णुर्मेधातिथिर्वैष्णवीं गायत्रीमिराव
तीवसिष्ठस्त्रिष्टुभंदेवश्रुतावक्षधुरौप्राचीस्वंगोष्ठमत्रहविर्द्धानेविष्णो

र्नुतिस्रोवैष्णव्यस्त्रिष्टुभआद्ये द्वे यजुरंते विष्णोर्नुप्प्रदीर्घतमा
ओतथ्यो विष्णोरराटंपंच वैष्णवान्याददेऽग्निरिदमहꣳरक्षोघ्नं बृह
न्नौपवर्णीदमहंपंच लिंगोक्तानि स्वराडस्यौपवर्णि चत्वारि रक्षो
हणौवः सप्त वैष्णवानि यवोसि यवोदिवेत्वौदुंबरीशुंधंतां पित्र्ये
उद्दिवं पंचानामौदुंबरी घृतेनद्यावापृथिव्यामिंद्रस्यैंद्रं परित्वा मधु
च्छंदा अनिरुक्तामैंद्रीमनुष्टुभामिंद्रस्यैंद्राणि त्रीणि चतुर्थं वैश्वदे
वम् ॥ २० ॥ विभूरस्यष्टानां धिष्ण्याअग्नयः संम्राडाहवनीयः

परिषद्योबहिष्पवमानदेशोनभोसि चात्वालोमृष्टोसि शामित्रऋ
तधामौदुंबरीसमुद्रोसि ब्रह्मासनमजोसि शालाद्वार्योंहिरसिप्राज
हितोवागसिसदऋतस्य द्वार्येंअध्वनाꣳसूर्योमित्रस्यर्त्विजोग्नयो
धिष्ण्याः ॥ २१ ॥ ज्योतिरसिवैश्वदेवं त्वꣳसोमक्रतुर्भार्गवःसौमीं
गायत्रीमनवसानां जुषाणो अस्तुदेवत्यैकपदाविराड्यजुरंताग्नेन
यागस्त्य आग्नेयीं त्रिष्टुभमयन्नास्त्रिष्टुब्यजुरंताग्नेयी उरुविष्णोवै
ष्णव्यनुष्टुब्यजुरंता देवसवितः सावित्रमेतत्त्वꣳसौम्यꣳस्वाहा नि

लिंगोक्तदेवतामग्नेव्रतपा आग्नेयमत्यन्यान्वनस्पतिरोषधेकुशत
रुणꣳस्वधितेपरशुर्द्यौमातस्त्वंवनस्पतिः ॥ २२ ॥ इति० संहिता
यांपंचमोऽध्यायः ॥ अग्रेणीः शकलं देवस्त्वायूपः सुपिप्पलाभ्य
श्च बालं द्यामग्रेणयूपोयाते दीर्घतमायूपदेवत्या त्रिष्टुभं ब्रह्मदृꣳह
यूपदेवत्ये विष्णोः कर्माणि द्वे मेधातिथिर्वैष्णव्यौगायत्र्यौ परि
वीर्यूपोदिवस्वरुरेषते यूपउपावीस्तृणमुपदेवा लिंगोक्तमृतस्यत्वा
पशुरग्नीषोमाभ्यां लिंगोक्तमद्भ्योपां पशुरापोदेवीरापꣳसंते पशुर्घृ

तेन स्वरुशासौरेवतीवाग्वर्षौतृणꣳस्वाहादैवे ॥ २३ ॥ माहिर्भूर
ज्जुर्नमस्ते यज्ञोदेवीरापोर्द्धमापमर्द्धमाशीर्वाचंते मनस्तेपशु शं
लिंगोक्तमोपधेतृणꣳस्वधिते सीरक्षसांलिंगोक्तं निरस्तमिदमहꣳ
रक्षोहणीघृतेनद्यावापृथिव्यंवायोवायव्यमाग्निराज्यस्याग्नेयꣳस्वा
हाकृतेवपाश्रपण्याविदमापआपीमहापंक्तिरूयवनसानापावमान
श्चांत्यःपादःसंते हृदयꣳरेडसिवसाप्रयुतं लिंगोक्तं घृतं वैश्वदेवं दि
शः पंचदिश्यान्यैंद्रः प्राणःपश्वंगः प्राणदानं लिंगोक्तंदेवत्वाष्ट्री

स. नु.

॥३९॥

त्रिष्टुप् ॥ २४ ॥ समुद्रंलिंगोक्तानि द्वादश दिवंतेस्वरुर्मापोत्हृदय
शूलंधाम्नोवारुणं यदाहुर्वारुणी गायत्र्यनवसाना सुमित्रियान
आपश्हविष्मतीर्लिंगोक्तदेवतानुष्टुबग्नेर्वश्चत्वार्यापान्यमूरापीं गा
यत्रीं मेधातिथिर्हृदेत्वा सौम्यनुष्टुप् सोमराद‍न्त्सोम्येश्रृणोतु
लिंगोक्तदेवतात्रिष्टुब्देवीराप‍ऽआपीपंक्तिः कार्षिराज्यमनुष्टुप्समु
द्रस्य समाप आपो ऽयमग्नेमधुच्छंदाआग्नेयीं गायत्रीमाददेग्रावा
निग्राभ्याआपमिंद्रायत्वा पंचसौम्यानि यत्तेसौमी विपरीता बृह

सू. अ.

६

॥३९॥

ती श्वात्राःपथ्याबृहती माभेः सौम्यमर्द्धंद्यावापृथिव्यमर्द्धंप्राग
पाक्सौम्युष्णिक् त्वमंगगोतमऐंद्रीं पथ्याबृहतीम् ॥ २५ ॥ इति०
संहितायांषष्ठोऽध्यायः ॥ वाचस्पतयेप्राणदेवत्याविराट् मधुमती
र्लिंगोक्तं यत्ते सौम्यꣳस्वाहोरुयजुषीलिंगोक्ते स्वाकृतोस्युपाꣳ
शुर्देवेभ्यस्त्वा दैवं देवाꣳशोलिंगोक्तमाभिचारिकं प्राणायाग्रहो
व्यानायउपाꣳशुसंवननउपयामगृहीतोस्यंतरैंद्रमंतस्ते मघवदेव
त्यात्रिष्टुबुदानायग्रह आवायो वसिष्ठोवायव्यां त्रिष्टुभमिंद्रवायू

मधुछंदा ऐंद्रवायवींगायत्रीमयंवागृत्समदोमैत्रावरुणीꣳरायाव
यं त्रसदस्युस्त्रिष्टुभं सावां मेधातिथिराश्विनीं गायत्रीं तंप्रत्नथा
वत्सारःकाश्यपोवैश्वदेवीं जगतीमच्छिन्नस्यसौम्यꣳसाप्रथमैंद्री
त्रिष्टुप्तृपंत्वयाऽग्नीलिंगोक्ते ॥ २६ ॥ अयंवेनोवेनस्य त्रिष्टुप्सो
मस्तुतिरधिदैवतमधियज्ञं च मनोनत्रिष्टुप्सोमस्तुतिरधियज्ञानु
वादिन्यपमृष्टः शंडोपमृष्टोमर्कआभिचारिके देवास्त्वा शुक्रामं
थिनावनाधृष्टासिदक्षिणोत्तरवेदिश्रोण्यौसुवीरः सुप्रजाः शुक्रामं

थिनौ निरस्तोद्वे आभिचारिके शुक्रस्य मंथिनः शकलं येदेवासः
परुच्छेपोवैश्वदेवीं त्रिष्टुभमरग्रयणोासिलिंगोक्तदैवतम् ॥ २७ ॥
सोमः पवते वैश्वदेवमिंद्रायत्वा पंच लिंगोक्तानि मूर्द्धानं भर
द्वाजोवैश्वानरीं त्रिष्टुभं ध्रुवोसिध्रुवोध्रुवं ध्रुवेण बृहती पूर्वोर्द्धर्चो
ध्रौवउत्तरऐंद्रोयस्ते देवश्रवाः सौमीं त्रिष्टुभं यजुरंता देवानां चा
त्वालदैवतं प्राणायमे लिंगोक्तदेवतान्येकादश कोसिप्राजापत्यो
ष्णिग्वर्द्धमानामधवेत्वा लिंगोक्तदेवतानि त्रयोदश ॥ २८ ॥ इंद्रा

स. नु. ॥४१॥

ग्नीं विश्वामित्रऐंद्राग्नीं गायत्री माघत्रिशोकआग्नैंद्रीमोमासोमधु सू. अ.
च्छंदा वैश्वदेवीं विश्वेदेवासो गृत्समदइंद्रमरुत्वश्चतस्रोविश्वामि ११८
त्रऐन्द्रामारुतीस्त्रिष्टुभोमरुतात्वायजुर्मरुत्वतीयंमहाँ इंद्रोभरद्वा
जोमाहेंद्रीत्रिष्टुभंय ओजसा वत्सोगायत्रीमुदुत्यंप्रस्कण्वः सौरीं
गायत्री चित्रं कुत्स आंगिरसास्त्रिष्टुभ६रूपेणवोदक्षिणाश्चतुर्णां
ब्राह्मणमद्य लिंगोक्तदेवनान्यष्टौ ॥ २९ ॥ इति० संहितायांसप्त ॥४१॥
मोऽध्यायः ॥ विष्णोर्वैष्णवं कदाचनादित्यदेवत्येबृहत्यौ यज्ञो

देवानां कुत्सस्त्रिष्टुभं विवस्वन्यजुः श्रदस्मै जगत्याशीर्वाममद्य
भरद्वाजोबार्हस्पत्यः सावित्रींत्रिष्टुभं॰सावित्रोसिसावित्रं॰सुशर्मा
सि वैश्वदेवं बृहस्पतिसुतस्य लिंगोक्तमहंप्रजापतिरूपेणाऽऽत्मा
देवतात्रिष्टुबग्नाँ ३ इपत्नीवन्नाग्नेयं प्रजापतिः प्राजापत्यं॰हरिर
स्यृक्सामेहर्योर्यस्तेलिंगोक्तेदेवकृतस्याऽऽग्नेयानिषट् ॥ ३० ॥ स
मिन्द्राग्निर्वैश्वदेवीं त्रिष्टुभं धातालिंगोक्तबहुदेवत्यासुगावोदेवी
याँ२ आवहोवयमाग्नेय्यौयज्ञायज्ञमेषतेलिंगोक्तेयजुषीउरुं॰हिंशु

नःशेपोवारुणीं त्रिष्टुभं नमोवारुणमग्नेरनीकमाग्नेयी त्रिष्टुप् समु
द्रेते सौमी विराड्देवीरापःपंक्तिर्बृहती वा पूर्वोऽर्द्धर्चआपउत्तरः
सौम्योदेवानामाग्नेयमेजतु त्र्यवसानामहापंक्तिर्यस्यैते वशापुरु
दस्मोगर्भोमरुतोयस्य गोतमोमारुतीं गायत्रीं महीद्यौर्मेधाति
थिर्द्यावापृथिव्यामित्यग्निष्टोमः ॥ ३१ ॥ अथषोडश्यातिष्ठगोतम
ऐन्द्रीमनुष्टुभं सुष्वाहि मधुच्छंदा इंद्रमिद्गोतमोयस्मान्नैंद्री त्रि
ष्टुप्परब्रह्मरूपेण षोडशिनस्तुतिरिंद्रश्चैंद्रावारुणी षोडशिदेवत्या

वायजुरंताग्नेपवस्व वैखानस आग्नेयीं गायत्रीमुत्तिष्ठन्कुरुस्तुतिरै
न्द्रीमदृश्रं प्रस्कण्वः सौरीं तिस्रोपियजुरन्ताउदुत्यं देवानामार्ष
माजिघ्रेडेकौसुरूबिंदुर्गव्ये महापंक्तिप्रस्तारपंक्ती विनःशासोभा
रद्वाजऐन्द्रीमनुष्टुभं वाचस्पतिं वैश्वकर्मणीं त्रिष्टुभं विश्वकर्मन्नै
द्रीवैश्वकर्मण्यग्नयेत्वा देवार्षण्यदाभ्यदेवत्यानि ग्रेशीनांत्वा सौ
म्यानि ॥ ३२ ॥ सत्रोत्थानं देवानामार्षमिहरतिः पशुदैवतमुप
सृजन्नुष्णिगाग्नेयी सत्रस्य बृहती यजमानानामात्मस्तुवियुवंतं

परुच्छेपऐंद्रीमत्यष्टिंत्र्यवसानामाद्योर्द्वर्चऐंद्रापार्वतः परमेष्ठीनै
मित्तिकान्याध्यायाद्वसिष्ठस्यार्षं लिंगोक्तदेवतानि चतुस्त्रिंशद्य
योर्वैष्णववारुणीं त्रिष्टुब्देवादिवमाशीर्लिंगोक्तदेवताश्चतुस्त्रिंश
द्धर्मदेवत्यापंक्तिस्त्रिष्टुब्वायज्ञस्य यज्ञदेवत्या त्रिष्टुबापवस्व सौमीं
गायत्रीं नैध्रुविः कश्यपः ॥ ३३ ॥ इति० संहितायांअष्टमोऽध्या
यः ॥ अथवाजपेयोबृहस्पतेरार्षम् इंद्रस्य च देवसवितः सावित्री
त्रिष्टुप् ध्रुवसदमैंद्राणित्रीण्यपाक्षरसदेवत्यानुष्टुब्ग्रहालिंगोक्तदेव

तानुष्टुप्संपृचौ यजुषीन्द्रस्य रथोवाजस्य पार्थिव्यतिजगत्यंत्यः
पादःसावित्रोऽप्स्वन्तरश्वदेवत्यानवसानापुरउष्णिग्वातोवातिस्रो
श्वस्तुतयउष्णिक्त्रिष्टुब्जगत्योवाजिनोश्वादेवस्याहं लिंगोक्तानि
वाजिनोऽश्वाएषस्य द्वे दधिक्रावावामदेव्योक्तदेवत्ये जगत्यौ
शन्नोवसिष्ठोविराजंतेनोनाभानेदिष्ठोजगतीं वाजेवाजे वसिष्ठस्त्रि
ष्टुभममामाप्राजापत्यांवाजिनोक्ताः ॥ ३४ ॥ आपयआयुर्यज्ञेन
प्राजापत्यानि प्रजापतेः स्वरमृतायजमानोस्मेदिशोनमः पृथि

वीयमासंदीयंतासुन्वन्वाजस्य प्राजापत्यं तृचं त्रैष्टुभꣳसोमं तृ
चंतापसऽआद्या वैश्वदेव्यनिरुक्तानुष्टुब्द्वितीया लिंगोक्तदेवता
तृतीयाऽऽग्नेयीग्नेनोलिंगोक्ता गायत्री सरस्वत्यैसुन्वन्नग्निःसप्तदश
लिंगोक्तदेवतानि ॥ ३५ ॥ अथराजसूयोवरुणस्यार्षम् एषते पार्थि
वमग्निनेत्रेभ्योदेवार्षाण्याध्यायाद्दशाद्यानि दैवान्यग्नेसहस्व देव
श्रवादेववातश्च भारतावाग्नेयीमनुष्टुभमुपाꣳशोस्त्रीणि रक्षोघ्नानि
सवितादूयजमानः ॥ ३६ ॥ इति० संहितायांनवमोऽध्यायः ॥

आपोदेवाआपीत्रिष्टुप् वृष्णऊर्म्मिर्लिंगोक्तानि मधुमतीरनाधृष्टा
आपसोमस्य चर्माग्नयेलिंगोक्तान्यनिभृष्टमापः॥सधमादोवारुणी
त्रिष्टुप् क्षरस्य चतुर्णांतार्प्यपांड्वाधीवासोष्णीषाणींद्रस्य धनुर्म्मि
त्रस्य बाहूत्वयायंधनुर्द्दबापणामिषवआविः प्राजापत्यंपराणि लिं
गोक्तानि ॥ ३७ ॥ अवेष्टामृत्युनाशनं प्राचीं पंचानां यजमानः
प्रत्यस्तमासुरं मृत्योरोजोसिरुक्मोहिरण्ययरूपौमैत्रावरुणीत्रिष्टु
ब्यजुरन्तासोमस्यसुन्वन्प्रपर्वतस्यापीत्रिष्टुब्विष्णोस्त्रीणिलिंगो

क्तानि सुन्वन्प्रजापतेन प्राजापत्यात्रिष्टुब्यजुंमध्योयममुष्यजू
रुद्रयद्रौद्रं ॥ ३८ ॥ इंद्रस्यलिंगोक्तानि माते संवरणः प्राजापत्य
ऐंद्रींत्रिष्टुभमग्नये लिंगोक्तानि पृथिविमातर्भूमिर्हंꣳसोवामदेवः
सौरीꣳ सप्रपंचपरब्रह्माभिधायिनीमतिजगतीमियच्छतमानावू
र्गसिशाखेन्द्रस्य बाहूस्योनास्यासंदीक्षत्रस्याधीवासꣳस्योनाꣳसु
न्वाग्निषसाद शुनःशेपोवारुणीं गायत्रीमभिभूरस्यक्षायजमानो
वाब्रह्मꣳस्त्वमामंत्रणानि पंच लिंगोक्तानींद्रस्य स्फ्योग्निःपृथुरा

ग्नेय७ंस्वाहा कृताअक्षाः सवित्रालिंगोक्तदैवतम् ॥३९॥ अथचरक
सौत्रामण्यश्विनोरार्षम् अश्विभ्यां त्रीणि लिंगोक्तानि वायुः सौमी
गायत्री कुवित्तृचक्षसुकीर्तिः काक्षीवतआद्या सौम्यनिरुक्ता त्रिष्टु
ब्युवमनुष्टुप्पुत्रामिवत्रिष्टुबाश्विसरस्वतींद्रदेवत्येअश्विसरस्वतींद्रदेव
त्ये ॥ ४० ॥ इति॰ संहितायांदशमोऽध्यायः ॥ इतिसर्वानुक्रम
णिकायाप्रथमोऽध्यायः ॥ १ ॥ अथाग्निंप्रजापतिरपश्यत् साध्या
वापश्यन्त्सोग्निःपंचचितिकः प्रथमाचितिः प्रजापतेर्द्वितीया दे

वानांतृतीयेंद्राग्न्योर्विश्वकर्मणश्चतुर्य्यूर्षीणां पंचमीपरमेष्ठिनोऽथ
प्रतिकर्मदर्शिनो युञ्जानोष्टौसावित्राणिसवितापश्यदाद्यातृतीया
चानुष्टुप्चतुर्थीषष्ठ्यौजगत्यौ द्वितीयागायत्रीपंचमीत्रिष्टुबिमंनो
यजुरंतागायत्र्यनवसानाऽऽददेभ्रिर्हस्तेनुष्टुब्यजुरंता ॥ १ ॥ प्रतू
र्तंनाभानेदिष्ठ आश्वीमास्तारपंक्तिर्युंजाथांकुश्रिर्गार्दभीं गायत्रीं
योगेयोगेशुनः शेपआर्जींप्रतूर्वंस्त्रिष्टुब्विराड्रूपायजुर्गर्भोरुयजुःपृ
थिव्यास्त्रीण्याग्नेयान्यन्वग्निराग्नेयीं त्रिष्टुभं पुरोधसआगत्य मयो

भुव आश्वीनमनुष्टुभमाक्रम्याऽनुष्टुप् द्यौस्तेबृहत्युत्क्रामविराडुद
क्रमीत्रिष्टुबात्वाहृ गृत्समदआग्नेय्यौपरिसोमकोगायत्रीं परित्वा
पायुरनुष्टुभंत्वमग्नेगृत्समदोजगतीम् ॥ २ ॥ पृथिव्याआग्नेयं अपां
पुष्करपर्ण्णॅंस्वराट्पंक्तिःशर्मद्वेअनुष्टुभौकृष्णाजिनपुष्करपर्ण्णे पु
रीष्योग्निस्त्वामग्नेतृचंभारद्वाजआग्नेयं गायत्रॅंसीदहोतर्देवश्रवा
देववातश्च त्रिष्टुभं निहोतागृत्समदः सॅंसीदस्वप्रस्कण्वोबृहतीम्
॥ ३ ॥ अपोदेवीः सिंधुद्वीपआपीन्यंकुसारिणीॅंसंतेत्रिष्टुप्पार्थि

स. नु. वोर्द्धौवायव्योर्द्धःसुजातोनुष्टुबाग्नेय्युदुतिष्ठविश्वमनाः पथ्याबृह सू. अ.
॥४७॥ तीमूर्द्धःकण्वउपरिष्टाद्बृहतीॐ सजातस्त्रितास्त्रिष्टुभ६ स्थिरोरासभे २।११
य्यनुष्टुबुष्णिग्वाशिवोभवाजीपथ्या बृहती मैतुलिंगोक्तामहापंक्ति
स्त्र्यवसानाग्नेगायत्र्येकपदाग्नेय्यातमग्निमाग्नेये ओषधयस्त्रिष्टुबनु
ष्टुभावोषधिदेवत्येव्यस्यन्नाग्नेयोर्द्धचौविपाजसोत्कीलः कात्यआ
ग्नेयीं त्रिष्टुभम् ॥ ४ ॥ आपोह्याप६सिंधुद्वीपस्तृचंगायत्रंमित्रउप ॥४७॥
रिष्टाद्बृहतीमैत्रीरुद्रा अनुष्टुब्रौद्रीसह६सृष्टां द्वे सिनीवालीदेवत्ये

उखामादित्यामखस्य मृत्पिंडोवसवस्त्वा लिंगोक्तानि सर्वत्रादि
त्यैरास्नादितिरौपंक्त्वायादित्योष्णिगदितिरावटंदेवानां पंचौखा
नि मित्रस्य विश्वामित्रोमैत्रीं देवस्त्वा सावित्री बृहत्युत्थायपूर्वो
र्द्धर्चऔषउत्तरोमैत्रः ॥ ५ ॥ आकूतिं लिंगोक्तान्यौद्भ्रमणानि मा
स्वौख्यौगायत्री त्रिष्टुभावग्निश्च पादाआग्नेयोद्धृंनः सोमाहुतिरा
ग्नेयीं गायत्रीं परस्याविरूपऽआंगिरसः परमास्याऽआरुणिरनुष्टु
भं यदग्ने द्वे जमदग्निरहरहर्नाभानेदिष्ठस्त्रिष्टुभौ याःसेना अनुष्टुभः

सर्वाआग्नेय्योंत्योपरिष्टाद्बृहती ॥ इति० संहितायांएकादशोऽध्या
य: ॥ ६ ॥ इ्शानोवत्सप्री त्रिष्टुभंहरौक्मींनक्कोपासा कुत्सऽआ
ग्नेयीं विश्वाऽयावाश्व:सावित्रीं जगतीॐसुपर्ण्ण:कृतिश्चतुरवसाना
गारुत्मती विपश्नी विष्णोर्लिंगोक्तान्यक्कंदद्वत्सप्रीराग्नेयीं त्रिष्टुभम
ग्नऊर्ध्वबृहत्यग्ने महाबृहती पुनर्गायत्र्यावात्वाध्रुवोऽनुष्टुभमुदुत्त
मंहशुन:शेपोवारुणींत्रिष्टुभमग्नेत्रितआग्नेयींॐहंहसउक्का जगती
ह यजुरन्तांतेबृहद्यजु:सीदत्वमाग्नेयीं त्रिष्टुभमंतरग्नेनुष्टुभौ ॥ ७ ॥

दिवस्पर्य्याग्नेयंत्रैष्टुभंद्वादशर्चं वत्सप्रीर्भालंदनः समिधाग्निं विरू
पाक्षआंगिरस आग्नेयं गायत्रमुदुत्वातापसोनुष्टुभं प्रेदग्नुष्टुप्प्रनाय
माग्नेयीं वसिष्ठस्य त्रिष्टुभमापोदेवीराप्यप्स्वग्ने विरूपऽआग्नेयीं
गायत्रींगर्भोसितिस्रोऽनुष्टुभोबोधामे दीर्घतमास्त्रिष्टुभꣳसबोधि
सोमाहुतिराग्नेयीं यजुरंतां गायत्रीं यजुर्वैश्वकर्म्मणं पुनस्त्वात्रि
ष्टुबाग्नेयी ॥ ८ ॥ अपेतलिंगोक्तबहुदेवत्या संज्ञानमूषदैवत्यमग्नेःसि
कताश्वितः परिश्रितोयꣳसः पंचर्चमाग्नेयं त्रैष्टुभं विश्वामित्रश्चतु

र्थ्यनुष्टुबयंतेनुष्टुप्त्विदैष्टकेलोकंलिंगोक्तानुष्टुप्ताअस्यापींद्रियमे
धऐंद्रइंद्रंजेतामाधुच्छंदसऐंद्रीॐसमितश्चतस्रोद्यग्निदेवत्याउष्णि
गुपरिष्टाद्बृहत्युष्णिकपंक्तयोमातेवोरवास्तुतिस्त्रिष्टुप् ॥ ९ ॥ असु
न्वंतं नैर्ऋतं तृचं त्रैष्टुभं यंतेयजमानदेवत्यानमोविद्भूतिदेवत्ये
कपदा निवेशन आग्नेयीं त्रिष्टुभं विश्वावसुर्देवगंधर्वः सीराद्वे सी
रदेवत्येबुधः सौम्योगायत्री त्रिष्टुभौशुनंचतस्रःसीतादेवत्याः कु
मारहरितोद्वे त्रिष्टुभौ तृतीयापंक्तिश्चतुर्थ्यनुष्टुब्विमुच्यध्वमान

ष्टुही गायत्री सजूर्लिंगोक्तदेवतम् ॥ १० ॥ याऽओषधीः सप्तविꣳ
शतिरनुष्टुभऽओषधिस्तुतिमाथर्वणोभिषङ्मुंचंतुबंधुर्द्वादशानार
भ्याधीतामामाहिरण्यगर्भः कार्यांत्रिष्टुभमभ्यावर्त्तस्वोष्णिगाग्ने
य्यग्नेयद्गायत्रीयं त्रिष्टुबग्नेतवपावकोग्निराग्नेयꣳषड्टृचंप्रथमेविष्टा
रपंक्तिस्तिस्रः सतोबृहत्यउपरिष्टाज्ज्योतिः षष्ठ्याप्यायस्वगोतमः
सौम्योगायत्री त्रिष्टुबुष्णिह आतेवत्सारस्तुभ्यंताद्वेविरूपस्तिस्रो
गायत्र्यआग्नेय्यः ॥ ११ ॥ इति० संहितायांद्वादशोऽध्यायः ॥

स. नु. मयिककुबाग्नेयी ब्रह्मादित्यदेवत्यात्रिष्टुब्भिरण्यगर्भः कार्यींत्रिष्टु सू. अ.
॥५०॥ भं द्रप्सोदेवश्रवाआदित्योनमोस्तुसार्प्पंतृचमानुष्टुभंकृणुष्वपंच २।१३
प्रतिसराराक्षोघ्नादेवानामार्षंसर्व्वास्त्रिष्टुभआग्नेयीर्वामदेवश्चापश्य
दग्नेब्वायजुराग्नेयमिंद्रस्यैंद्रं भुवस्त्रिशिराआग्नेयींत्रिष्टुभं ॥ १२ ॥
ध्रुवास्यूर्ध्वबृहतीप्रजापतिरनुष्टुप्भूरसिप्रस्तारपंक्तिरसाᳬंस्वयमा
तृणादेवताविश्वस्माइत्येतस्य च यजुषः कांडात्कांडादानुष्टुभंद्व्यृ ॥५०॥
चमग्निनादृष्टंदूर्वेष्टकादैवतं यास्तआग्नेयं द्व्यृचमानुष्टुभमिन्द्राग्नि

भ्यां दृष्टं विराडयंलोकःस्वराडसौलोकःप्रजापतिर्ष्वाविश्वज्योतिषं
मधुश्चर्तुर्दैवतमषाढासिसविताऽपश्यद्देवावाऽपश्यन्निष्टकादैवतम्
॥ १३ ॥ मधुव्वातावैश्वदेवंतृचंगायत्रंगोतमोपांगंभन्पंक्तिस्त्रीन्त्समु
द्रास्त्रिष्टुप्कौर्म्यं द्व्यृचं ध्रुवासित्रिष्टुविषेबृहत्यौरवंद्व्यृचमग्नेसुक्ष्वा
ग्नेयंद्व्यृचं गायत्रमाद्यायां भरद्वाजोद्वितीयस्यां विरूपःसम्यक्त्रि
ष्टुब्लिंगोक्तदेवतर्चैत्वाबृहत्यग्निर्ज्योतिषोष्णिगादित्यंगर्भं पंचर्च
माग्नेयं त्रैष्टुभमिमंमापंचर्चमाग्नेयं त्रैष्टुभमेवद्वेद्वेचांतेयजुषीत्वंय

विष्ठोशना: काव्यआग्नेयीमनिरुक्तांगायत्रीमपात्वाविꣳशतिरैष्ट
कान्ययंपुर: पंचाशत्प्राणभृद्देवत्यानि लोकंताइंद्रं तिस्र: प्रतीको
क्ता एवꣳसर्वत्र ॥ १४ ॥ इति० संहितायांत्रयोदशोऽध्याय: ॥
अथद्वितीयाचिति: ॥ ध्रुवक्षिति:पंचाश्विन्यस्तासां प्रथमाविराड्रुत
स्त्रस्त्रिष्टुभोयजुरंता: शुक्रश्चर्तव्यꣳसजू:पंच विश्वेषां देवानामार्षं
ता एव देवता: प्राणंमे पंच वायव्यान्यप:पंचायानिमूर्द्धावय ए
कोनविꣳशतिर्लिंगोक्तदेवतानि ॥ १५ ॥ अथतृतीयेंद्राग्नीअनुष्टुप्

॥५१॥

पूर्वोर्द्धर्चऐंद्राग्न उत्तरः स्वयमातृणादेवतोविश्वकर्मावायव्य१९रा
ज्यसि पंचदिग्देवत्यानिविश्वकर्मावायव्यं नभश्चेपश्चर्तव्येआयुर्मे
दश लिंगोक्तदेवतानि माच्छंदश्चपाट्त्रिं१९शन्मूर्द्धानुष्टुब्यंत्रीपरोष्णि
क्चतुर्दशयजूंᳪषि प्राणदेवत्यानि ॥ १६ ॥ अथचतुर्थ्याशुरष्टाद
शाग्नेर्दशैकया सप्तदशसर्वाणि लिंगोक्तदेवतानि सहश्चर्तव्यम् ॥
॥ १७ ॥ इति० संहितायांचतुर्दशोऽध्यायः ॥ अथपंचम्यग्नेजा
तानाग्नेय्यौत्रिष्टुभौषोडशीचतुश्चत्वारिं१९शल्लिंगोक्ते अग्नेत्रिष्टुप्ए

स. नु.

॥५२॥

वश्चत्वारिंशद्दशिमनैकान्नत्रिंशद्द्राज्यसि पंचायंपुरःपंचैतानिस
र्वाणि लिंगोक्तदेवतानि ॥ १८ ॥ अग्निर्मूर्द्धाग्नेयोनुवाकः प्रथमस्तृ
चोगायत्रोद्वितीयस्त्रैष्टुभोभुवस्तृतीयोजागतोऽयमिहचतुर्थआनु
ष्टुभः सखायःसं पंचमःप्रगाथएनावस्तत्रपूर्वा बृहती सतोबृहत्यु
त्तराताभ्यां तिस्रोबृहत्यः संपादिताः षष्ठऔष्णिहोग्नेवाजस्य गो
तमः सप्तमः पुनः ककुभः प्रगाथोभद्रोनस्तत्रपूर्वाककुप्सतोबृह
त्युत्तराभ्यां तिस्रः ककुभः संपादिता अष्टमः पांक्तोग्निंतंपदपां

सू. अ.

२।१५

॥५२॥

क्तोनवमोऽग्नेतमग्निꣳ होतारमितिछंदांस्यवसानाग्नेत्वंद्वेपदस्तृचः ॥
॥ १९ ॥ अयमग्निर्विरूपोबोधिबुधगविष्ठिरोजनस्य सुतंभरःसखाय
इषःसꣳसमित्संवननस्त्वांप्रस्कण्व एनावोवसिष्ठोऽग्नेवाजस्यगोत
मोभद्रोनः सौभरिरग्निंतंकुमारवृषौ येनाष्टावाग्नेय्यः षट्त्रिष्टुभोद्वे
अनुष्टुभौ तदश्वर्तव्यंपरमेष्ठी सौरं प्रोथदश्वोवसिष्ठस्त्रिष्टुभमाग्ने
यीमायोर्द्वेस्वयमातृणदेवत्ये सहस्रस्यपंचाग्नेयानि ॥ २० ॥ इति०
संहितायांपंचदशोऽध्यायः ॥ रौद्रोध्यायः परमेष्ठिन आर्षं देवानां

वाप्रजापतेर्वाऽद्योनुवाकः षोडशर्च्चं एकरुद्रदेवत्यः प्रथमागायत्री
तिस्रोऽनुष्टुभस्तिस्रःपंक्तयः सप्तानुष्टुभोद्वेजगत्यौ मानोद्वेकुत्सः
॥ २१ ॥ अंत्यानुवाकेसप्तैकरुद्रस्तुतिः आद्योपरिष्टाद्बृहती द्वितीया
जगती कुत्सस्य तृतीयानुष्टुब्द्वे त्रिष्टुभौद्वे अनुष्टुभावसंख्याता ब
हुरुद्रदेवत्यादशानुष्टुभोमंत्रा अवतानसंज्ञकास्ततोंत्यानित्रीणिय
जूꣳषि बहुरुद्रदेवत्यानि प्रत्यवरोहसंज्ञकामंत्राः ॥ २२ ॥ मध्ये
सर्वाणियजूꣳषि हिरण्यबाहवइति तिस्रोऽशीतयोरुद्राणां तेषामु

भयतोनमस्कारा अन्येऽन्यतरतोनमस्कारा अपरेजातानामरु
द्राः सभाभ्यइत्यादयो नमोवः किरिकेभ्यइत्यग्निवायुसूर्यह्रदयभू
ताः पंचव्याहृतयोबहुरुद्रदेवत्याः ॥ २३ ॥ इति०संहितायांषो
डशोऽध्यायः ॥ अश्मन्मारुतमश्मँ०ंस्तेश्मामय्याशीर्य्यंद्विष्म
आभिचारिकमिमामआग्नेयमृतवोबृहतीपंक्तिर्वा समुद्रस्यद्वे गा
यत्र्यावुपज्मं जगती त्रिष्टुब्वाऽपामिदं बृहत्यग्नेपावकसूयवः
सनोमेधातिथिरेआग्नेय्यौगायत्र्यौ पावकया जगतीं भरद्वाजो

नमस्ते बृहतीमाग्नेयीमृषिसुतालोपामुद्रा ॥ २४ ॥ नृषदे पं
चाग्नेयानि येदेवा जगत्यौ प्राणदेवत्ये प्राणदा बृहतीपंक्तिर्वाऽऽ
ग्नेय्याग्निस्तिग्मेनाग्नेयीं गायत्रीं भरद्वाजोयइमा वैश्वकर्म्मणी
स्त्रिष्टुभोविश्वकर्माभौवनः ॥ २५ ॥ आशुरैंद्रीर्द्वादश त्रिष्टुभोऽप्र
तिरथोवसृष्टानुष्टुबिषुदेवत्याप्रतयोद्धृन्तस्तौत्यनुष्टुबसौयामारुती
त्रिष्टुब्यत्रलिंगोक्तदेवता पंक्तिर्मर्म्माणि लिंगोक्तैवत्रिष्टुबुदेनंतिस्रो
नुष्टुभआद्याग्नेयीद्वितीयैंद्री तृतीया लिंगोक्तदेवता पंचादिशः पंच

यज्ञाग्निसाधनवादिन्यऽआद्येद्वे त्रिष्टुभौ तृतीया पंक्तिर्बृहती वा
चतुर्थीबृहत्येवांत्यात्रिष्टुब्विमानोद्वे आदित्यदेवत्ये आद्या विश्वा
वसोर्द्वितीयाप्रतिरथस्यदेवहूर्विंधृतिरनुष्टुब्यज्ञदेवत्या वाजस्यैंद्य
नुष्टुबुद्ग्राभमैंद्राग्न्यनुष्टुबेव ॥२६॥ क्रमध्वंपंचाग्नेय्य आद्यानुष्टुप्
ततस्त्रिष्टुप्ततो बृहतीपिपीलिकमध्या ततोनुष्टुप्त्रिष्टुबंत्याग्नेसह
स्राक्षविराडाग्नेयी सुपर्णोद्वेपंक्तित्रिष्टुभौताᳬंसवितुःसावित्रीं त्रि
ष्टुभं पुरस्ताज्ज्योतिषं कण्वोददर्श विधेमाग्नेयीं गृत्समदस्त्रिष्टुभम

स्याग्निस्त्रिस्थानोग्निर्देवता प्रेद्धोविराडाग्नेयी वसिष्ठस्य चित्तिं वैश्व
कर्मण्यतिजगती सप्तत आग्नेयीत्रिष्टुप्सप्तऽऋषीणाम् ॥ २७ ॥ शु
क्रज्योतिः षण्मारुत्य आद्या चतुर्थीचोष्णिग्द्वितीयातृतीयाचगा
यत्री पंचमीजगती षष्ठीगायत्र्युष्णिग्वैंद्रंदैवीर्मारुतामिमंत्रयोद
शर्च्च आग्नेयस्त्रैष्टुभोऽनुवाको यज्ञस्तुतिर्घृतस्तुतिर्वावसोर्द्धाराभि
वादिनी वा घृतंमिमिक्षेगृत्समदः समुद्राद्वामदेवश्चत्वारिशृङ्गा
यज्ञपुरुषदेवत्यऋषभोमंत्रः ॥ २८ ॥ इति० संहितायांसप्तदशोऽ

ध्यायः ॥ वाजश्चदेवानामार्षम् एतैर्यजुर्भिर्यजमानोग्नेः कामा
न्याचते वाजप्रसवीयꣳसप्तर्चं विश्वेत्रैष्टुभं वैश्वदेवं लुशोधानाको
वाजोनस्तिस्रोन्नदेवत्या आद्यानुष्टुब्द्वे त्रिष्टुभौ संमाविराजावा
ग्नेय्यौ सरस्वत्यै लिंगोक्तदेवतम् ॥ २९ ॥ ऋताषाड्गन्धर्वाप्सरसः
सनः प्राजापत्या प्रस्तारपंक्तिः समुद्रोसि वायव्यानि त्रीणि रुच
माग्नेय्यनुष्टुप्सप्ता वारुणीं त्रिष्टुभꣳशुनःशेपः स्वर्णाग्नेयानि पंचाग्निं
युनज्म्याग्नेय्यस्तिस्र आद्येद्वे त्रिष्टुभौपंक्तिस्तृतीयादिवोद्वेआग्ने

ऽच्यौ परोष्णिङ्महापदपंक्ती इष्टोयज्ञोद्यृचं यजमानाग्निदेवत्यं
गालवआद्योष्णिग्द्वितीयागायत्री ॥ ३० ॥ यदाकूतादष्टर्चमाग्ने
यम् विश्वकर्म्मणस्तृतीया दैवीवाद्याजगती तिस्रस्त्रिष्टुभश्चतस्रो
नुष्टुभोग्निरस्म्यश्यद्द्वैतवादिनीं त्रिष्टुभं देवश्रवादेववातश्च भारता
वृचोयजुर्यैअग्नेयोनुष्टुबाग्नेयी ॥ ३१ ॥ वार्त्रहत्याय सप्तर्च्चमिन्द्रो
पश्यत् आद्येद्वे वार्त्रघ्न्यौ गायत्रीत्रिष्टुभौ विश्वामित्रस्य चवि
नोनुष्टुम्मृगोनत्रिष्टुप्प्रथमाॅंशासो भारद्वाजोद्वितीयां जयऐंद्रो

द्वैवैश्वानर्य्यौं गायत्रीत्रिष्टुभौ पृष्ठोदिवि कुत्सस्य चाऽऽग्यामद्वे त्रिष्टुभावाग्नेय्यौ कामवत्यावश्यामभरद्वाजस्य च वयंते कात्य स्योत्कीलस्य च धामच्छदनुष्टुब्वैश्वदेवी ॥ ३२ ॥ इति० संहिता यांअष्टादशोऽध्यायः ॥ अथ सौत्रामणी प्रजापतेरार्षम् अश्विनोः सरस्वत्याश्च स्वाद्वींत्वानुष्टुप्सुरासोमदेवत्या सोमोसि चत्वारि सौराणि परितोभारद्वाजः सौमीं बृहतीं वायोस्तृचोगायत्रः सौ म्यआभूतेर्ब्रह्मक्षत्रं त्रिष्टुप्सुरासोमदेवत्या नानाहि जगती सुरा

सोमदेवत्या तेजोसि पयोदेवत्यान्योजोसि सुरादेवत्यानि याव्या
ग्रꣳहैमवर्च्चैरनुष्टुब्विपूचिकास्तुतिर्यदापिपेषाग्नेयी बृहती सम्पृच
स्थ पयोग्रहाविप्रचस्थ सुराग्रहा देवायज्ञंब्राह्मणानुवाको विꣳश
तिरनुष्टुभःसोमसंपत् ॥ ३३ ॥ सुरावंतंचतुर्ऋचंत्रैष्टुभं अश्विसरस्व
तींद्रदेवत्यं पितृभ्यः सप्त पित्र्याणि पुनन्तुमा नवर्च्चं पावमान
माद्येद्वे पित्र्येअनुष्टुभौ प्रजापतिस्तृतीया वैखानसआग्नेयीं गा
यत्रीं चतुर्थीलिंगोक्तदेवतानुष्टुप्पंचम्याग्नेयीगायत्री षष्ठ्याग्नेयी

ब्राह्मी च गायत्री ब्राह्मस्तृतीयःपादःसौमीसावित्र्यष्टमी नवमी
त्रिष्टुब्वैश्वदेवी येसमानाअनुष्टुभौपित्र्याद्या द्वितीया यजमाना
शीर्द्वेसृती त्रिष्टुब्देवपानपितृपाणोंपंथानौब्रवीतीदꣳहविरित्यवसा
नार्ष्टिर्यजमानाशीः ॥ ३४ ॥ उदीरतां त्रयोदशर्चंपैत्र्यं त्रैष्टुभꣳ
शंखएकादशी तु जगत्याच्यजानुदशर्चोनुवाकोनवपित्र्यादश
म्यैंद्रीगायत्री तृतीया चतुर्थी नवम्योनुष्टुभस्त्रिष्टुभइतराः सोमो
राजाष्टर्चमश्विसरस्वतीन्द्राऽ अपश्यन्नाद्यास्तिस्रोमहाबृहत्यउपां

त्याचचतुर्थ्यन्ते अतिजगत्यौ शेषेअतिशक्वर्य्योत्र्यवसाने सीसे
नतंत्रमाश्विसरस्वतींद्रदेवत्याः षोडशजगत्यः ॥ ३५ ॥ इति०संहि
तायांएकोनविंशोऽध्यायः ॥ क्षत्रस्ययोनिर्द्विपदागायत्री आस
न्दीदेवताकामात्वाकृष्णाजिनं मृत्योरुक्मावश्विनोर्भैषज्येन लिं
गोक्तदेवतानि त्रीणि कोसिप्राजापत्या गायत्री शिरोमे पंचर्च
मिन्द्रशरीरावयवदेवताकं तृतीयागायत्र्यंत्यामहापंक्तिस्त्र्यवसा
नानुष्टुभोंत्याःप्रतिक्षत्रे वैश्वदेवं त्रयादेवा दैवीपंक्तिस्त्र्यवसाना

प्रथमाद्द्वितीयैर्वैश्वदेवमाशीर्लिंगं लोमान्यनुष्टुब्लिंगोक्तदेवता ॥

॥ ३६ ॥ यद्देवास्तिस्रोऽग्निवायुसूर्यदेवत्या अनुष्टुभः कूष्माण्डीर्य

द्रामे लिंगोक्तदेवतꣳससूद्रेते द्विपदा विराडापी द्रुपदादिवानुष्टुबा

प्युद्वयꣳसौर्य्यनुष्टुप्प्रस्कण्वस्यापोऽआद्याग्नेयी पंक्तिरेधोसिससमिद्दे

वत्ये यजुषी समाववर्त्यनिरुक्ता गायत्री वैश्वानरज्योतिर्यजुर

भ्यादध्याग्नेयं तृचमानुष्टुभमाश्वतराश्विरꣳशुनासौर्य्यनुष्टुप्सिंचं

तिपरिसौर्यैन्द्रीचानुष्टुब्धानावंतमैंद्रीगायत्रीविश्वामित्रस्य च बृह

स. नु. दिंद्राय बृहती नृमेधपुरुषमेधयोरध्वर्योगायत्री ॥३७॥ योभूताना सू. अ.
॥५९॥ मात्मप्रवादापंक्तिर्नारायणीयाकौण्डिन्यस्य प्राणपामे द्वे अनुष्टुबुप २१२०
रिष्टाद्बृहत्यौ लिंगोक्तदेवते समिद्धइंद्र एकादशाप्रीस्त्रिष्टुभआंगिर
सइध्मस्तनूनपान्नराशंस इडोबर्हिर्द्वारउषासानक्ता दैव्याहोता
रा तिस्रोदेवीस्त्वष्टा वनस्पतिः स्वाहाकृतयइत्येता आप्रीदेवता
आयातु सप्तत्रिष्टुभऐंद्र्य आमन्द्रैर्बृहत्या यातु वामदेवस्त्रातारं ग ॥५९॥
र्ग आमन्द्रैर्विश्वामित्र एवेद्वासिष्ठः ॥ ३८ ॥ अथहोत्रं त्रिपशोः

समिद्धोअग्निरापीद्वादशाविदर्भिराश्विसरस्वतीन्द्रदेवत्या अनुष्टुभो
श्विनाहविस्तिस्रोनुष्टुभएकैकाश्विसरस्वतींद्रदेवत्यायइंद्रसवितृव
रुणदेवत्यास्तिस्रोऽनुष्टुभोविश्वनागोभिस्तिस्रोनुष्टुभो युवंपुत्रामि
वानुष्टुप्त्रिष्टुभौ यस्मिन्नश्वास आग्नेय्यौ जगतीत्रिष्टुभावश्विनाते
जसैकदशर्चंॡशस्त्वंगोमद्भृत्समदस्तृचमाश्विनं गायत्रं पावकानो
मधुच्छंदाः सारस्वतमिंद्रायाह्यैंद्रंमधुच्छंदाएवानुक्तमानुष्टुभम
श्विसरस्वतींद्रदेवत्यम् ॥ ३९ ॥ इति०संहितायांविंशोऽध्यायः ॥

इमंमेगायत्रीत्रिष्टुभौवारुण्यौशुनःशेपस्त्वन्नस्त्रिष्टुभावाग्निवारुण्यौ
वामदेवो महीमूषुत्रिष्टुबादित्या सुत्रामाणंगयःप्लातः सुनावत्रौ
स्वार्ग्यांगायत्र्यानोमैत्रावरुणींगायत्रींविश्वामित्रः प्रबाहवावासिष्ठ
स्त्रिष्टुभं६ समिद्धोअग्निरेकादशाप्रमानुष्टुभं६स्वस्त्यात्रेयस्यार्षं व
योधाइंद्रोदेवता वसंतेनऋतुना षडृचामानुष्टुभंलिंगोक्तदेवतं६हो
तायक्षद्द्वादशाप्रीः प्रैषाअश्विसरस्वतींद्रदेवत्या अश्विनौछागस्यस
मलिंगोक्तदेवताःप्रैषा वनस्पतिमभियूपोऽग्निंठंस्विष्टकृदग्निर्देवंब

हिँरेकादशानुयाजप्रैषा अश्विसरस्वतीन्द्रदेवत्याऽ अग्निमद्यसूक्त
वाकप्रैषोलिंगोक्तदेवतोलिंगोक्तदेवतः ॥ ४० ॥ इति॰संहितायां
एकविंशोऽध्यायः॥ इतिसर्वानुक्रमणिकायांद्वितीयोध्यायः॥ २॥
ॐ अथाश्वमेधश्चतुरोऽध्यायान्प्रजापतिरपश्यत् तेजोसिसौवर्णं
निष्कमिमामगृभ्णन्संवत्सरो यज्ञपुरुषस्त्रिष्टुभममभिधालिंगोक्ता
नि योअर्वन्तंगायत्र्यर्द्धेनाश्वस्तुतिः परोर्द्धेलिंगोक्तोग्नयेलिंगोक्ता
न्येव हिंकारायेत्यश्वस्यैकान्नपंचाशच्चेष्टितानि हिरण्यपाणिंपंच

र्चंॅंसावित्रं गायत्रमाद्या मेधातिथिरग्निॅं स्तोमेनाग्नेयंतृचंगाय
त्रंॅंसुतंभरोविश्वामित्रोविरूपीयथासंख्यमजीजनोहिपावमानीं
कृतिंपिपीलिकमध्यामनुष्टुभं त्र्यरुणत्रसदस्यूविभूरश्वदैवतं देवा
दैवमिहरतिराग्नेयानि चत्वारि कायौङ्ंभणानिलिंगोक्तान्याब्रह्म
लिंगोक्तान्येवाध्यायात् ॥ १ ॥ इति॰संहितायांद्वाविंशोऽध्यायः ॥
प्रजापतयेप्राजापत्यम् यस्ते देवं यःप्राणतस्त्रिष्टुप्कायी हिरण्य
गर्भस्य युंजन्तिमधुच्छन्दाआदित्यदेवत्यांगायत्रीं युंजंत्यस्या

श्वस्तुतिर्यद्वातोबृहतीमौ वसवस्त्वालिंगोक्तानिलाजी २ नश्वदेव
त्यंकःस्विच्चतस्रोऽनुष्टुभःप्रश्नप्रतिप्रश्नभूताब्रह्मोद्ये होतुर्ब्रह्मणश्चवा
युष्वा लिंगोक्तानि सक्ष्शितस्तिस्रोश्वदेवत्याअनुष्टुब्विराड्त्रिष्टुभो
न्निःपशुराश्वानि त्रीण्यंबेऽनुष्टुबश्वस्तुतिर्गणानांत्वाचत्वारिलिंगो
क्तानि॥३॥ उत्सक्त्थ्यागायत्र्याश्वी एकादशर्च्चमानुष्टुभं द्वितीया
तूपरिष्टाद्बृहत्यध्वर्य्वादीनां कुमार्य्यादिभिरश्लीलभाषणं ताएव
देवता दधिक्राव्णोदधिक्रावावामदेव्यः सुरभिमतीमनुष्टुभमाश्वीं

गायत्रीॐषड्‌ऋचमाश्वमुष्णिगाद्याश्चतस्रोनुष्टुभोऽत्यात्रिष्टुप्कस्त्वा
षड्‌ऋचमाश्वमाद्यागायत्रीपंचानुष्टुभः कःस्विदष्टादशर्चं ब्रह्मोद्यं
होत्रादीनां प्रश्नप्रतिप्रश्नभूतमाद्याश्चतस्रोनुष्टुभः कास्विदाद्याश्चत
स्रश्चांत्यादशात्रिष्टुभः सुभूरनुष्टुब्लिंगोक्तदेवताहोतायक्षत्प्राजाप
त्यः प्रैषः प्रजापतेर्हिरण्यगर्भः प्राजापत्यांत्रैष्टुभं ॥४॥ इति॰संहि
तायांत्रयोविंशोऽध्यायः॥ अश्वस्तूपरइत्यादयः पशवोऽध्यायेनो
क्ता देवतावापर्यंग्यास्तथारोहितादयोगुणयुक्ता आरण्याश्च कपिं

जलादय आध्यायाच्छादंदद्भिरित्यादित्वगित्येतदंतं द्रव्यदैवतमु
क्तम् अश्वस्तूपरोब्राह्मणोध्यायः ॥ ४ ॥ इति०संहितायांचतुर्विंशोऽ
ध्यायः ॥ शादंदद्भिस्त्वचांतश्चजुंबकायवारुणीं द्विपदां मुंडिभओ
दन्यएषा चाघनाशन्यंतर्ज्जले यस्येमे काय्यौत्रिष्टुभौ हिरण्यग
